(महाभारते)

नं॰ २८११

भगद्गीताष्टादशटीकासहिता प्रथमाध्यायः

नं॰ २७८

पत्राणि १८२

ॐ नमो नारायणाय ॐ अस्य श्रीभगवद्गीता मा-
लामंत्रस्य श्रीभगवान्वेदव्यास ऋषिरनुष्टुप्-
छन्दः श्रीकृष्णः परमात्मा देवता अशोच्यानन्व
शोचस्त्वं प्रज्ञावादांश्च भाषसे इति बीजम् सर्व
धर्मान्परित्यज्य मामेकं शरणं व्रजेति शक्तिः अ-
हं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इ
ति कीलकं नैनं छिंदंति शस्त्राणि नैनं दहति-
पावक इत्यंगुष्ठाभ्यां नमः नचैनं क्लेदयंत्यापो
न शोषयति मारुत इति तर्जनीभ्यां नमः अच्छे
द्योयमदाह्योय मक्लेद्योशोष्य एव चेति मध्यमा
भ्यां नमः नित्यः सर्वगतः स्थाणु रचलोयं सना
तन इत्यनामिकाभ्यां नमः पश्य मे पार्थ रूपा-
णि शतशोथ सहस्रशः इति कनिष्ठिकाभ्यां न
मः नानाविधानि दिव्यानि नानावर्णाकृतीनि
चेति करतलकरपृष्ठाभ्यां नमः इति करन्यासः
नैनं छिन्दन्ति शस्त्राणीति हृदयाय नमः नचै-
नं क्लेदयंत्याप इति शिरसे स्वाहा अच्छेद्योयमदा
ह्योय मिति शिखायै वषट् नित्यः सर्वगतः स्था
णु रिति कवचाय हुं पश्य मे पार्थ रूपाणीति
नेत्रत्रयाय वौषट् नानाविधानि दिव्यानीत्य-
स्त्राय फट् श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥

निषङ्गन्यासः अथ ध्यानम् ॐ पार्थाय प्रति॰
बोधितां भगवता नारायणेन स्वयं व्यासेन॰
ग्रथितां पुराणमुनिना मध्ये महाभारते अद्वैता
मृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं अंब
त्वां मनसा दधामि भगवद्गीते भवद्वेषिणीम्
नमोस्तुते व्यास विशालबुद्धे फुल्लारविंदायत
पत्रनेत्र येन त्वया भारततैलपूर्णः प्रज्वालि॰
तो ज्ञानमयः प्रदीपः २ प्रपन्नपारिजाताय तो
त्रवेत्रैकपाणये ज्ञानमुद्राय कृष्णाय गीतामृ॰
तदुहे नमः ३ सर्वोपनिषदो गावो दोग्धा गोपा
लनंदनः पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृ
तं महत् ४ वसुदेवसुतं देवं कंसचाणूरमर्द्दनं
देवकीपरमानंदं कृष्णं वन्दे जगद्गुरुं ५ भीष्म
द्रोणतटा जयद्रथजला गांधारनीलोत्पला श
ल्यग्राहवती कृपेण वहिनी कर्णेन वेलाकुला
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवैः रणनदी कैवर्तकः केश
वः ६ पाराशर्यवचः सरोजममलं गीतार्थगंधो
त्कटं नानाख्यानककेसरं हरिकथा संबोधना॰
बोधितं लोके सज्जनषट्पदैरहरहः पेपीयमानं
मुदा भूयाद्भारतपंकजं कलिमलप्रध्वंसिनः श्रेय

मे ३ मूकंकरोतिवाचालं पंगुंलंघयतेगिरिं य
त्कृपातमहंवंदे परमानंदमाधवं ४ यंब्रह्मावरु
णेंद्ररुद्रमरुतः स्तुन्वन्तिदिव्यैःस्तवै वेंदैःसांगप
दक्रमोपनिषदै गायंतियंसामगाः ध्यानावस्थि
ततद्गतेनमनसा पश्यंतियंयोगिनो यस्यांतं
नविदुःसुरासुरगणा देवायतस्मैनमः ५ ॥

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः या स्वयं प
द्मनाभस्य मुखपद्माद्विनिःसृता ॥

दोहा

राधा राधा रमण की कीरति कीरति याहि ।
सो देखे मनभावनी तिलक तिलक करि ताहि ॥

रामचंद्रसरस्वतीकृतटीका

धर्मक्षेत्रइत्यादिना भगवगीताशास्त्रं तत्संपिंडितोद्भावितोनत:
तत्त्वं कांतनदध्यायतत्त्वश्लोकावतारव्याख्यासमयेपरिहरि
ष्यामः तत्रपांडवकौरवानीकेयुद्धायकुरुक्षेत्रेसमवेते
इत्याकर्ण्यपुत्रस्नेहतराज्यभ्रंशभीतोधृतराष्ट्रःसंजयंपृच्छति ध
र्मक्षेत्रइति मामकाःपांडवाश्चयुयुत्सवःपूर्वसंतःकुरुक्षेत्रेस
मवेताःकिमकुर्वतेत्यन्वयः कौरवाइतिवक्तव्ये मामकाइ
तिवदन्आत्मनस्तत्संभ्यामिवकृपालोकव्यवहाराभ्यामर्थ
वत्त्वंप्रकटीकरोति समवेताःपरस्पराभिमुखेनतयेकास्मिन्
स्थिताः ननुकिमत्रपृष्टंयुयुत्सवस्तेकुरुक्षेत्रेपियुद्धमे
वकरिष्यंतीत्यतआह धर्मक्षेत्रइति धर्मक्षेत्रस्यकिलायम
हिमायत्पापिनामपिमनोपिप्रसीदंतितदिहाज्ञमेमत्पुत्रैः
कपटोपात्तेराज्येनदत्तंकिलदीयमानमपितेनगृहीतंकि
लेतिभीतःतावज्जयते यदातुकापट्यपरिहायते राज्यदेयमि
ति[illegible]नैयेववासनायांप्रश्न इतिव्याख्यातदा मामकाइत्यने
हाश्लिष्टमिवभवेत् तस्मादुक्तमेवव्याख्यायः संजयस्तुज्ञात्वा
भिप्रायःपांडवसंबंधिदयालुत्वधार्मिकत्वादिदर्शयिष्यंस्त
दुत्कर्षप्रशांतयेतत्रत्रदोषमेवाग्रेव्याहरति ॥ १ ॥

भाषानुवाद

नेत्रहीनधृतराष्ट्रयुद्धमे सन्देह करतेहुये प्रशंसा वाक्यमे धर्म
क्षेत्र कुरुक्षेत्रका विशेषण देकर आत्महितकारी सञ्जयसे पू
छा कि हे सञ्जय धर्मक्षेत्र धर्मभूमि जो कुरुक्षेत्र वहां मेरे पुत्र
दुर्योधन आदिक और पाण्डुके पुत्र युधिष्ठिरादि सब युद्धकी
इच्छाकरि इकट्ठेहो क्याकरतेहैं इससे यह आयाकि धृतराष्ट्र
के पूर्व पुरुषों मे कोई कुरुनाम राजाथे जिनका यह कुरुक्षे
त्र धर्मस्थानहै यहां धर्मबुद्धिहो संग्राम छोड मेलकरके रा
ज्यका विभागतो न करदेयंगे यह भीतरी अभिप्रायहै और र
णभूमिमें सैन्य देखि सशंकितकोनहै क्या धीरवीर भीष्मपिता
महके साथ मेरी प्रबलसेनाको देखि शत्रुवोंको भयभई या
हिंसाकी भय दोनो मानि संग्राममेसे निवृत्तहोजायंगे यह धृ
तराष्ट्र पूछतेहैं १ ॥

धृतराष्ट्रवाक्य ॥ दोहा ॥

धर्मक्षेत्रकुरुक्षेत्रमिलमोसुतपांडवदोय युद्धइच्छयाधायरसंज
यकहोक्याकरतेदोय १ ॥

१

ॐस्वस्ति श्रीगणेशाय नमः श्रीकार्तवीर्यार्जुनाय नमः ॥
दृंगाग्रेण धृता लयेन तरणी येनास्तयश्चाखिला धारा येन ध
रोद्धृतान्तरतिळ्ययो य स्वमाया वृतः येनेयं जगती जिताऽरुवपो
योषा महीभारहृद्यः पांतोस्य जनाभयप्रदोसभवतान्तादि पूता रो
मुदे १ खणरिमर्दनोद्यतो बलारिवर्धनोद्यतः पुरारिकुर्दनोद्य
यतोगदाधरोस्तुवो मुदे २ यदंघ्रिसेवनात्क्षणं प्रमाणिकाम
येन्दिरा समभक्त लोक शोक हृद्गदाधरोस्तु भूतये ३ अभूदवा
निमंडनं विजयकं पनी शोदयो हसम्बल राज्यधूः कलितमा
न्वयी धास्थितिः गुलाबहृदिभूपतिर्गुणगणाकरो बुद्धधीर्नय
ज्ञसमभूज्भभोक्तुघन विस्तृतो सौ धरा ४ रणवीरभिधो धीमान
त्तत्सूनुर्भीतिकैलुकी मेधाकरो गणीवीरधीराणां कीर्तिभूष
णः ५ श्रीमद्दोपपदराजनन्दनोनन्दनाथिपतिनन्दनोपमः
नव्यनव्यभवभव्यभावभाग्भाविभव्यभविनोविभूतये ६॥
श्रियः पुरस्य मध्यगः स्वजंबुतिबुताधिपः वितस्तिकानदीत
टे गदाधरस्य मंदिरे ७ प्रसूजयन्तमूर्तिकां गुलाबसिंहनन्दनः
रणवीरसिंहराट्कृतेस मा सजीवतात् ८ यदात्मजैः परप्रता
परामकाममेवैरैः अनर्घरत्नभूषितैर्जगत्त्रयी विराजते ९
रणोत्सुवाञ्जनेच्छुते रितासुगीतिकाचुरा नदाज्जयाचरणार्थगा
वितन्यते मयाधुना १० ज्ञात्वाप्यनूनजननामहीयावाकरमेज
नीः नासारबंधंपिधायापि स्वतस्तुष्यंतु दुर्जनाः ११ सर्वतः प्रस
रदी निस्फार स्फुरदयवर्ति गणनाकैंद्रगोपस्य पुष्यवं तारिख
स्फुटं १२ तथापि स्वामिकरुणाकलायत्र विराजते मोस्यंया
ति कथं तस्य नापह्नवमथांजसा १३ जयति स्वजनानंदयाधरा

पातोयतोहरिः पुमर्थाश्रयभूतायाः प्रवृत्तेरूपदर्शकः अयमर्थः
सद्धरिर्जयतीति संबंधः स्वजनाः स्वकीया भजनादिद्वारा तदर्पित
चित्तास्तेषामानन्दधारा तन्मयसमावेशतातस्या आपातेचोयु
क्तः प्रवृत्तिरिति सर्वजगत्स्थितिनिमित्तस्य तेनैव श्रीभगवता व
र्ण्यं विधेयत्वेन विहितस्य प्रवृत्तिरूपधर्मोद्ध्वसाधनस्य तत्तत्कर्म
विशेषेणानंतस्योपदर्शक उपदेष्टेत्यर्थः अस्य च धर्मस्य सर्वज
गत्स्थितिनिमित्तत्वं गृहस्थस्य विधेयत्वात् तदाश्रमस्य च सर्वाश्रमसं
स्थितिरूपत्वात् तथा च भृगुः यथा नदीनदाः सर्वे समुद्रे यांति संस्थि
तिम् एवमाश्रमिणः सर्वे गृहस्थे यांति संस्थितिं तथा गृहस्था
त्परो धर्मो लोके भवति कश्चन यदाश्रितास्फुटं भाति भूर्भुवः स्वरि
ति त्रयीति पुमर्थेति पुमर्था धर्मार्थकाममोक्षाख्याश्चत्वारः पुरु-
षार्थाः यांश्चतुर्वर्ग इति व्यपदिशांति तस्य पुमर्थस्य चतुर्वर्गस्या
श्रयभूतायाः प्राप्तिहेतुभूतायाः इति अनेन हि विधिवदासेवितेन च
तुर्वर्गाधिगमो भवतीति न च केवल प्रवृत्तिरूपधर्मानुष्ठानेन कथं
मोक्षसिद्धिरिति शंक्यं निवृत्तेरपि तत्रैवांतर्भावात् केवलं वर्णाश्र
मधर्मस्वीकारेण निष्कामं क्रियमाणस्यास्य प्रवृत्तिलक्षणस्या
पि सिद्धिपर्यवसायित्वात् तथा च भगवतैव गीते कर्मणैव हि संसि
द्धिमास्थिता जनकादय इति तथा नित्यं नैमित्तिकं कर्म कुर्वन्स्यागालव
विवर्जितः विनापि ज्ञानयोगाभ्यां चर्यामात्रेण मुच्यत इति सिद्धं
प्रवृत्तिलक्षणं कर्म पुरुषार्थसाधनमिति न च ज्ञानादेव तत्त्वकैव-
ल्यं आत्मा वा रे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतीनां मोक्षैकसाधनीभू
तानां का गतिरिति वाच्यं केवल प्रवृत्तिरूपधर्मस्य लोकानंत्यहे
तुभूतत्वात् ज्ञानसहचरितकर्मणः साक्षान्मुक्तिफलत्वात् एतदेव

२

ज्ञानसहचरितंकर्मयदकाममिति तथाचप्रामाणिकाः अकामे
नयागाद्यनुष्ठायिनामेवविद्यासमाधिवशादुत्तरेणपथागमनं॥
केवलैः प्रवृत्तिलक्षणसाधनैर्धूमादिक्रमेणदक्षिणेनपथाग
मनमिति तत्रचसौम्यमार्गेणयानेननपुनरावृत्तिरिहविद्यते
दक्षिणमार्गेणपुनरावृत्तिर्विद्यतइति तथाचउपासतेद्विजाः स
त्यंश्रद्धयापरयायुताः क्रमात्तेसंभवंत्यर्चिरहःशुक्लंतथोत्तरं
अयनंयद्देवलोकंचसवितारंसवैद्युतं ततस्तान्पुरुषोऽभ्येत्यमानवो
ब्रह्मलौकिकान् करोतिपुनरावृत्तिस्तेषामिहनविद्यतइति अयमर्थः
येद्विजातयोकामकर्मानुष्ठानेनशुद्धचित्ताः परमात्मानंश्रवणम
ननाभ्यामभिमुखीकृत्यसत्यंयथार्थभूतमुपासतेध्यायंति निं
तरंविमर्षेणब्रह्माहमस्मीतिसाक्षात्कुर्वंति उत्क्रमणकालेर्चिरा
द्यभिमानिनीर्देवताःप्राप्नुवंति तत्रार्चिरादिभिर्न्यैरप्रसिद्धः ब्रह्मलौ
किकान्ब्रह्मलोकनिवासिनः करोति ब्रह्मलोकेचप्राप्तानांतेषां
नपुनरावृत्तिर्जन्मविद्यतइति निष्कामकर्मिणांगतिः सकामा
नांतु यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः धूमंनिशांकृष्णप
क्षंदक्षिणायनमेवच पितृलोकंचंद्रमसंवायुंवृष्टिंजलंमहीं
क्रमात्तेसंभवंतीहपुनरेवव्रजेतिचेति धूममित्यादि धूमाद्यभि
मानिनीर्देवताः प्राप्नुवंति तत्रचंद्रंयावदारोहणंवाघायिवरोह
णमिति महीमिति तत्रत्यानोषधिवनस्पतीन्संभवंतीति तत्रओ
षधिवनस्पतीर्भुक्तवतोः स्त्रीपुरुषयोर्विशुद्धेशुक्रशोणितेशरीरं
संभवतीतिकर्मानुसारेणगतिवैचित्र्यफलितंसिद्धंचैतत् सर्वज
गत्स्थितिनिमित्तमनन्तप्रवृत्तिलक्षणंकर्मेति एतद्विपर्ययेपुनः
ऊर्ध्वयोनिजन्मस्थावरादिगतिर्वा तथाच॥ एतद्योनविजानातिमा

गर्हितयमात्मनः दंदसूकः पतंगो वा भवेत्कीटोथवा कृमिरि॥
ति विहितं चैतद्योगीश्वरेणापि परद्रव्याण्यभिध्यायंस्तथानि
ष्टानि चिंतयन् वितथाभिनिवेशी च जायतेंत्यासु योनिषु इति
त्रिविधं मानसं पापं पुरुषोनृतवादी च पिशुनः परुषस्तथा अ
निबद्धप्रलापी च मृगपक्षिषु जायते इति चतुर्विधं वाचिकं पा
पं अदत्तादाननिरतः परदारोपसेवकः हिंसकश्चाविधानेन
स्थावरेष्वभिजायते इति त्रिविधं कायिकं पापमिति दशविधः
पापेनानिष्टयोनिगमनसमर्थं सिद्धमिति द्वेयपापप्रतियोगितया॥
यत्नमहतिलक्षणं पुण्यं विहितं तथाविधेयं तत्र जनाजाष्टतजाष्टते
ति १४ यं धीरा निगमांतशुद्धमतयो नारायणाभ्यं नराभित्यं चापि
नरोत्तमाभिधमणोः प्रादुष्प्रकृतिं परं सोस्माभ्यं कृपया मनोरथप॰
थातीतः क्रियाच्छ्रीदतिधर्म्यां सर्वहितां दद्यात्र विमलत्वां तैः स्वज्ञा
णांहितैः १५ अन्वयार्थः स्वस्ववर्णाश्रमोचितां तत्त्वविषयां वा धियम
नुयाप्य विनयपात्रेभ्यो राति ददतीति धीराः स्वयं कृतकृत्यत्वात्परा
र्थैकप्रतदेहकलाप इत्यर्थः अथवापथगामिभ्यो मापथं यातैषश्रे
यः साधनं पंथा इत्यनेन सर्वो वितथमोन्नगुरूपेन संचरतेति धियमी
रयंति प्रत्यावर्तयंतीति धीराः निगमांतशुद्धमतयः वर्णिकायः पु
रं वेदो निगम इति नानार्थकोषणात् निगमशब्दस्य वेदवाचकत्वात्
तत्रापि त्रयाणां कर्मकांडपरत्वात् तेषामंतो निश्चयः स्वस्ववर्णा
श्रमाचारनिष्ठा अथवा ब्रह्मप्रतिपादकवेदस्यांतो निश्चयो वेदांत
स्तेन तदभ्यासेन शुद्धा धर्मनिश्चयं तत्त्वनिश्चयं वा प्राप्ता मतिस्तत्का
लयात्त्हिरणी मतिरित्येवं लक्षणा येषां ते नारायणाख्यमिति अना
दिविद्यावाञ्जीवो नरस्तेन स्वकर्मद्वारा सृष्टं नारं शरीरं तदेवायनं

प्रवेशास्थानंयस्यजीवान्नियमयितुमंतःप्रविष्टःशास्ता तथाचश्रुतिः
अंतःप्रविष्टःशास्ताजनानामिति तथानराभिख्यमिति नराज्जीवो
हिरण्यगर्भस्तदभिख्यस्तन्नामा अभिख्यानामशोभयोरितिकोऽ
शात् तथानरोत्तमाभिधमिति उक्तलक्षणाज्जनोनराउत्तमउत्कृ
ष्टोयोस्ति तदभिधस्तन्नामेति तथाच हिरण्यगर्भाद्उत्कृष्टतरोंतर्या
मी ततउत्कृष्टस्तदस्यस्वरूपलक्षणोपेतःशावलशुद्धव्यपदे
शार्हः सर्वज्ञत्वसर्वकर्तृत्वादिगुणवान्सच्चिदानंदस्वरूपः परमा
त्मेत्यवतारितं शाकुरश्चेति यमितिचविधेयानुगुणाः श्रीविस्नुरनू
रूपवेति सोस्मभ्यमिति सः श्रीहरिः श्रियासहितोहरिः श्रीहरिर्ल
क्ष्मीनारायणः सर्वलोकहितांस्वस्वधर्मानुगुणांक्रियांकर्मनिष्ठं
ददात्वितिसंबंधः १५ अहोवत्तुपरमकारुणिकःपरमेश्वरः किं
कर्तव्यतामूढतयामोहसागरेनिमज्जतोजनानवलोक्य श्रीभग
वत्कृष्णद्वैपायनमूर्तिमवलंब्यनिखिलवेदवेदांतसिद्धांतस्मृती
तिहासपुराणादिविविधशास्त्रविप्रकीर्णस्यसाक्षात्परंपरयावा
परमपुरुषार्थहेतुभूतस्यस्वस्ववर्णाश्रमाचारोचितकर्माचरण
रूपस्यधर्मस्यकालवशादपचीयमानाशुद्धियामधिकारिणांप्रति
पत्त्यविषयतामवलोक्यतेषामनायासेनास्मानेहसाचतत्प्रतिप
त्त्यर्थंतेभ्यःसारतःसंक्षिप्यमहाभारताख्यमितिहासंनिबबंध॥ त
त्रचश्रीभगवान्प्रतियुगंतैस्तैर्मत्स्यकूर्मादिभिर्विग्रहैर्जगद्धितार्थं
प्रादुर्भूयधर्मसंस्थांसंस्थापयति तत्रप्रलयकालेजलप्रायेभुवने
सर्वसस्यबीजपूर्णामधिरूढमनुनावंमत्स्यरूपोभूत्वाशृंगाग्रेऽद
धार १ अनंतरंजलधिमंथनेप्रारब्धेवेशास्वीकृतेमंदराद्रौनिरा
धारतयापातालंनिमग्नेकूर्मरूपोभूत्वास्वपृष्ठेतंदधार २॥

ततोपि हिरण्याक्षेण पाताले वनीतां भूमिं वराहरूपो भूत्वा रदाग्रे
दधार ३ अथ हिरण्यकशिपुना विप्रकृतान्देवान्स्वभक्तं च जलाधि
निमज्जनाद्यनेकविधैरुपायैर्वध्यमानमात्मभक्तं प्रह्लादं च वी
क्ष्य तद्रक्षार्थं स्तंभमध्यान्नरसिंहरूपेण प्रादुर्भूय नखाग्रैस्तं हृदो
विददार ४ ततश्च बलिना महेंद्रं नाकादपाकृत्य वशीकृते त्रैलो
क्ये मायावामनो भूत्वा त्रिभिश्चरणविक्रमैर्लोकत्रयीमाक्रम्य तं पा
ताले निबबंध ५ अनंतरं च भुजदर्पाक्रान्त्या प्ररूढगर्वेणार्जुनेना
न्यैश्च तद्विधै राजन्यैर्भूभारायमाणैर्बाध्यमाने जगति रामो भूत्वा ता
न्त्रिःसप्तजगतीस्ववशेचकार ६ ततोपि रावणादिभिः सदेवासुर
नागयक्षमनुष्यादिके विप्रक्रियमाणे जगति श्रीरामभरतल
क्ष्मणशत्रुघ्नरूपेण चतुर्व्यूहमूर्तिमंगीकृत्य रामायणरूपां त्रि
जगत्पावनीं कीर्तिं व्यवस्थापयत् ७ अनंतरं च कंसादिभिर्नरदे
हधरैर्दैत्यैः पीड्यमानायां वसुधायां विलोपिते च धर्मे भूभार
हरणाय कृष्णरूपो भूत्वा तान्निरस्य धर्मं व्यवस्थापयत् ८ तत्रै
वावतारे कुरुपांडवीये युद्धे प्रवृत्ते व्यूढासु चोभयतः सेनासु सं
मुखायातान्स्वजिघांसून्भीष्मद्रोणादीन्विलोक्याज्ञातस्वधर्मत
त्त्वभावेन विजृंभितशोकमोहविध्वंसितविवेकतया निजध
र्मत्यागपूर्वं परधर्माभिसन्धिपरमर्जुनं धर्मरहस्योपदेशल
वेन तस्माच्छोकमोहसागरादुद्धृत्य स्वधर्मे युद्धरूपे त्यस्थापय
त् तं च भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतै
र्भारतसंहितायामुपनिबद्धवान् स च गीताख्यः सन्दर्भः सर्वै
र्भाष्यकारादिभिर्निवृत्तिधर्मप्रधानतया स्वाभिप्रायानुसारेण
बहुशो व्याख्यातोपि प्रक्रांतस्य युद्धार्थस्य स्फुटत्वेनाप्रतिपादना

त्वमस्यतुद्दिश्यपारोहतीति तदर्थविषयतयाव्याख्यायते तत्रच
श्रीकृष्णार्जुनसंवादप्रस्तावायप्रक्रम्यमाणार्थस्यपीठिकांरच
यिष्यन्धृतराष्ट्रसंजयसंवादं तावदवतारयति ॥

ॐ श्रीगणेशाय नमः ॥ देवं नारायणं नत्वा सर्वदोषविवर्जितम्
परिपूर्णं गुरूंश्चान्यान् गीतार्थं वक्ष्यामि लेशतः ॥ नष्टधर्मज्ञानलोक
कृपालुभिर्ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान्व्या
सावततार । ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्था
ज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां
च धर्मज्ञानद्वारा मोक्षो भवेदिति कृपालुः सर्ववेदार्थोपबृंहि
तां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च सर्वप्राणिनामव
गाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां महा
भारतसंहितामचीक्लृपत् । तच्चोक्तं लोके ब्रह्मरुद्राद्यैः सं
सारे क्लिश्यन्तं जनं वेदार्थज्ञानमधीकारवर्जितं स्त्र्यादिकं ।
प्रेक्ष्य प्रार्थयामासुर्देवं पुरुषोत्तमं ॥ ततः प्रसन्नो भगवान्
व्यासो भूत्वावतेनच ॥ अन्यावताररूपेषु वेदाद्युक्तार्थभूषितं
केवलेनात्मबोधेन दृष्टं वेदार्थसंयुतं ॥ वेदादपि परं चक्रे पं
चमं वेदमुत्तमं भारतं पंचरात्रं च मूलरामायणं तथा पुराणं भा
गवतं चेति संभिन्नः शास्त्रपुंगव इति नारायणाष्टाक्षरकल्पे ब्र
ह्मापि तन्न जानाति इयत्तां वापि जानते बह्वर्थमृषयस्तद्भा
रतं प्रवदंतीति ह्युपनारदीये ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं स च
कार ह यस्मिन्दशार्थाः सर्वत्र ज्ञेयाः सर्वज्ञतामितिति नारदीये
भारतं चापि कृतवान्पंचमं वेदमुत्तमं दशावरार्थं सर्वत्र केवलं
विष्णुबोधकं परोक्षार्थं तु सर्वत्र वेदादप्युत्तमं तु यदिति स्कांदे ॥
यदि विद्याच्चतुरो वेदान्सांगोपनिषदान्द्विजः न चेत्पुराणं संवि
द्यान्नैव स स्याद्विचक्षणः इतिहासपुराणाभ्यां वेदं समुपबृंह
येत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति मन्वादिके चिद्ब्रु
वते ह्यास्तीकादि तथापरे तथोपरिचराद्यन्ये भारतं परिचक्षते
भारतं सर्ववेदाश्च तुलामारोपिताः पुरा देवैर्ब्रह्मादिभिः सर्वैर्ऋ
षिभिश्च समन्वितैः व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतं म

हत्वाद्भारववत्वाच्च महाभारतमुच्यते निरुक्तमस्ययोवेदसर्वपापैः
प्रमुच्यते यदिहास्तितदन्यत्रयन्नेहास्तिनकुत्रचित् विनाशोघो
गसारत्वानित्यादितद्गुरूकपर्यालोचनया स्पष्टमिसंप्रदायात् कोऽ
न्यःपुंडरीकाक्षान्महाभारतकृद्भवेदित्यादिपुराणगतस्तुत्यात्म
कवाक्यान्यथानुपपत्त्या नारदाध्ययनादिलिंगेभ्यश्चावसीयते
कथमन्यथाभारतस्यापिनिरुक्तिज्ञानमात्रेणसर्वपापक्षयः
प्रसिद्धश्चायमर्थः कथंचान्यस्यानेककर्तृत्वमाशंक्यते अर्थांतरगतत्वाच्च
नाविद्यमानस्तुतिः नचकर्त्रंतरस्यापिसाम्यात् तत्रचसर्व
भारतार्थसंग्रहं वासुदेवार्जुनसंवादरूपां भारतपारिजातम
धुभूतांगीतामुपनिबध्य तत्रोक्तम् भारतंसर्वशास्त्रेषुभार
तेगीतिकावरा विष्णोःसहस्रनामापिज्ञेयंपाठ्यंचतद्द्वयमि
ति कौर्मे सदैवधर्मःस्वपर्णामोक्षमार्गःपदेवेदन इतिच तत्रसे
नयो

हत्वा द्वारवत्याश्च महाभारतमुच्यते निरुक्तमस्य यो वेद सर्वपापैः
प्रमुच्यते यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् विनाशोद्यो
ग सारत्वानित्यादितद्धिकपर्यालोचनया सर्वविस्मरदोषात् कोप्य
न्यः पुरंदरोक्ताज्ज्ञानमहाभारतस्य इह वेदित्यादिश्रुतिगणगतपृथात्व
स्वाक्तान्यथानुपपत्त्या नारदाध्ययनादिलिंगेश्चावसीयते
कथमन्यथा भारतस्याह निरुक्तिज्ञानमात्रेण सर्वपापक्षयः
प्रसिद्धस्त्वसोर्थः कथं चान्यस्य तन्निरुक्तं प्रकाशते ग्रंथांतरगतत्वाच्च
नाविद्यमानस्तुतिः न च कर्त्रैव अतरत्रापि साम्यात् तस्य च सर्व
भारतार्थसंग्रहं वासुदेवार्जुनसंवादरूपां भारतपारिजातम
धुभूतां गीतामुपनिबध्य तत्प्रोक्तम् भारतसर्वस्व गीतेष्ठभार
ते गीतिका वरा विष्णोः सहस्रनामापि ज्ञेयं पान्सवतद्द्वयमि
ति कौर्मे सद्व्यधर्मःस्वपर्यामोब्रह्मणः पदवेदन अतिच तत्रसे
नया

ॐश्रीमातंगवदनायनमः शुभकिरत दोहा मेंगीतारचोंमंगल
दायकसुनित १ वंदतहोंश्रीरामपदब्रह्मयोनिसुखधाम
करतरहोमोचितमेंसीतासहितविलास २ श्रीरमणाशिव
शक्तिजोगणपतिदिनकोईश कमलभवादिकदेवमोकरो
सहायतेतीश ३ वंदतहोंपदसभनकेहोंसभलायकदेव
विघ्नहरेंहेंसभनकेसिद्धकरणममसेव ४ कवित्त शंकर
समाजशुभसोभतकेलासस्वेतस्वेतदिकपालस्वेतवाहन
बनाएहैं स्वेतहीविभूतिअंगस्वेतअरधंगीसंगस्वेतचंदसे
तसपकेंवलपढाएहैं सोहतहैयाहीमध्यजटाजूटरक्तप
ककातिककेमेघमेंसुमेरशृंगभाएहैं ऐसोजोरूपसोऊमो
पैअनुकूलरहोसुनावरदनामयातेमोरेमनआएहैं ५
आज्ञाश्रीमहाराजश्रभजंभुपतिसेंपाय गीताकीभाषाचर
णावीरसिंहमनभाय ६ यहसमुद्रमेंजडमतितातेंतरन
सामान एकभरोसोरामपदसिंधुतरतपाषान ७ दोहामू
लसंदेपथरअथवाओरेछंद तापाछेवार्तिककरोंमोद्दिर
वोब्रजचंद ८ सवैया शिवसनकादिकनारदसेरटेंजिह
नामसमाधिलगाए ध्यानपरेंनुयरेकवदेषनतुपरमेश
अगोचरगाए देवनहेतवनेजोबालदशारथकेगेहमेंषे
लषिलाए हेजगईशविशिष्टसेगावतसोममकारजहोहुं
सहाय ९ टीकागीताकीसुनततुपजनलहेंहुलास हर्जि
नुकीमतकोंकहेंप्रगटकरेंजोहास १० यद्यपिदूषनहोहिं
जोउजेनमहजसुभाए तद्यपिजिकाआसतेअंगुकतनयोन
जाए ११ कवित्त जानोनाहिकविताओकवीनाकहूवनहों

पंडितकीगिनतीमेकहोकहांपाइए छत्रियकीजाततहांरा
जसीसुभावकहांवियाअभ्यासकछुसुपनमेगाइए हूष
नअरुभूषणकविनाअनेकविधमानोएकरामनामसबद
सुनाइए राषोंएकटेककरोंपंडितहमेससंगवांधेन्रपसेत
ज्योंपिपीलकालेवाइए १२ रामकृपाकरमोहिएदीजेंयह
वरदाय जैसेंग्रंथसमापतिहोवेंसहजसुभाए १३ मैंतोहों
निजदासप्रभुतमहेयमोरेईस यहवरमांगतहोंसदाकरीहु
पामेंदिस १४ श्रीराजाधिराजरणवीरसिंहजगदीप ऐसो
हैनहिहोएगोहेपाकसमीराथीप १५ कवित्त भारतजोखंड
तामेदेषोतोअनेकविधतहांइकजंबुआदिलोकनमेंगायोहै
पावनसरितनतटनगरविचित्रवसेंजाकोदेषदेवनकोलोक
मुसकायोहै श्रीरणवीरसिंहभूपतिपरसिद्धजहांजिनमं
हाराजपदराजनमेंपायोहै सोभतउदारऐसोदीननतेऊवेर
किपराषेंमोहिएहमांहिएहिमनभायोहै १६ कवित्त ॥
मत्स्यअरुकूर्मवाराहन्रसिंहभएवामनपरसुरामरामचंद्र
गाएहै कृस्नअरुवोधतेसेंकलिावतापरीएएतेअवतारह
श्रावेदमांहिगाएहै भक्तहितधारकउतारदियोभूमिभारवा
रनकेहेतज्योंवारनलगाएहै ऐसेंहेतमेरेअवकीतिये ह॰
यालुचितमेंतोप्रभुचरननैननितलाएहै १७ ॥

धृतराष्ट्र उवाच धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्स
वः मामकाः पाण्डवाश्चैव किमकुर्वत संजय १

भाष्यं नास्ति ॥ प्रथमाध्यायसमाप्तिपर्यन्तं ॥

आनन्दगिरिकृतटी०

तत्रैवमक्षरयोजना धृतराष्ट्र उवाचेति धृतराष्ट्रो हि प्रज्ञाचक्षुर्बाह्य
चक्षुरभावाद्बाह्यमर्थं प्रत्यक्षयितुमनीशः सन्निधिवर्तिनं संजयमा
त्मनो हितोपदेष्टारं पृच्छति धर्मक्षेत्र इति धर्मस्य तद्धेतोश्च क्षेत्रमभि
वृद्धिकारणं यदुच्यते कुरुक्षेत्रमिति तत्र समवेताः संगता युयुत्स
वो योद्धुकामास्तत्र केचिन्मदीया दुर्योधनप्रभृतयः पाण्डवाश्चापरे
युधिष्ठिरादयस्ते च सर्वे युद्धभूमौ संगताः सन्तः किमकुर्वत किं कृत
वन्तः १ ॥

स्वामिकृतटीका ॥ हे संजय धर्मभूमौ कुरुक्षेत्रे ।
धर्मक्षेत्र इति कुरुक्षेत्रविशेषणं पवमादिकरुषः कश्चित्कुरुनामा
बभूव तस्य कुरोर्धर्मस्थाने मामकाः मत्पुत्रा दुर्योधनादयः पाण्डोः
पुत्राः पाण्डवाश्च युयुत्सवो योद्धुमिच्छन्तः समवेता मिलिताः सन्तः
किमकुर्वत किं कृतवन्तः १ ॥

रामानुजभाष्यम्

धर्मक्षेत्र इत्यारभ्य स घोषो धार्तराष्ट्राणामित्यन्तानि श्लोकानि दुर्यो
धनो भीमाभिरक्षितं पाण्डवानां बलमात्मीयं च बलं भीष्माभिरक्षित
मवलोक्यात्मविजये बलस्य पर्याप्ततामात्मीयबलस्य तद्विजये चा
पर्याप्ततामाचार्याय निवेद्यान्तर्विषण्णोऽभवत् तस्य विषादमवलोक्य
भीष्मस्तस्य हर्षं जनयितुं सिंहनादं शङ्खनादं च कृत्वा शङ्खभेरीनिना
दैश्च विजयाभिशंसिनं घोषं चाकारयत् ततस्तं घोषमाकर्ण्य सर्वेश्व
रेश्वरः पार्थसारथिस्तु पाण्डुतनयस्त्रैलोक्यविजयोपकरणभूते मह
ति स्यन्दने स्थितौ त्रैलोक्यं कम्पयन्तौ श्रीमत्पाञ्चजन्यदेवदत्तौ शङ्खौ प्र
दध्मतुः ततो युधिष्ठिरवृकोदरादयश्च स्वीयान् शङ्खान् पृथक्पृथक् द
ध्मुः स घोषो दुर्योधनप्रमुखानां सर्वेषामेव भवत्पुत्राणां हृदयानि बि
भेद अद्यैव नष्टं कुरूणां बलमिति धार्तराष्ट्रा मेनिरे एवं तद्विजयाभि
काङ्क्षिणे धृतराष्ट्राय संजयोऽकथयत् १ ॥

अभिनवगुप्तकृत टीका

अत्र केचिद्व्याख्याविकल्पमाहुः कुरूणां करणानां धर्मक्षेत्रमनुग्रा

हकमतएवसांसारिकधर्माणां सर्वेषां तेषामुत्पत्तिनिमित्तत्वात् अथवास
परमोधर्मोयद्योगेनात्मदर्शनमित्यस्यचधर्मस्यक्षेत्रे समस्तधर्माणांतथा
ऽपवर्गसाम्राज्यप्राप्तेस्तेनतदधिकारिशरीरे सर्वक्षेत्राणांक्षेत्रेहिसार्थत्वात्त
स्यस्वधर्म्यात्मकभावेनवर्तमानानांरागवैराग्यक्रोधक्षमाश्रद्धानीनांस
मागमोयत्रतस्मिन् स्थितायेमामकाश्चविद्याप्रमुखाविनाविद्यामनः
तेकिमकुर्वतकैःखलुकेजिताइतियावत् ममेतिकायतीतिमामको
विद्याप्रमुखःपांडुःशुद्धः १॥

परमार्थप्रपा टी॰

धर्मक्षेत्रेतत्रत्यक्रजीविनांनेसंपतितिभेदंकुरुक्षेत्रेयुयुत्सवोयोद्धुमिच्छ
वःसमवेतामिलितामामका मत्पुत्राःपांडवाश्चकिमकुर्वतकिंकृत
वंतस्तदावदत्वेतिशेषः १॥

वनमाली टी॰

धृतराष्ट्रःपृच्छति हेसंजयमामकाःममपुत्रादुर्योधनादयःपांडवा
युधिष्ठिरादयःकुरुक्षेत्रेसमवेतामिलिताःसंतःकिमकुर्वतकिंकृतवंतः
कीदृशायुयुत्सवोयोद्धुमिच्छवःकीदृशेकुरुक्षेत्रेधर्मक्षेत्रेविधिमानधर्म
स्यवर्द्धकेअपूर्वधर्मोत्पादकेच एतादृशभाग्यधर्मोद्दिष्टाः सेनायुद्धादि
कृतायुद्धंकृतवंतोवायदिकृतवंतस्तर्हिकथंकृतवंतइतिप्रश्नार्थः १

[illegible]मवैजयंती टी॰

धर्मक्षेत्रइति धर्मक्षेत्रेधर्मस्योत्पत्तिभूविकुरुक्षेत्रेलोकवेदप्रसिद्धेकुरु
क्षेत्रेदेवयजनमितिशतपथश्रुतेः युयुत्सवोयोद्धुमिच्छवःसमवेताःसं
गताःसंतःमामकामदीयाःसुयोधनादयःपांडवाःपांडुतनयायुधि
ष्ठिरादयश्चकिमकुर्वतकिंकृतवंतःधर्मयुद्धंकृतवंत उताधर्मयुद्धंकृतवंतः
यद्वा मत्पुत्राःकिमकुर्वतयपुनःपांडुपुत्राःकिमकुर्वन् अथवाधार्मिकामत्पु
त्राधर्मक्षेत्रेयतोधर्मस्ततोजयइति श्रुत्वानंतःसंतोधर्मयुद्धंकृतवंतस्तर्हितह
तराज्याभविष्यंति यद्वा एवमेवातिधार्मिकाःपांडवास्तत्रापिधर्मक्षेत्रेऽप्य
हिंसाभयेनयुयुत्सांहित्वापुनर्वनवासायमतिंकृतवंतस्तर्हिमत्पुत्राःप्राप्त
राज्याएवेतिधर्मक्षेत्रइतिविशेषणाभिप्रायः यद्वा कृष्णसहायान्वीरक्रु
द्धान्भीमार्जुनादीन्दृष्ट्वाभयोद्विग्नधर्ममनस्काःसंतःमदीयाःपांडवे
भ्यश्छलेनहृतंराज्यंतेभ्योदत्वासाम्यंकृतवंतस्तर्हियुद्धनिवृत्त्यैवकुलकुशल
मित्यभिप्रायः युद्धाद्धतेपिहृतराज्याएवेत्यभिप्रायः रागद्वेषादिदोषाद्रस
मपराजयभीति भोसंजयत्वंनिष्कपटेनकथयेत्येवनिजसुतविजयेपांडुसुत
पराजयेचसंदिग्धचित्तस्यधृतराष्ट्रस्यप्रश्नबीजं
त्रेधाधाप्यन्तिमसंजयेति अत्रप्रश्नस्यप्रश्नबीजे केचित्केषांसद्भावाल्पया
भवत्याकृतेनशब्देवैशंपायनेनजनमेजयंप्रत्युक्तोऽयंश्लोकइतिनन्वस्यतःसमाधानेनिशाम्यविशेषव
देतिनतत्समीचीनं धृतराष्ट्रस्यस्वकीयपरकीयेषुरागद्वेषजनितप्रमादमोहाकुलितचित्तत्वेनसामान्य धृतराष्ट्रउवाचेतिप्रश्नस्यबीजंच
विशेषवचनविचा॥

वै

रजात् बुभुत्सोत्पत्तेरेवासंभवात् ननुव्यग्रचित्तस्यैव जनस्य सामा
न्याकृतस्य विशेषबुभुत्सात्तिनन्तु सावधानस्येति चेन्न विदितस्यत
थात्वादर्शनात् सावधानचित्तस्य जनमेजयपरी[illegible]तादेस्तथात्व
दर्शनाच्च न च सावधाने धृतराष्ट्रे चित्तचांचल्यमारोप्यैवैवं वदन्ती
तिवाच्यं भारतेन तस्यासावधानतायाः पुनः पुनरुक्तत्वात् नन्वथ
गाबलाणि विन्याद्भ्यसं[illegible]ति निहतो भूमौ वा तस्यग्रहबडुम इत्येत
न संदेहे पाक्षिपरपूर्वग्रंथविरोधः स्यादिति चेन्न संजयस्य संदेहेपा
क्षिकं कृत्वापि स्वपरपुत्रयोर्जयपराजयकामेन तयोः स्वराज्यलाभा
लाभसंशयेनास्य प्रश्नस्य चरितार्थत्वाद्दत्तोने [illegible] ग्रंथविरो
धगोधोऽस्मदकृतीत्याव सम्यगुपपत्तेस्तेषां धृतराष्ट्रसंदेशाङ्गो विरु
द्धप्रश्नव्याख्योके [illegible] णमेवाक्षि विरोधः स्यादित्यलं निरसेलंजल्प
केवादैः मामका इत्यनेनैव पाण्डवानामपि ग्रहणे प्राप्ते पुनः पृ
थङ्निर्देशेनास्यायमभिप्रायः अंतरंगबहिरंगयोरंतरंगो बलवा
नितीतरापेक्षया पाण्डवाश्च पंचांतरंगा दुर्योधनादिशतसंख्यानाम
पेक्षयात्तु बहिरंगास्तुः प्रसिद्धं बहिरंगमंतरंगे इति पाणिनिन्या
यात् यद्वा मामका इत्यनेन स्वपुत्रेष्वस्नेहातिरेकं तेषु ममत्वा
भावं दर्शयन् द्वेषमाविष्करोति १ ॥

मधुसूदनी ॥

एवं युयुत्सवो योद्धुमिच्छवोपि संतः कुरुक्षेत्रे समवेताः समागताः मा
मकाः मदीया दुर्योधनादयः पांडवाश्च युधिष्ठिरादयः किमकुर्वत
किं कृतवन्तः किं पूर्वोद्भूतयुयुत्सानुसारेण युद्धमेव कृतवन्तः उ
तकेनचिन्निमित्तेन युयुत्सानिवृत्त्याऽन्यदेव किंचित्कृतवन्तः
भीष्मार्जुनादिवीरपुरुषदर्शननिमित्तं दृष्टभयं युयुत्सानिवृत्तिकार
णं प्रसिद्धमेव अदृष्टभं[illegible]मपि दर्शयितुमाह धर्मक्षेत्रे इति धर्म
स्य च पूर्वमविद्यमानस्योत्पत्तेर्विद्यमानस्य च वृद्धेर्निमित्तं सस्य
स्येव क्षेत्रं यत् कुरुक्षेत्रं सर्वश्रुतिस्मृतिप्रसिद्धं बृहस्पतिरुवा
च याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूता
नां ब्रह्मसदनमिति जाबालश्रुतेः कुरुक्षेत्रं वै देवयजनमिति
शतपथश्रुतेश्च तस्मिन् गताः पांडवाः पूर्वमेव धार्मिका यदि

पूर्वापर

ग

यं

पतद्वयहिंसानिमित्तादधर्माद्भीता निवर्तेरन् ततः प्राप्तराज्या ए-
वमत्पुत्राः अथवा यदि धर्मक्षेत्रमाहात्म्येन पापानामपि मत्पु-
त्राणां कदाचिच्चित्तप्रसादः स्यात्तदा वतेऽनुतप्ताः कपटोपार्जि-
तं राज्यं पाण्डवेभ्यो यदि दद्युस्तर्हि विनापि युद्धं हताएवेति स्वपुत्र
राज्यलाभे पाण्डवराज्यालाभे च दृढतरमुपायमपश्यतो महाना-
ह्वेग एव प्रश्नबीजं संजयेति संबोधनं रागद्वेषादिदोषान् सम्य-
ग्जितवानसीति कृत्वा निर्व्याजमेव कथनीयं त्वयेति सूचना-
य मामकाः किमकुर्वतेत्यतावतैव प्रश्ननिर्वाहे पाण्डवाश्च इ-
ति पृथङ्निर्देशात्पाण्डवेषु ममकाराभावप्रदर्शनेन द्रोहमभि-
व्यनक्ति । एवं कृपालोकस्य च महात्मनेत्राभ्यामपि हीनतया म-
हतोंधस्य पुत्रस्नेहमात्राभिनिविष्टस्य पुत्रसाहस्रप्रश्नो विदित-
मिप्रायस्य संजयस्याति धार्मिकस्य [illegible] नारयति वैश- च
पायनः ॥ १ ॥

सदानंदीटीका ॥

धर्मस्योत्पादके क्षेत्रे धर्मवृद्धैककारणे श्रुतिस्मृतिप्रसिद्धे-
स्मिन्कुरुक्षेत्रे रणस्थले १ दुर्योधनादयो धस्य मम पुत्रा लब्धाप-
रे युधिष्ठिरादयः पाण्डोः पुत्रा राज्यफलस्थले २ कृतवन्तः कि-
मित्येते संधीभूता हि संजय धर्मक्षेत्रपदेनोक्ते पाण्डवा धार्मिकाः
स्वतः ३ हिंसाभिया निवर्तेरन्यदि बंधुपरित्यजयात् प्राप्तराज्या-
स्ततः पुत्रा मदीया इति भुजा ४ यद्वा वेदे कुरुक्षेत्रे कर्मकाण्डे
प्रसिद्धिमत् अन्यदेवयजनात्वं धर्मक्षेत्रमुदाहृते ५ अविमु-
क्ते कुरुक्षेत्रे देवानामिति वाक्यतः अन्यद्ब्रह्मसदनात्वं मुक्तिक्षेत्र-
मुदाहृते ६ यत्र प्राणपरित्यागाज्जंतुमात्रस्य मोक्षणं संसारबंध-
नः प्रोक्तं श्रुतौ तत्काशिकाभिधं ७ प्राणप्रयाणसमये श्रीरुद्रस्ता-
रकं परं व्याचष्टे ब्रह्म तेनासौ मोक्षं प्राप्नोति बोधतः ८ इत्येवं वा-
क्यशेषेण कुरुक्षेत्रं विलक्षणं अविमुक्तं यतः प्रोक्तं मतं ब्रह्माहुति-
सिद्धये ९ धर्मक्षेत्र इति प्रोक्तं कुरुक्षेत्रं प्रसिद्धिमत् भारते सर्ववे-
दार्थाभावतार्थं स्वकृतत्वशः १० गीतायामस्तितेनेयं सर्वशास्त्र-
मयी मता अतो व्याख्योपरोधमत्र भाति सा हि निदर्श्यते ११ अत्रे

मेभारतस्यापिरूपकद्वयमीरितं क्षेत्रंदेहपङ्क्तिसंसिद्धमथाध्या
त्ममितिस्थले १२ युधिष्ठिरोधर्ममयोहृत्तत्त्वत्रप्रकल्पितः अ·
र्ज्जुनःस्कंधरूपेणशाखाबाहुर्वृकोदरः १३ माद्रीसुतौपुष्पफले
मूलेकृष्णोद्विजाःस्मृताः दैवीसम्पत्समयात्रधर्मोयामुनिनेरि
ता १४ दुर्योधनोमन्युमयोहृत्तत्त्वत्रप्रकल्पितः कर्णस्तुस्कंध·
रूपेणशाखाश्शकुनिरीरितः १५ दुःशासनःपुष्पफलेमूलेस्या
त्पितांधकः आसुरी संपदत्रासौक्रोधाद्यानिविलेरिता १६
इत्थंसंपद्द्वयन्यस्ततयोरन्योन्यमाग्रहात् युद्धंप्रदर्शितंसम्य·
ग्विस्तरान्मुनिनाबलं १७ प्रतिपाद्यपरब्रह्मभारतेवेदसंग्रहे
तज्ज्ञानसाधनेधर्मःप्रतिपाद्यस्तुनेमेत १८ दैवीसंपद्रूपादस्या
पांडवानांजयार्जुनेः आसुरीसंपदाहेयाधार्त्तराष्ट्रपराजयात्
यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः इत्येवंरूपकेणा
त्रैभारतेमुनिनेरितः २० अत्रापिप्रथमेश्लोकेतद्रूपकप्रदर्शने
गीताशास्त्रसमारंभेकृतेव्यासेनवेधसा २१ कृष्णेनकरणानां
यत्तत्त्रंदेहाधिकारिणः अनुग्राहकभावेनतत्त्रवत्तत्त्रसूच्य
ते २२ सर्वेषांचैवधर्माणामुत्पादकतयातथा अयंतुपरमो
धर्मोयद्योगेनात्मदर्शिने २३ आत्मज्ञानमयोधर्मःसाध्यतेत्र
मुमुक्षुभिः तयात्मसत्त्वधर्माणामपवर्गैकलाभतः २४ त्रा
णभूतेमुमुक्षूणांस्तद्धर्मक्षेत्रंशरीरकं क्षेत्राणांपरमक्षेत्रंशरीरं·
क्षेत्रमुच्यते २५ वध्यघातकभावेनतस्मिन्क्षेत्रेपरस्परं राग
वैराग्यसंतोषदर्पाद्यादीनांसमागमः २६ येस्थितामामकास्त
त्रस्वविद्याद्भुतबोधिताः अविद्यामयसंकल्पास्तत्रासुराःस्मृतिबो
धिताः २७ ममैतिकायतीतुक्तामामकाश्चेतिशालिनः का·
मक्रोधादयःसर्वेमहामोहात्मजाःशठाः २८ पांडुस्तुद्धिरिति
श्रोक्तातत्सुताःपांडवाःस्मृताः शमोवैराग्यसंतोषश्चावोविद्या
मयाःशुभाः २९ किंकुर्वतायतिप्रोक्तेकिमकुर्वतशाहृतः सुस
[illegible]रैषप्रश्नोस्तिसंजयज्ञानिनंप्रति ३० यद्वामोहस्यप्रश्नोयंस्व
यत्रात्ममनःप्रति इतिरूपकमादायबोधितस्तुमुनिनाजनाः ३१

श्री

गी.
टी.
प्र.

३

ज्ञानपर्वोपसंहारे संजयोक्तिर्न्यपश्यति यत्रयोगेश्वरः कृष्णोयत्रपा
र्थोधनुर्धरः तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम तथाछांदो
ग्येपिवेदांतगिरामप्यत्रसंमतिः ३३ हृतयोयस्तुरादेवाइंद्रियाणि
कौतोक्तनाः शास्त्रानुगाःसुराःप्रोक्ताःस्वाभाविकास्तथासुराः
स्वाभाविकास्तेमोहपाइंद्रियाणिप्रवृत्तयः प्रवृत्ताःशास्त्रसि
द्धार्थप्रकाशाभिभवायताः ३४ शास्त्रानुगाःसुरास्तत्रशांतिदो
तिप्रवरःसुराः शांतिसिद्धप्रवृत्तीनामासुरीणांतयावशाः ३५ ।
अनादिकालमारभ्यदेवासुरसमागमः प्रतिदेहप्रवृत्तोसौ
सर्वप्राणिषुसंगरः ३६ एवमेवमुनेर्भावोदर्शितोयमथाधुना
श्रीजैवनप्रसंगेनव्याख्यास्यामोयथामति ३७ ॥

नीलकंठीटीका ॥

तत्रयुद्धायसंनद्धौस्वकीयादग्रिमेहृतान्तेभुतन्त्वधृतराष्ट्रउवाच
धर्मक्षेत्रइति तत्रवेदेतेषांकुरुक्षेत्रेदेवयजनमासेतिकर्मका
ण्डप्रसिद्धेकुरुक्षेत्रमन्यत्तअविमुक्तेवैकुरुक्षेत्रेदेवानांदेवयज
नंसर्वेषांभूतानांब्रह्मसदनमित्यविमुक्ताख्येब्रह्मप्राप्तिस्थानभू
तेकुरुक्षेत्रेमन्यत् ब्रह्मसदनत्वंचास्यअत्रहिजंतोःप्राणेषूत्क्र
ममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टे येनासावमृतीभूत्वामोक्षीभ
वतीतिवाक्यशेषेणव्युत्पादितं एतद्व्यावृत्त्यर्थंधर्मक्षेत्रइतिवि
शेषणं कुरुदेशान्तरगतंहिकुरुक्षेत्रंधर्मक्षेत्रमेवनतुतद्ब्रह्म
सदने अपवर्गकांडे तस्यधर्मक्षेत्रत्वमात्रश्रवणात् तत्रसमवे
ताःमिलिताःयुयुत्सवोयोद्धुमिच्छवः पांडवानांपृथग्ग्रहणं
तेषुममत्वाभावसूचनार्थं ॥ १ ॥

श्रानंदी टीका

ऊरुनानात्रधर्मेत्वविति शेत्राणंभविष्यतीतिपुराणैर्निरूक्के ऊरु॰ त्रेत्रेदेशोधर्मोणांश्रौतस्मार्तक्रियाविशेषाणांबीजभायाणामल्पा नामप्यनुष्ठानानामस्मानां त्रेत्रेननप्रसवद्दिफलनभूमौकिं॰ मकुर्वतेत्यन्वयः धर्मक्षेत्रपदंप्रारंभेमंगलार्थम् तथान्येपि तत्रश्रीविजयोभूतिरितिमंगलप्रयोगएव १ ॥

रामकंदी टीका

धर्मक्षेत्रेइत्यादि किमकुर्वतसंजयेत्यन्तम् धृतराष्ट्रप्रश्नचोदि तसंजयवाक्यानि दृष्ट्वातुपांडवानीकमित्यादीनित्रश्लोकात्र नादयदित्यन्तानि परस्परवधाध्यवसायसंरब्धसकलकुरुपां डवसैन्यसमागतसुभटचोरसमरसंरंभोद्योगात्तुचकत्वात्कर्म योरत्वप्रतिपादनतात्पर्याणि निगदव्याख्यातानि तथा अथ व्यवस्थितान्दृष्ट्वेत्याद्युपक्रमण्यसंजयोक्तान्यर्जुनवाक्यानिसे नयोरुभयोः सेनयोर्मध्येइत्यादीनि सुबो ध्यानिदूरुपलोपक्रमाणि उभयोः सेनयोर्मध्येइत्यादीनि सुबो यानि ततः संजयोक्तान्येवहृषीकेशवाक्यान्यपिस्फुटार्थान्येव॰

ताश्रिमंदी टी॰

धर्मक्षेत्रेइति धर्मबीजस्योत्पत्तिस्थाने मिलिताः मत्पुत्राःपांडवीयाश्च नादयः युधिष्ठिरादयश्च मत्पुत्राःकपटोपात्तराज्यास्तद्देशप्रभा वाद्यन्यत्रधर्मं मतयो युद्धं विनैवपांडवेभ्योराज्यंकिंखिन्मासम र्पयेयुरित्येवंबोजनार्थम् संजयेतिरागद्वेषादिदोषान्सम्यग्जि तवानसीतिकृत्वानिर्व्याजमेवत्वयाकथनीयमितिसूचनार्थ म् १ ॥

नेत्रसलज्जापप्लुपदित्यादि सीदमानोब्रवीदित्यन्तमर्जुनस्य पितृमातामहादिबन्धुवर्ग दर्शनक्रियात्मकं संजयवाक्यमपि व्यक्तार्थम् ततः प्रस्तुतोपदेशप्रतिबंधतत्त्वाज्ञान समुद्भूतपितृमातामहादिवंधुवधपर्यवसादिसंग्रामकर्मविचिकित्सस्य करुणाविष्टावि वप्रास्यार्जुनस्य धर्ममेव धर्मत्वेन व्यपदिशतो दृष्ट्वेमान्स्वजनानित्यादीनितन्मेक्षेम तरंभवेदित्यंतानि मनुष्यस्वभावसुलभमिथ्याज्ञानप्रतिपादकवाक्यानिगदव्या ख्यातान्येव ततस्त्वेवमुक्त्वेत्यादि संजयवाक्यमपि गतार्थमेव इतितात्पर्यतः प्रथमा ध्यायो व्याख्यातः ततु गौरवभयात्प्रतिपाद्यते एवमयं प्रथमाध्यायोयथोपक्रान्त उ पदेशप्रभगवत्प्रवृत्तिहेत्वर्जुनविषादप्रतिपादनार्थः समाप्तः ॥ ॥ ॥

धृतराष्ट्र उवाचेति॥ तत्र च दक्षिणापुरस्थितो धृतराष्ट्रः पांडवा-
नां जयकारणं बहुविधमाकर्ण्य पुत्रराज्यभ्रंशाद्भीतः समीपस्थं
स्वसारथिं श्रीभगवद्व्यासशक्तिपातोन्मिषद्दिव्यचक्षुषा कुरुक्षे
त्रवृत्तांतं साक्षात्पश्यंतं संजयं पुत्रजयाकांक्षी पृष्टवान् धर्मक्षे
त्र इति हे संजय सम्यग्जयो भूतभविष्यद्वर्तमानकालीनज्ञा-
नविशिष्टतयोत्कर्षो यस्येति संबोधनं कथ्यमाननिर्णयसामर्थ्य-
द्योतकं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मस-
दनमिति जाबालश्रुतेर्विशिष्टप्रभावयुक्ते तदेव धर्मस्याहिंसा-
दीनां स्नानजपोपस्थानादिलक्षणस्य धर्मस्य च युद्धादिलक्ष-
णस्य क्षेत्रेऽभिवृद्धिकारणे कुरुक्षेत्रे समवेताः संगता युद्धाभि-
लाषुका मामका दुर्योधनादयः पांडुपुत्राश्च युधिष्ठिरादयः
किमकुर्वत कौरवास्तु के जिता इति किं धीरपुरुषैर्भीष्मद्रोणा-
दिभिरधिष्ठितमस्मदीयं प्रबलं बलमवलोक्य परेषां भयमा-
विरभूदुताहो स्वित्यक्तहृदयद्धिंसानिमित्ताद्धर्मभयमासीद्येनैते
युद्धादुपारमेरन्निति वा पुत्रपरवशस्य न जीवितजयो भया प्रका-
सिनश्च धृतराष्ट्रस्य प्रश्नाभिप्रायः १॥

सञ्जयउवाच दृष्ट्वातुपांडवानीकं व्यूढंदुर्योधनस्तदा आचार्यमुपसंगम्य राजावचनमब्रवीत् २

भाष्यंनास्ति

आनन्दगिरिकृतटीका

किमस्मदीये प्रबलेबलेप्रतिलम्भ धीरपुरुषैर्भीष्मादिभिरधि
ष्ठिते परेषां भयमाविर्भूतं यद्वापन्नहृदय हिंसानिमित्ताधर्म्म
भयमासीद्येन [illegible]ते युद्धादुपरमेरन्निति एवं पुत्रपरवशस्य पुत्र
स्नेहाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने संजयस्य प्रतिवचनं दृष्ट्
वादि पाण्डवानांभयप्रसंगो नास्तीत्येतच्छब्देनद्योत्यते प्रत्यु
त दुर्योधनस्यैवराज्ञोभयं प्रभूतं प्रादुर्बभूव पाण्डवानांपाण्डु
सुतानां युधिष्ठिरादीनामनीकं सैन्यं धृष्टद्युम्नादिभिरति [illegible]दृढै
र्व्यूहाधिष्ठितं दृष्ट्वा प्रत्यक्षेण प्रतीत्य त्रस्तहृदयो दुर्योधनोरा
जा तदा तस्मिन्संग्रामोद्योगावस्थायामाचार्यं द्रोणनामानमा
त्मनः शिक्षितारं रक्षितारं [illegible] श्लाघयन्नुपसंगम्य तदीयं समी
पं विनयेनप्राप्य भयोद्विग्नहृदयत्वेपि तेजस्वित्वादेवं वचन
मर्थसहितं वाक्यमुक्तवानित्यर्थः २ ॥

स्वामि[illegible]कृतटीका

दृष्ट्वेति तत्र च तत्र मिलितेषु मध्ये राजा दुर्योधनोऽनेकवीरस
मुदाये लब्धदीप्तिर्दुर्विनयो धर्षितं शक्यो दुर्योधनो राजा[illegible]चा
र्यं धनुर्वेदोपदेष्टारं द्रोणमुपसंगम्याधिक्येनाचार्यत्वकृतेन संग
तो भूत्वा द्रोणाचार्यसमीपं गत्वा वचनमनेनतरं वक्ष्यमाणं वाक्य
मब्रवीत् उवाच किं कृत्वा पांडवानीकं पांडवानां युधिष्ठिरादी
नामनीकं सैन्यं व्यूढं चक्रादिव्यूहरचनया व्यवस्थितं संपन्नं
दृष्ट्वावलोक्य दुर्योधनो द्रोणं प्रति यद्वचोऽब्रवीत्तदेव वचनव
भिश्लोकैः संजयो धृतराष्ट्रं प्रति तदेव वचनमाह २ ॥

रामानुजभाष्य आदिश्लोकात्त्रयमर्थम्॥

[illegible]दुर्योधनो [illegible]लितं पांडवानां बलं [illegible]मीयं च ब

५

गी. टी. व.

टीका

ले ॥ अभिनवगुप्त ॥ २ ॥ नास्ति

परमार्थप्रपा

संजयउवाच दृष्ट्वेतिराजादुर्योधनंपांडवानीकंतत्सैन्यंव्यूढंव्यूह रचनयास्थितंदृष्ट्वाआचार्यद्रोणमुपसंगम्यवचनमब्रवीत् २॥

वनमालीटीका ॥

एवंकृपालोकव्यवहाराभ्यामपिहीनतयाऽन्धस्यपुत्रस्नेहा भिनिविष्टस्यधृतराष्ट्रस्यप्रश्नेविदिताभिप्रायस्यसंजयस्यातिधा र्मिकस्यप्रतिवचनमवतारयतिवैशंपायनः तदाराजादुर्योध नःपांडवानामनीकंसैन्यंव्यूढंश्येनमकरादिव्यूहरचनयास्थि ते दृष्ट्वाचार्यद्रोणंचाचार्यमुपसंगम्यसमीपंगत्वेदंवचनमब्रवी त् २॥

ऊहमवैजयन्तीटीका ॥

एवमधर्मरूपनिजपुत्रराज्याभिकांक्षिणः पुत्रानुरागमात्रेण कर्तव्याकर्तव्यविवेकहीनस्यधृतराष्ट्रस्याभिप्रायाभिज्ञस्यवा मरूपापात्रस्यसंजयस्योत्तरंवैशंपायनोऽवतारयति संजय उवाचेति तत्रभगवन्महायानांकुंतीपुत्राणांभीष्मादिमहा योद्धृकादृशा रोहिणीपतेस्तवपुत्राणांजयलेशोपिनास्ति कृ ष्णेच्छयात्पत्रमर्ज्जुनस्यधर्मजन्यभयंतत्कृष्णस्यैवोपदेशादिना पशामितमितिकृत्वाकृष्णाभिमुखेनपांडवानांसर्वत्रैवाज्ञा तोभयंविजयस्तुभवत्पुत्राणांतुकृष्णपराङ्मुखत्वेनभयंपरा जयस्तुभविष्यतीतिवर्णयति दृष्ट्वेति पांडवानांपांडुतनया नामनीकंसैन्यंव्यूढंरचनाभिज्ञैर्द्रुपदपुत्रादिभिः रचनाविशे षैःस्थापितंतन्निश्चयार्थकः दृष्ट्वानिरी[क्ष्य] तदासंग्रामारंभेस मर्थभयाद्विग्नहृदयःस्वबलंदुर्बलंमन्यमानो राजाराजनी तिमात्रपरवनिपुणो नतुधर्मनीतौदुर्योधनोदुष्टबुद्धिकुशी लः नतुधर्मयुद्धेआचार्यंशास्त्रास्त्रविद्यावेत्तारंद्रोणमभिमुख मुपसंगम्यनिकटंप्राप्यवचनंबहूर्थगर्भितंवाक्यमब्रवीद कथयत् १ ॥

मधुसूदनीटी। +एवं कृपालोकव्यवहारनेत्राभ्यामपिहीनतया महतोधस्य पुत्रस्नेहमात्राभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने विदिताभिप्रायस्य संजयस्यातिधार्मिकस्य प्रति

+तत्र पाण्डवानां दृष्टभयसंभावनापि नास्ति प्रत्युत दृष्टभयं तु श्रीमा वचनमेतारयति वैशंपायन
न्नेन स्यात्पन्नं भगवतोपशमितमिति पाण्डवानामुत्कर्षस्तुश
ह्नेन द्योत्यते स्वपुत्रकृतराज्यप्रत्यर्पणशंकया तु मा ग्लासीरि
ति राजानं बोधयितुं दुर्योधनदौष्ट्यमेव प्रथमं वर्णयति दृष्ट्वे
ति पाण्डुसुतानामनीकं सैन्यं व्यूढं व्यूहरचनया धृष्टद्युम्नादिभिः
स्थापितं दृष्ट्वा चाक्षुषज्ञानविषयीकृत्य तदा संग्रामोद्यमका
ले आचार्यं द्रोणनामानं धनुर्विद्यासंप्रदायप्रवर्तयितारमुप
संगम्य स्वयमेव तत्समीपं गत्वा न तु स्वसमीपं तमाहूय एते
न पाण्डवसैन्यदर्शनजनितं भयं सूच्यते भयेन स्वरक्षार्थं तत्
समीपगमनेप्याचार्यगौरवव्याजेन भयसंगोपनं राजनी
तिकुशलत्वादित्याह राजेति आचार्यं दुर्योधनोब्रवीदित्येता
वतैव निर्वाहे वचनपदं संक्षिप्तबह्वर्थत्वादिबहुगुणविशिष्ट
वाक्यविशेषसंक्रमितं तु वचनमात्रमेवाब्रवीन्न तु कंचिदर्थ
मितिवा २॥ **सदानंदीटीका**॥

ममत्वाभिनिविष्टस्य प्रश्नं श्रुत्वा नृपस्य सः उवाच संजयो वा
क्यं दिव्यदृष्ट्या समन्वितः १ पाण्डवानां च निर्दोषं दोषं दुर्यो
धनस्य च पाण्डवोत्कर्षतां चैतद्योत्यतेत्रतशाहृतः २ सैन्यं पा
ण्डुसुतानां तु दृष्ट्वा दुर्योधनो नृपः व्यूढं चक्रतविन्यासविशे
षशास्त्रदर्शितः ३ संग्रामावसरे द्रोणमाचार्यं भीतमानसः
गत्वा तदन्तिके वाक्यमवदद्राजनीतिवित् ४ पाण्डवेषु स्व
शिष्येषु प्रियेषु स्नेहरागतः न करिष्यति संग्राममिति बुद्ध्वा
निधाय च ५॥२॥ **नीलकंठीटीका**

व्यूढं व्यूहरचनया स्थितं आचार्यं द्रोणं राजा दुर्योधनो राजा
ब्रवीदित्येव सिद्धे वचनपदेन संक्षिप्तबह्वर्थत्वादिगुणवत्त्वं
वाक्यस्य सूच्यते २॥

6

आनंदी टीका

व्यूढं युद्धाय यथावत्कृतबलविन्यासेन स्थापितं पांडवसैन्यं दृष्ट्वा
राजा दुर्योधनस्तदाचार्यं द्रोणमुपसंगम्य समीपमागत्य वचन
मब्रवीत् २ ॥

रामकंदी टीका

स्पष्टार्थम् २ ॥ ॥ ॥

राजा दुर्योधनः पांडवानां सैन्यं व्यूढं

ला[illegible]कीटीका

चक्रादिव्यूहरचनया स्थितम् युद्धसमवसरे धनुर्विद्योपदेष्टारं दृष्ट्वा
द्रोणाचार्यं समीपं गत्वा वाक्यं वक्ष्यमाणम् उवाच २ ॥

रणवीरसमिद्धोधिनी ॥

एवं पृष्टः संजयः पुत्रपरवशतयाभिनिविष्टं धृतराष्ट्रं प्रत्युवाचे
दृष्ट्वेति ॥ राजानीतिनिपुणो दुर्योधनः पांडवानामनीकं सैन्यं दृ
ष्टद्युम्नादिभिरतिधृष्टैर्व्यूढं व्यूहः सेनास्थापनारचनाविशेषः
तेन व्यवस्थापितमवलोक्य तदा संग्रामोद्योगावस्थायामाचार्यं
द्रोणाभिधं धनुर्विद्यासंप्रदायप्रवर्तयितारमुपसंगम्य विनये
न तत्समीपं गत्वा वक्ष्यमाणं वाक्यमब्रवीत् ॥ अत्र प्रसंगाद्व्यूह
नां सामान्यलक्षणकथनपुरःसरं तद्भेदलक्षणं कथ्यते तत्र
विशिष्टप्राणप्राणिपंगरचनाविशेषाव्यूहाः ते च सूचीगरुडचक्र
क्रौंचद्वमकरश्येनार्धचंद्रपद्मसर्वतोभद्राख्यानव तत्र संहता
न्योधयेदल्पान्कामं विस्तारयेद्बहून् सूचीमुखमभियमिदमल्या
नां बहुभिः सहेति मार्कंडेयोक्तलक्षणः सूचीमुखव्यूहः चंद्रा
दिकल्पनया सैन्यानां गरुडाकृतिरचना गरुडव्यूहः एवं स्वनाम
सदृशाकृतिकल्पनया सैन्यानामवस्थापनरचनालक्षणास्तत्र

ध्यः समज्ञेयाः अपरे च तिर्यग्वृत्तिस्तु दंडः स्याद्भोगोन्वावृत्तिरेव च
मंडलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः इति कामन्दकीये लक्षणं दं
डभोगमंडलासंहताख्या उपव्यूहभेदा बहुविधाः तत्र सैन्यानां दंडव
द्वृत्तिरवस्थानं दंडः समरस्थाभेदः तथा तेषामन्वावृत्तिरन्योन्यानुग
तावृत्तिर्भोगः पंचभेदः मंडलाकृत्या समवस्थितानां सैन्यानां सर्व
तोवृत्तिः सर्पशरीरवन्मंडलस्त्रिभेदः स्वस्वस्थित्यास्थितानां गजा
जादिसैन्यानां विजातीयैरमिश्रितानां पृथग्वृत्तिरसंहतस्तत्र भेदः
प्रकाराणामानंत्यात्तल्लक्षणं विस्तरभयान्न प्रदर्शितमिति प्रसं
गतोसंक्षिप्य व्यूहप्रकारतल्लक्षणे प्रदर्शिते अधुना प्रसंगात्तत्क
लनापि प्रदर्श्यते यदुक्तमाचार्यपादैः औचित्यात्प्रतिसाध्यभूपति
बलंस्थानेषु तांस्तान्युद्धे यो यो हृणं कलयेत्कनाम नञ्च पुरो व्यूहस्थि
तौ यद्द्विया साध्यं सिध्यति नैवं जातु पि च तत्कोप्याभटानां पुरो देया
स्फुरति निर्भीरु भटानां सेनापतं तत्कृतिः अत्रार्थः भूपः प्रभुरेम
तौ राजास्थानेषु विधेयस्थानेषु तांस्तानधिकारिणो ऽज्ञानलम
तिशयेन तद्योगक्षेमादिपालनावेक्षया औचित्या तत्तद्ध्याभिज्ञता
निरीक्षणपूर्वं अथवा प्राज्ञत्वरूपया बुद्धिरप्रमादोभियुक्तता का
र्येषु व्यसनाभावः स्वामिभक्तिश्च योग्यतेति परिभाषितया ईत्या
प्रतिसाध्यसंस्थानेनास्याप्ययो हृणं भटानामग्रे व्यूहस्थितौ क
लंकलनां कलयेद्विचारयेदिति संबंधः व्यूहः सूचीमुखाद्याः सैन्य
स्थापनारचनाविशेषास्तेषां स्थितौ स्थित्यर्थं यो हृणं भटानामग्र
तः कलां कलयेत् के व्यूहस्य भागे स्थाप्याः के च पश्चादिति अग्रपुर
स्तु पलक्षणं पार्श्वमध्यस्थितेरपीति बोध्यं ननु यो हृणं सम्पत्तौ सत्यां
कोनामेयं कलनायं कामीरु कल्पितान् अर्थजनिकेत्यत आह यद्दि
ति यत्तवत्तु साध्यं साधनीयं धियानयबुद्ध्या सिध्यति तद्भटानां

साहसिकानां कोष्यानजातवपि सिध्यतीति संभव बहुलसंपत्तिरपि
राजा न जातु साहसेन कर्म कुर्यादिति भावः इतिस्थिता याक
लमायामिति कर्तव्यतामाह पुरत इति स्मराणां वक्ष्यमाण
हतीनां ततिः पंक्तिः पुरस्तो देया न भीमवटानां भीरुपंक्तिः पुर
तो देया पश्चादसौ देयेत्यर्थः अयमर्थः स्मराणां पुरुषरत्ना
नीमे सर्वथा रक्ष्या इति पश्चादवस्थितिर्न देया सर्वथाऽस्मदीयं का
ले रक्षा शुभा मये भवेदिति अन्यथा तत्काले तेषां स्मरत्वं पुरुष
रत्नत्वं च न भवेदिति भावः तर्हि का गतिर्भीरूणां तत्र तेषामव
स्थानमपि मास्त्वित्याह अंसेदेति तेषां पुरस्थितवीराणां पश्चा
त्परं केवलमतिघाये न वांसे दात्स्कन्ददर्शनं तस्यां वेलायां कु
तिर्यथा परे स्मरपश्चात्स्थितानां तेषां स्कन्दानीदंते तथा तत्कु
तिः कर्तव्यं तथा वक्ष्यते येन परबलानि बलसंपत्तिं दृष्ट्वा
वहूनां त्यलायंत इत्यर्थः तथा च मार्कंडेयः स्मराः प्रवरवन्तो
देया न देया भीरवः क्वचित् स्मरान्वा पुरवन्तो दत्वा स्कंदमात्रद
र्शनं कर्तव्यं भीरुसंघेन मा तु विद्रवकारकं द्रावयंति पुरस्ता
द्भीरवो विद्रुताः परं प्रोत्सारयंती द्रवणो भीरून्स्मराः पुरः
स्थिता इति २ ॥

रामचंद्रसरस्वतीकृतटीका ॥

दृष्ट्वात्विति तु शब्दः पाण्डवानीके कौरवानीकात्तेजस्विता
लक्षणविशेषद्योतकः अतएवाहोत्तरत्र दुर्योधनो भीष्ममे
वाभिरक्षंत्विति अनीकं सैन्यं व्यूढं व्यूहरचनया स्थितं तेदृ
तिज्ञहतेनाधिष्ठानकाले परामृशति आचार्यं द्रोणाचार्यं
आरहच किंनु उपसंगम्येति वदन् पांडवानीकसंदर्शनजं
निनसाध्य समोहानयति अवचनमब्रवीदितिछेदः अवा
च्यवाक्यश्रवाचेत्यर्थः ज्ञत आचार्यमहाकार्ययोगेपमल्पव
चनमुक्तवान् अतउक्तं राजेति राजानो हियेनीतिमात्रम
वर्णः सात्विकगन्धोज्झिताः बहुविधतर्कशीलास्तेषामु
चितमेतादृशं संभाषणमिति भावः किमवचनेन तदृशीय
ति २ ॥

9

भाषा अनुवाद

तब सञ्जयनेकहा कि राजा पाण्डुपुत्र युधिष्ठिरादिकाेसै
न्यदल व्यूहाकार रचना रचित युद्धके लिये तयार खडादे
खि राजा दुर्योधन द्रोणाचार्यके निकट जायकर वक्ष्यमा
ण यह बात कही इससे यह जनाया कि भय औ शङ्का उ
सको ही पुत्रको भईहै ॥ २ ॥

संजयवाक्य॥ दोहा॥

पांडवसैन्यव्यूहकहुंदुर्योधनतबदेष द्रोणनिकटसोजाय
नृपभाषैंबातविशेष २॥

10

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूं । व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३ ॥

आनंदगिरिकृतटीका ॥

तदेव वचनमुदाहरति पश्येति एतामस्मदभ्यासे महाप्रभावानपि भवन्मुखानपरिगणय्य भयलेशशून्यामवस्थितां चमूमिमां सेनां पाण्डुपुत्रैर्युधिष्ठिरादिभिरानीतां महतीमनेकाक्षौहिणीसहितामक्षोभ्यां पश्येत्याचार्यं दुर्योधनो नियुंक्ते नियोगद्वारा च तस्मिन् परेषामवज्ञां विज्ञापयन् क्रोधातिरेकमुत्पादयितुमुत्सहते परकीयसेनाया विशिष्टाभिधानद्वारा परापरपक्षेऽपि त्वदीयमेव बलमिति सूचयन्नाचार्यस्य तन्निरसनेनोत्कर्षमिति मन्वानः सन्नाह व्यूढामिति राज्ञो द्रुपदस्य पुत्रस्तव शिष्यो धृष्टद्युम्नो लोके ख्यातिमुपगतः स्वयं च शस्त्रास्त्रविद्यासम्पन्नो महामहिमः तेन व्यूहमापाद्याधिष्ठितामिमां चमूं किमिति न पश्यसि किमिति वा [illegible]सीत्यर्थः ३ ॥

स्वामि[illegible]कृतटीका ॥

पश्यैतामिति हे आचार्य पाण्डुपुत्राणां पाण्डवानामेतां महतीं चमूं सेनां सप्ताक्षौहिणीपरिमितां पश्य अवलोकय कथंभूतां तव शिष्येण द्रुपदपुत्रेण धृष्टद्युम्नेन धीमता तव शिष्यत्वेन सेनाव्यूहविन्यासादिबुद्धिमता व्यूढां व्यूहरचनया स्थापितां तव शिष्येणेति तवापि पाण्डवसेनायां कश्चिदनुरागोऽस्तीति कौटिल्यवचनं दुर्योधनस्येति पाण्डुः पाण्डुरोगग्रस्तस्तस्य जारपुत्रा इति साभिप्रायवचनं दुर्योधनस्य ३ ॥

(margin: विन्यासेन; अधिष्ठितां)

रामानुजभाष्यम् ॥ आदिश्लोकात्प्राप्यमर्थम्

भीष्माभिरक्षितमस्मदीयं [illegible] बलस्य पर्याप्तम् [illegible] बलस्य ॥ ३ ॥

अभिनवगुप्तकृतटीका ॥ नास्ति

परमार्थप्रपा ॥

पश्यैतामिति भो आचार्य महतीं पर्याप्तबलां पाण्डुपुत्राणां चमूं सेनां ।

गी.
टी.
प्र.

पश्य न केवलं सैन्यबाहुल्यमुपयुज्यत इत्याह द्रुपदपुत्रेण धृष्टद्युम्ने
न धीमता समन्निवेशं च तत्रेण तत्रापि तव शिष्येण व्यूढां [illegible] व्यूहर
चनया समन्निविष्टाम् ॥

वनमालीटीका ॥

किमब्रवीत्तदाह पश्येति नवभिः हे आचार्य पांडुपुत्राणां महतीं चमूं
पश्य कीदृशीं द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां श्येनादिव्यूहरचनया
र[illegible]चितां कीदृशेन धीमता तव शिष्येण २ ॥

अस्तुमैवैजयन्तीटीका ॥

स्वामिन्नृपैः कृतामवज्ञां ज्ञात्वा तेषां परिक्रोधं जर्वन्नाचार्यो युद्धं
करिष्यतीत्येवं मनसि निधाय पश्यैतामित्यारभ्य तस्य संजनयन्नि
त्यन्तेनाह पश्यैतामिति भो आचार्य पाण्डुपुत्राणां युधिष्ठिरादी
नामेतामतिनिकटवर्तिनीं महतीं बहुभिरक्षौहिणीभिर्विस्तीर्णा
चमूं सेनां त्वं पश्य प्रत्यक्षविषयीकुरु प्रार्थनायां लोट् न तु यथा
सर्वे मूर्धं पश्यन्त्येवाहमपि पश्यामि अतो मम दर्शने स्पर्धा
थिकं किमित्यपेक्षायामाह तव शिष्येण धृष्टद्युम्नेन व्यूढां व्यूहरच
नया स्थापितां तवैव शिष्यस्त्वयैव सहयोद्धुं प्रवृत्तो तस्त्वदन्यः कोपी
दृशो [illegible] शार्दूलवत् नतु शिष्यस्य विद्यां न शृणु मवलोक्याचार्या
प्रत्यानंदो भवेत्तथाहमपीति चेत्तत्राह द्रुपदपुत्रेणेति द्रुपदस्य त्वद्वे
रिणः पुत्रो द्रुपदेन त्वद्वधायैवोत्पादितस्त्वद्वधार्थमुत्पन्नः [illegible] यथे
वेतर्हि मा[illegible]यन्तस्य तु न विद्यमेनं प्रसह्य हन्तेत्याशामीत्यत्राह धी
मता बुद्धिमता यत्त्वां वंचयित्वा त्वत्तो विद्यामग्रहीत्तस्मादमुं [illegible]
न भीमादि सहायं गर्वितं तदग्रे स्थितं कथं वधिष्यसि इति
[illegible] नाम्ना [illegible] मितिज्ञातेत तस्मात् पाण्डवानामित्यनेन न यथार्थं [illegible]
काशीति तैर्वृत्ते तेन प्रवर्त्यापर्यायः कालः सर्वं करोति भवतां न दोष
इत्येवं धर्मेषु तेषु पि शाकुनिभागिनयः क्रूरस्त्वत्पुत्रे दोषबुद्धिकृत
त्तस्य विजयं कथमिच्छसीत्येवं धृतराष्ट्रं कथयत् २ ॥

मधुसूदनीटीका ॥

एतामत्यासन्नत्वेन भवद्भिर्ध्यानमपि महानुभावानगणयमभयमूत्वा

सेहदत पाति [illegible] नाचार्यं [illegible] स्ससना [illegible] कर्दि [illegible] आचार्य [illegible]

संजय [illegible] २

Marginal notes (left): ˆनतदेवराकः; तव त्वा निरपिना यातेतर्थः; हेतुमुपयतात्र; होइविप्[illegible] ५;
तदेव वाक्य विशेषद्वयं वचन सुदाहरति पश्यैतामित्यादिना तस्य संजनयन्हर्षमित्यन्तः प्रा क्तेन ग्रंथेन द्रुपदस्य वधयोग्या ... निप्रयदयताचार्यो युद्धं न करिष्यतीति संभाव्य तस्मिन्न रे रोषामवताविशात्पन्नत्तस्य मिणयति [illegible] तदथामाह

Marginal notes (right): केनिकोसनोह्याति वि[illegible]; आव[illegible]; स्वभ[illegible]; वाने त ४; संजयोक्तथयत्

त्वेन स्थितो पांडुपुत्राणां चमूं महतीमनेकाक्षौहिणीसहितत्वे
न दुर्निवारां पश्यापरोक्षीकुरु प्रार्थनायां लोट् अहं शिष्यत्वा
माचार्यं प्रार्थये इत्याह आचार्येति हष्टाचनतत्केनावज्ञातमस्य ।
मेव ज्ञातमस्य सीतिभावः ननु तदीया व्यूढा साऽदृष्टैवास्माभिः प्रतिक
र्त्तुमशक्यत्वादित्याशंक्य तन्निरसनेन तव दुःकरमेवेत्याह व्यूढां तव
शिष्येणेति शिष्यापेक्षया गुरोराधिक्यं सर्वसिद्धमेव व्यूढां तु धृष्ट
द्युम्नेनेत्यत्र कोऽद्रुपदपुत्रेणेति कथनेन द्रुपदपूर्ववैरसूचनेन क्रोधो
द्दीपनार्थं धीमतेति पदमनुपेक्षणीयत्वसूचनार्थं व्यासंगान्तरनि
राकरणेन त्वरातिशयार्थं पश्येति प्रार्थनं अन्यच्च हे पांडुपुत्राणा
माचार्य न तु ममेति पुत्रस्नेहातिशयात् द्रुपदपुत्रेण तव शिष्येणे
तित्वधार्ष्ट्यमुत्पन्नोपि त्वया ख्यापित इति तवैव मौढ्यमेवममानर्थ ।
कारणमिति सूचयति शत्रोरपि सकाशात् तद्वधोपायधनुर्विद्या
गृहीतेति तस्य धीमत्त्वं अत एव तत्त्वमूढदर्शनेनानंदत्वे वधु भवि
ष्यतीति भ्रांतत्वात् नान्यस्य कस्यचिदपि यं प्रतीयं दर्शनीयेति
त्वमेवैतां पश्येत्याचार्यं प्रति तत्सैन्यं प्रदर्शयन् निगूढं द्वेषं सूचो
तयति एवं च यस्य धर्मक्षेत्रे प्याचार्येपीदृशी दुष्टबुद्धिस्त ।
स्यकान्यतापशंका सर्वाभिशांकित्वेनातिदुष्टाशयत्वादिति भा
वः ॥३॥ सदानंदीटीका ॥

तस्यैतेषु यथावज्ञाक्रोधाधिक्यं भवेद्यथा तथोवाच सपश्येत्यार
भ्य श्लोकैस्त्रिभिस्त्रिकैः १ अन्यासन्नामिमां सेनामनेकाक्षौहिणी
युतां पश्य पांडुसुतानां त्वमाचार्य परमार्थवित् २ त्वच्छिष्येण प्रजा
तेन धृष्टद्युम्नेन धीमता व्यूहनिर्माणतः सम्यक् ख्यापितां वैरिणा
तव ३ अथवा पांडुपुत्राणां गुरोः पक्षपाती रागवान् यतस्तेषु त्वमि
त्येवं हार्दं दुर्योधनस्य च ४ यस्य प्राप्य जरत्क्षेत्रमाचार्येपीदृशी
मतिः किमुवाच्यं भवेत्तस्य दौष्ट्यमाहात्म्यमद्भुतम् ५ ॥३॥

नीलकंठीटीका ॥

द्रुपदपुत्रेणेति पूर्ववैरसूचनेन क्रोधोद्दीपनार्थं विशेषणं ॥३

आनंदी टीका

दुःपदस्थेनेति पूर्ववैरसूचनिकया चार्यस्य क्रोधोत्साहो द्रौपदीना-
र्थम् तव शिष्येणेति यो हि भवच्छिष्यः सो वश्यमत्र तमाश्रूहर
चनो करोति इति प्रतिविधानपरो भवेति प्रोत्साहनार्थः २ ॥

रामकंठी टीका

स्पष्टार्थम् २ ॥ ॥

किं तदित्याह नवभिः श्लोकैः

[illegible] टीका

सेनां समासो हि लीपरिमितां व्यूहरचनया स्थापितां पश्यप केन
धृष्टद्युम्नेन व्यूहविन्यासोदोक्तशलेन तव शिष्येण धीमतेति कौ-
टिल्यवचनेन त्वां हंतुमुद्यतेनेति वा २ ॥

महावीरसमिद्बोधिनी ॥

पश्यैतामिति एतां भवद्विधानामपि महानुभावानां वीराणां
संमुखे वीतभयत्वेन स्थितां पांडुपुत्राणां युधिष्ठिरादीनामथवा
पांडुः पांडुरोगधर्मस्तस्य पुत्राः इति साहूतेनस्वाजारजाताः इति विप-
रीतलक्षणा अथवा पांडुपुत्राणामाचार्येति संबंधः तथा च ते
ष्वेव तवानुरागो न तु मयीति कौटिल्यवचनं दुर्योधनस्य प्रका-
शितं शिष्यत्वादरं त्वाचार्य प्रार्थये अत्याचार्येति इत्युक्तं बोधनं
महतीं समासो हि लीपरिमितां चमूं सेनां पश्यपेति प्रार्थनायां
लोट् इत्थं चतद्रीयावज्ञा स्वयमेव ज्ञास्यते भवतेति भावः
न चैतेषां बलवत्त्वेन प्रतिक्रियाविधानमशक्यमित्याशंक्य तन्नि-
रसनं तव सुकरमेवेत्याह व्यूढामित्यादिना यतो द्रुपदपुत्रेण
पूर्वमेव कृतवैरेण द्रुपदेन तवहत्यार्थमुत्पादितेन धृष्टद्युम्नेनेति

पूर्वं वैरस्मारणेन क्रोधोद्दीपनं न त्वधिक्षेपेणेति त्वदीयमेव बलं प
र्याप्तं त्वपीति तन्निरसनं न त्वप्तकरमिति द्योतितं उभयोः सकाशाद्बहु
शिष्योऽल्पबलः प्रायेण प्रसिद्ध इति अथ च त्वदर्थे त्यक्तेत्यादिनापि
त्वय्येवाख्यापित इति न त्वेवमौद्धत्यं ममानर्थकारणं संहतमिति सा
कूतोक्तिः धीमतेति व्यासंगान्तरनिराकरणेनावेक्षणीयत्वो
क्तिः अथ च प्राज्ञोऽपि सकाशात्तद्वधोपायभूता विद्या गृहीतेति
साभिप्रायोक्तिः व्यूढामिति प्रभातायां तु शर्वर्यां भीष्मः शान्तन
वस्ततः अनेकान्यरसंयाने व्यादिदेश पार्थ भारत गारुडं च महा
व्यूहं चक्रे शान्तनवस्तदा पुत्राणां ते प्रियाकांक्षी भीष्मः शस्त्रास्त्र
कोविदः व्यूढं दृष्ट्वा तु तत्सैन्यं सव्यसाची परंतपः धृष्टद्युम्नेन स
हितः प्रत्यव्यूहत संयुगे अर्धचन्द्रेण व्यूहेन व्यूहं तमतिदारुणं
इति भारतोक्तार्धचन्द्रव्यूहेन व्यवस्थापितामित्यर्थः ३ ॥

रामचंद्रसरस्वतीकृतटीका ॥

पश्यैतामिति यतस्त्वमाचार्यः पाण्डवानामुपदेष्टाऽतस्त्वच्छिष्ये
णद्रुपदपुत्रेणधृष्टद्युम्नेनव्यूढांव्यूहरचनयाधिष्ठितांपांडुपुत्रा
णांसेनांमहतींपश्येति अस्मत्सैन्यं प्रतिचतस्यसंदर्शनजनितानंद
भाजनंनत्वत्तोन्योस्तीत्ययंप्रतीयंप्रदर्शनीयेतिभावः ननुसएव
मच्छिष्यः किंनभवदादय इत्यतआह धीमतेति आचार्याणाम
यंस्वभावोयत्प्राज्ञएवशिष्येषुप्रणयिनोभवंतीतिभावः व्यूढंतद्धृ
ष्टद्युम्नेनेतिविहाय द्रुपदपुत्रेणेतिवदन् नास्यस्वनाम्नाप्रसि
द्धिरितितस्मिन्नहृद्यंव्यनक्ति एवंचयेषांधर्मेतेत्रेपापाचार्ये
ऽपीदृशीदृष्टबुद्धिस्तत्रकानुतापसंभावनेतितात्पर्यं द्रोणेन
सर्वथास्वात्मविजयेयमितिनवैनोदासिन्यमालंबनीयंनापिपांड
वहितंकिंचिदाचरणीयमितिप्रच्छिकाभिसंधिः [किंचकर्तव्या
पेतद्दृक्कंपायेतेहीनबलाःस्युर्नैचैवमित्याशयवानाह ॥ ३

भाषा अनुवाद ॥

सोई [illegible] दुर्योधनकी सब बातें सञ्जय नव श्लोकसे कह
तेहैं कि हे आचार्य देखिये तो यह युधिष्ठिरका सैन्यदल
जिसको आपका शिष्य द्रुपदका पुत्र बुद्धिनिधान धृष्ट
द्युम्नने रचाहै सो महात्मा आपके सामने बडे विस्तारमें
युद्धकरनेको तयार निडर खडाहै ३ ॥

दोहा ॥

सेनापांडुसुतननकीबडीद्रोणअबदेष रचीव्यूहसोंशिष्यतव
धृष्टद्युम्नविशेष ३ ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि यु-
युधानो विराटश्च द्रुपदश्च महारथः ४ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

अन्येऽपि प्रतिपक्षे पराक्रमभाजो बहवः सन्तीत्युपेक्षणीयत्वं
परपक्षस्य विवक्षयन्नाह अत्रेति तस्यां हि प्रतिपक्षभूतायां से-
नायां शूराः स्वयमभीरवः शस्त्रास्त्रकुशला भीमार्जुनाभ्यां स-
र्वसम्प्रतिपन्नवीर्याभ्यां तुल्याः युद्धभूमावुपलभ्यन्ते तेषां यु-
द्धशौण्डीरं विशदीकर्तुं विशिनष्टि महेष्वासा इति इष्वस्य-
न्तेऽस्मिन्निति व्युत्पत्त्या धनुरुच्यते तच्च महदन्यैरप्रधृष्यंत
द्ध्रियते येषां ते राजानस्तथा विवक्ष्यन्ते तानेव परसेनामध्य-
मध्यासीनान् परपक्षानुरागिणो राज्ञो विज्ञापयति युयुधा-
न इत्यादिना सौभद्रो द्रौपदेयाश्चेत्यन्तेन ॥ ४ ॥

स्वामिकृतटीका ॥

अत्रेति अत्रास्यां चम्वा[illegible]मी शूराः शौर्येण क्षात्रधर्मेणोपेता महे-
ष्वासा इषवो बाणा अस्यन्ते यैरिति इष्वासा धनूंषि महान्त इष्वासा
येषां ते महेष्वासाः [illegible] युधि संग्रामे
भीमार्जुनसमाः भीमो भिया भयेन मीयते चकितैरिव वीरान्त-
रैर्विलोक्यत इति भीमः अर्जुनः पशुपतिसंग्रामोपार्जितयशो-
विभूतिभिरर्जुनं पांडुरं संपादितं विश्वं येन सोऽयमर्जुनः तौ भी-
मार्जुनौ अत्रातिप्रसिद्धौ योद्धारौ ताभ्यां तुल्याः समाः शूराः सन्ति ता-
नेव नामभिर्निर्दिशति युयुधानः सात्यकिर्वीरवरैरेव मिश्रीभा-
वेन युद्धाविष्टः यु मिश्रणे इति धातुपाठात् विगतो विपक्षभू-
तो राड्राजा [illegible] यस्य शत्रुसूदनस्य स विराटः द्रुवत् हननवत् संग्रा-
मे निश्चलो पादो यस्य स द्रुपदो महारथः प्रत्येकं महारथत्वं वि-
शेषणम् ॥ ४ ॥

रामानुजभाष्यटीका ॥ आदिश्लोकात्प्राप्यमर्थम्

तदिदं [illegible] भवत ॥

गी॰
टी॰
प्र॰

अभिनवगुप्तकृतटीका ४ ॥ नास्ति

परमार्थप्रपा टीका

अथ तत्रास्थितान्वीरानाह अत्रेति अत्रास्यां चमूं शूराः पराक्रमवन्तो महेष्वासाः महान्त इषवो बाणा अस्य ते तथोक्तास्ते ये सन्ति
नार
तथाविधा से युधि संग्रामे भीमार्जुनसमास्तत्सदृशबलाः सन्ति ॥ ४ ॥

16

वनमाली टीका

इ
इषवो बाणा अस्य ते ये ते महेष्वासा महान्त इष्वासा येषां ते तथा भीमार्जुनौ प्रसिद्धौ योद्धारौ युद्धे तत्समास्तत्तुल्याः शूरा अत्रास्यां सेनायां सन्ति तानाह युयुधान इति सार्द्धाभ्यां युयुधानः सात्यकिः ॥ ४ ॥

अनुभवैजयन्ती टीका ॥

ही
एवमाचार्यस्य कोपोद्दीपनाय परसैन्यस्थितिमुक्त्वेदानीं तस्य भयोत्पादनाय तत्रास्थितान्वीरान्वर्णयंस्तेषामुपेक्षणीयतां निराकरोति अत्र शूर इत्यादिभिस्त्रिभिः श्लोकैः अत्रास्यां परसेनायां महेष्वासाः इषवो बाणा आ समन्तादस्यन्ते क्षिप्यन्ते एभिरिति इष्वासा धनूंषि महान्त इष्वासा येषां ते तथा युधि संग्रामे भीमार्जुनसमौ अर्जुनयोस्तुल्याः शूरास्तन्नभयमविगणय्य समानसहस्रवीरजिगीषया सहवन्तः सन्ति केवलं धृष्टद्युम्न एव शूरोऽस्तीति न मन्तव्यम् तेषां नामानि शृणु युयुधानः सात्यकिः विराटः प्रसिद्धः द्रुपदश्चतवामित्रः एतेषां तु त्रयाणामपि महारथ इति विशेषणम् ४ ॥

अत्र शूरा

^ भीमा

प्य

मधुसूदनी ॥

^ तत्रैकेन द्रुपदपुत्रेण प्रसिद्धेनाधिष्ठितां च मूमेतामस्मदीयो यः कश्चिदपि जेष्यति किमिति त्वमुत्ताम्यसीति अत आह अत्र शूरा इत्यादि त्रिभिः

^ न केवलमत्र धृष्टद्युम्न एव शूरो येनोपेक्षणीयता स्यात् किंतु अस्यां चमूमन्येऽपि बहवः शूराः सन्तीत्यवश्यमेव तज्जये यतनीयमित्यभिप्रायः शूरानेव विशिनष्टि महेष्वासा इति महान्तोऽन्यैरप्रधृष्या इष्वासा धनूंषि येषां ते तथा दूरत एव परसैन्यविद्रावणकुशला इति भावः महाधनुरादिमत्त्वेऽपि युद्धकौशलाभावमाशंक्याह युधि युद्धे भीमार्जुनाभ्यां सर्वसंप्रतिपन्नपराक्रमाभ्यां

समास्तुल्याः तानेवाहयुयुधानइत्यादिना महारथइत्येतेनयु
युधानःसात्यकिः द्रुपदश्चमहारथइत्येकः अथवायुयुधान
विराटद्रुपदानांविशेषणंमहारथइति ४॥

सहानंदी ॥

एतेनधृष्टद्युम्नेन प्रसिद्धेनाश्रितांचमूं अस्मदीयोपियःकश्चि
ज्जेष्यतीतिनतर्कयेत् १ यतोस्यांशत्रुसेनायांशूरामहाधनुर्ध
राः युद्धेभीमार्जुनाभ्यांयेतुल्याःसंग्राममर्दःसहाः २ सात्यक्या
दियोध्येतेभीष्मप्रोक्तामहारथाः ३॥ ४ ॥

नीलकंठी ॥

नदेवबलविद्विष्टवेमदेवप्रद्गुणासते इतिसशैवदेवलनुपास्या
दर्थनेविता ४ महेष्वासामहान्तइष्वासायेषांतेयुयु
धानःसात्यकिः द्रुपदश्चमहारथइत्येकः ४ ॥

17

आनंदी टीका

एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथइतिस्मृतः अमितान्योधयेद्यस्तु सोतिरथइतिस्मृतः रथस्त्वेकेनयोयोद्धा तन्न्यूनोर्धरथः स्मृतः इतिरथातिरथसंख्यायाम् युयुधानः सात्विकिः ४ ॥

रामकंठी टीका ॥

स्पष्टार्थम् ॥ ४ ॥ ॥

+ युद्धे भीमार्जुनाभ्यां तुल्यास्तथा

ना[illegible]की टीका

रथाःसात्यकि द्रुपदः ... एव च महारथाः इति केते इति नामनिर्देशो नाह युयुधानः

अस्यां सेनायां महान्तः परैर्नशीकर्तुमशक्याः सात्यकिः महारथइति प्रत्येकं विशेषणं महारथलक्षणं चोक्तं एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथइतिस्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः रथीत्वेकेन युध्येत् तन्न्यूनोर्धरथो मतइति ४ ॥

रणवीरसमिद्धोधिनी ॥

नकेवलं धृष्टद्युम्न एव परपक्षे थिवल्लोयेनास्माकं मध्येयेनकेनापितस्य हनिरसनीयत्वेन त्वरानवसरो यावतान्येपि शूरा एतस्मादधिकसत्वा अत्र संतीत्याह अत्र शूरा इति अस्यां सेनायां शूरा न केनचिदपि चालनीयाः स्वयमभीरव इति यावत् प्रथमं योजयेद्यज्जाश्शूरान्संग्रामकर्मणीति नीत्या परपक्षेनीतिकुशलत्वप्रतिपादनसाकूता शूरा इति प्रथमं दुर्योधनोक्तिः युयुधानः सात्यकिः महारथइति त्रयाणां विशेषणं तल्लक्षणं च एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथइतिस्मृतइति सौभद्रोभिमन्युः द्रौपदेयाः द्रौपदीपुत्राः

पंच सर्वपवमद्वारथाइति नैकोपिरथोर्धरथोवा मद्वारथइ
त्यतिरथवस्याप्युपलक्षणं तल्लक्षणंच अमितान्योधयेद्यस्तु
संप्रोक्तोतिरथस्तुसः रथीत्वेकेनयोयुद्धेतन्न्यूनोर्धरथःस्म
तइति ४॥

रामचंद्रसरस्वतीकृतटीका

अत्रशूरा इत्यादिभिस्त्रिभिः अस्मांसेनायांयुधियुद्धविषयेशूरा
उत्साहवन्तो येतांस्तेब्रवीमीत्यन्वयेणसंबंधः महेष्वासा इतिह
तएवपरसैन्यविद्रावणकुशला इतिभावः तानेवभीमार्जु
नसमा इत्यादिनामहारथा इत्यंतेनसह मयावर्तत इतिसमो
वासुदेवः भीमस्यज्येष्ठत्वात्प्राधान्यं अर्जुनकृष्णयोस्तु तादा
तनिकरथिसारथिकृते पौर्वापर्यमित्यवधेयं शेषंसुगमंए
वंस्वात्मकार्येद्रोणंहर्षीकृत्यद्रोणसंभावितस्वसाध्यंसपरिह
रन्नाह ॥ ४ ॥

भाषा अनुवाद

और इस सेनाके बीच युद्धकरनेमें भीम अर्ज्जुनके समान ध
नुषधारीमहाबली और औरकितनेयोद्धाहैं तिनकेनामदु
र्योधन द्रोणाचार्यसे कहतेहैं कि युयुधान जो सात्विकी
और राजा विराट् महारथी द्रुपदराजा ४ ॥

दोहा ॥

इहांमहारथधनुषीयुद्धेअर्ज्जुनभीमान ॥ वरणमेद्रुपदविराटऔ
नेसौहियुयुधान ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्
पुरुजित्कुंतिभोजश्च शैव्यश्च नरपुंगवः ५

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

किंच धृष्टकेतुरितिस्पष्टं ५ ॥ ॥ ॥

स्वामिकृतटीका

धृष्टकेतुरिति धृष्टः प्रगल्भः शत्रुवित्रासनः केतुश्चिह्नं ध्वजादिर्यस्य धृष्टानां रणप्रगल्भानां केतुर्विनाशक इति वा धृष्टकेतुश्चेकितानः संग्रामकुशलश्चेकितानो नामैको राजा च काशिराजः काशीब्रह्मतत्वप्रकाशीयस्यां निवसतः सुलभः सा काशी तस्या राजा सः वैरिभिर्विजयी शैव्यः संग्रामविजयार्हः नरपुंगवो नरश्रेष्ठः ॥ ५ ॥

रामानुजभाष्यटीका ॥ आदिश्लोकात्त्रयमर्थम्

तस्य विष[illegible]कभीष्म[illegible]र्थं[illegible]र्थितं ॥

अभिनवगुप्तकृतटीका ५ ॥ नास्ति

परमार्थप्रपा टीका ॥

अथतानेवाह युयुधान इति युयुधानः सात्यकिः विराटस्तथा द्रुपदो द्रौपदीपिता चेकितानो नाम राजा कश्चित् [illegible] नरपुंगवान् रश्रेष्ठः विक्रांतः पराक्रमो युधामन्युनामकः [illegible]उत्तमौजा वीर्यवान् एतावर्जुनस्य रथचक्ररक्षकौ उक्तंच भीष्मपर्वणि दृष्टेना पोर्जुनस्यापि युयुधानो महारथः चक्ररक्षौ च पांचाल्यौ युधामन्यूत्तमौजसौ सौभद्रोभिमन्युः [illegible] द्रौपदेयाः द्रौपद्यां पंचभिर्जाताः पंचपुत्राः प्रतिविंध्यादयः एवंभूताः सर्वे महारथाः उक्तंच एकोदशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोतिरथाभिधः एकस्त्वेकेन योयोद्धा समचार्धरथ उच्यत इति ५ ॥

वनमाली टीका ॥ ५

उत्तमवैजयन्ती टीका

किंच धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवानिति विशेषणं

इति विशेषणं

पुरुजित्कुंतिभोजश्चशैब्यश्चेतित्रयाणांनरपुंगवइतिविशेषणम् ५ ॥

मधुसूदनी

धृष्टकेतुचेकितानकाशिराजानांविशेषणंवीर्यवानिति पुरुजित्कुंतिभोजशैब्यानांविशेषणंनरपुंगवइति ५ ॥

मदानंदी

वीर्यवन्तस्त्रयस्त्वान्ते धृष्टकेतुमुखानृपाः पुरुजित्प्रमुखास्त्वान्ये त्रयोपिनरपुंगवाः ॥५ ॥

नीलकंठी

[illegible] हि कर्मोपास्तिज्ञानकांड[illegible] । धृष्टकेत्वादयःषट् ५

॥

ज्ञानेंदी टीका

स्पष्टार्थम् ५ ॥ ॥

रामकंटी टी॰

स्पष्टार्थम् ५ ॥ ॥

तार्किकी टी॰ ॥

तथा धृष्टकेतुरित्यादिनामत्रयस्य विशेषणम् वीर्यवानिति श्रे
ष्ठः नरपुंगव इति पुरुजिदित्यादिनामत्रयस्य विशेषणम्

५ ॥ ॥

रणवीरसन्निबोधिनी ॥

स्पष्टः ५॥

रामचंद्रसरस्वतीकृतटीका उपक्रमणिका ॥

भाषाअनुवाद

और धृष्टकेतु चेकितान राजा और बलवान काशीराज और पुरुजितराजा कुन्तिभोज और शैब्य येसबराजा नरश्रेष्ट औ रबलवान्‌हैं ५ ॥

दोहा॥

धृष्टकेतुचेकितानपुनकाशीराजबलवान पुरुजितकुंतिभो जइयशैब्यश्रेष्टनरजान ५॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

तेषां सर्वेषामपि महाबलपराक्रमभाक्त्वादनुपेक्षत्वं पुनर्विवक्षति सर्व एवेति ६ ॥

स्वामिकृतटीका

युधामन्युश्चापरो विक्रान्तो वीर्यवानुत्तमौजाः सौभद्रोऽभिमन्युर्द्रौपदेया द्रौपद्याः तनयाः अथवा विक्रान्तो युधामन्युर्नामैकः द्रौपदेयाः द्रौपद्याः पञ्चभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविन्ध्यादयः पञ्च एते सर्वे महारथा एव महायुद्धोत्सवाय आसमन्तात् रथः शास्त्रास्त्रादिसंपन्नो येषां ते महारथादीनां लक्षणं एकोदश सहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथी त्वेकेन यो युध्येत्तन्न्यूनोऽर्धरथो मत इति ६ ॥

रामानुजभाष्य[illegible] मू आदिश्लोकात्त्राय्यमर्थम्

[illegible] । ६ ॥ । । ।

अभिनवगुप्तकृतटीका ॥ ६ ॥ नास्ति

परमार्थप्रपा ॥

पूर्वश्लोकान्तरे टीका ॥ ६

वनमाली ॥

सर्वे महारथा एव नैको रथोऽर्धरथो वा महारथा इत्यतिरथत्वस्याप्युपलक्षणं तल्लक्षणं च एकोदश सहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स हि महारथः स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः इति ॥ ६ ॥

उत्तमवैजयन्तीटीका ॥

॰ यद्वा नेषां गणनेन पाण्डुपुत्राणां च मध्ये पृथक्प्रयोगेति पूर्वोक्तविरोधः यतः पाण्डुपुत्राणामित्यत्र नात्र भेदे
षष्ठी साद्राजकुरुषवत् यद्वा अर्जुनादीनां पृथग्ग्रहणमोऽनुग्रहणेनास्माकं हृदयं कर्कटीफलादव द्विधैव
दीर्यतेऽत्तेन ग्रहणीता । इति दुर्योधनस्याशयः एतत्सहायेनैतेभवतां प्रबलत्वादुपदेशलीधा
प्रेतातिप्रयत्नः कर्तव्य इतिभयं सूचितम् ॰

॰ महारथशब्दोऽतिरथस्याप्युप
लक्षणं न तु सर्वेषां मध्ये मुख्या
न्याण्डवान्कथनेन गणयामीति
वेष्णुत्तु [illegible]
[illegible]
[illegible]

विशेषेणातिशयेन क्रमं पादविक्षेपणं करोतीति विक्रान्तः युधामन्युः उत्तमौजाश्च वीर्यवानित्युभयोर्विशेषणं सौभद्रोऽभिमन्युः द्रौपदेया द्रौपदीसुताः पंच प्रतिविन्ध्यादयः चकारादन्येऽपि घटोत्कचादयः एते सर्वे महारथा एव पाण्डवास्त्वतिरथत्वेनातिप्रसिद्धत्वान्महारथानां मध्ये न गणिताः महारथादीनां लक्षणं च एकोदशसहस्राणि योधयेद्यस्तु धन्विनाम् शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन योद्धा स्यात्तन्न्यूनोऽर्धरथस्तु सः ६ ॥

मधुसूदनी

विक्रान्तो युधामन्युर्वीर्यवांश्चोत्तमौजा इति द्वौ अथवा सर्वाणि विशेषणानि सम्बद्धत्वात् सर्वत्र योजनीयानि सौभद्रोऽभिमन्युः द्रौपदेयाश्च द्रौपदीपुत्राः प्रतिविंध्यादयश्च पंच चकारादन्येऽपि पाण्ड्यराजघटोत्कचप्रभृतयः पंच पाण्डवास्त्वतिप्रसिद्धा एवेति न गणिताः ये गणिताः सप्तदश अन्येऽपि तदीयाः सर्व एव महारथाः नैकोऽपि रथोऽर्धरथो वा महारथ इत्यतिरथस्याप्युपलक्षणं तल्लक्षणं च एकोदशसहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन योयोद्धा तन्न्यूनोऽर्धरथः स्मृत इति ६

॰ सर्वेऽपि महारथा एव

महानंदी ॥

विक्रान्तो युधामन्युरुत्तमौजाश्च वीर्यवान् अभिमन्युस्तथा पंच प्रतिविंध्यादयस्तथा १ एते सप्तदश प्रोक्ताश्च घटोत्कचश्च वा तथा सर्वे महारथा एव नैकोऽप्यर्धरथोऽरथः २ आत्यन्तसुप्रसिद्धाश्च पाण्डवास्ते महारथाः एकोदशसहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः ४ रथस्त्वेकेन योयोद्धा तन्न्यूनोऽर्धरथः स्मृतः ५ ॥ ६

नीलकंठी ॥

युधामन्युरुत्तमौजसौ सौभद्रोऽभिमन्युः पंच द्रौपदेयाः प्रतिविंध्या
दयश्चेत्यष्टौ चकारात् पांड्यघटोत्कचादयश्चातिप्रसिद्धा ग्रा॰
ह्याः सर्वेऽपि महारथा एव तल्लक्षणं तु एकादश सहस्राणि यो॰
धान्योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स वै प्रोक्तो महारथः
अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन योद्धा॰
स्यात्तन्न्यूनोऽर्धरथः स्मृत इति ६ ॥

आनंदी टीका

सौभद्रोभिमन्युः द्रौपदीयाः द्रुपदीपुत्राः प्रतिविन्ध्यादयः पंच १

रामकंठी टी॰

स्पष्टार्थम् १ ॥ ॥

लासिकी ~~[illegible]~~ टीका

तथा युधामन्युः शूर उत्तमौजा बलयुक्तः अभिमन्युः द्रौपदीपुत्राः प्रतिविन्ध्यादयः पंच अन्येपि एते सर्वे महारथा एव १ ॥

रणवीरसंबोधिनी॥

स्पष्टः ६

रामचंद्रसरस्वतीकृतटीका ॥ उपक्रमणिका १ ॥

भाषा अनुवाद ॥

पराक्रमी युधामन्यु नाम राजा और बलवान उत्तमौजा नाम एक राजा और सुभद्राके पुत्र अभिमन्यु औ द्रौपदीके गर्भसे युधिष्ठिरादि पांचजनेसे उत्पन्न प्रतिविन्ध्यादि पांचभाई एसब महारथी वीरहैं महारथीका लक्षण जो अस्त्रशस्त्रमें निपुण हो दश हजार धनुर्धारी योद्धोंके साथ अकेला युद्धकरसके उसीको महारथी कहतेहैं और असंख्ययुद्धोंके साथ युद्धकरनेमेंजो समर्थ उसे अतिरथी शास्त्रमे कहतेहैं और एक योद्धाके साथ जो युद्धकरै सो रथीहै उससेभीकम अर्द्धरथी कहावैहै ९

दोहा॥

युधामन्युविक्रांतअरुउत्तमौजबलवंत द्रौपदेयसौभद्रसमम
हारथीविलसंत ८॥

अस्माकंतुविशिष्टाये तान्निबोधद्विजोत्तम ना
यकाममसैन्यस्य संज्ञार्थंतान्ब्रवीमिते ७ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

यद्येवंपरकीयंबलमतिप्रभूतं प्रतीत्यातिभीतवदभिदधासि
हन्त सान्धिरेव परैरिष्यतामलंविग्रहाग्रहेणेत्याचार्याभिप्राय
माशंक्याब्रवीति अस्माकमिति तुशब्देनानन्तरग्रन्थमपि स्वकी
यंभयंतिरोदधानो धृष्टतामात्मनोद्योतयति येत्वत्सत्यत्वे
व्यवस्थिताः सर्वेभ्यः समुत्कर्षंतुप्राप्तास्तान्मयोच्यमानान्निबोध
निश्चयेनमद्वचनादवधारयेत्यर्थः यद्यपि त्वमेवत्रैवर्णिकेषु
त्रैविद्यवृद्धेषुप्रधानत्वात् प्रतिपत्तुंप्रभवसि तथापि मदीय
सैन्यस्यये नायकास्तानहं ते तुभ्यंसंज्ञार्थमसंख्येषुतेषुमध्येक
तिचिन्नामभिर्गृहीत्वा परिशिष्टानुपलक्षयितुंविज्ञापनंकरो
मिनत्वज्ञातंकिंचित्त्वांज्ञापयामीति मत्वाहद्विजोत्तमेति ७ ॥

स्वामिकृतटीका ॥

अस्माकमिति हेद्विजोत्तमत्वंतु नःये स्माकंमध्येत्तरा श्रेष्ठास्तांश्च वि
शिष्टांस्तानेवसेनावीरेष्वपिश्रेष्ठास्तान्निबोधावधारय मम
सैन्यस्ययेनायकानेतारस्तान् संज्ञार्थंतुभ्यंसंज्ञार्थं सम्यक्ज्ञानार्थं
ब्रवीमिकथयामीत्यर्थः ७ ॥

रामानुजभाष्यटीका ॥ आदिश्लोके गतार्थम्

[illegible] ॥ ७

अभिनवगुप्तटीका ७ नास्ति

परमार्थप्रपा टी० ॥

अथस्वकीयांसेनामाह अस्माकमिति अस्माकंसैन्येयेविशि
ष्टाःविवक्षितास्सन्ति तान्निबोधबुध्यस्व ममसैन्यस्यनायका स्व
नियंतारः ७ ॥ वनमालीटी०

ननुपरसैन्यंदृष्ट्वाभीतेनत्वयास्वसैन्येपिकश्चिद्बलिष्ठोस्तीत्याचार्याशयंबुद्ध्वाह अ
स्माकमितिममसैन्यस्यनायकानेतारः हेद्विजोत्तम तवसंज्ञा

मुनेर्वेषु केषांचिन्नामकथनेन गुणांल्लक्षयितुं तेतुभ्यं ब्रवीमि कथयामि द्विजोत्तमेति संबोधनेनाचार्यमा
ग्रायुः ब्राह्मणत्वात्तत्राभाविकमार्दवात्तद्द्वारेण समुद्भवकारणपादि विदग्धत्वेन मधुरा तद्धायोदा
तान्त्रिय भीष्मानर्जुनादीन्त्रुदितोत्पन्नहर्षांति शय विस्मरणबान्यान्नक्षणव्यापरेत यद्धायरवी
रक्षणिनजन्यभयोदयेन यदि नेयुद्धाद्‌पसति ; स्यान्निदिन्द्व : कर्णशल्य श्रुकृन्यादयः दत्त्रियाः
सन्ति नेयुद्धं करिष्यन्तीन दोषस्तामेणनकापि दिन्तिरस्तीति ॥ ८ ॥

र्थं सम्यकज्ञानार्थं ब्रवीमि त्वं निबोध जानीहि ७ ॥

गी॰ टी॰ प्र॰

ऋहमैवैजयन्ती टी॰ ॥

ननु परबलं मां दर्शयसि त्वं आपि सैन्ये का अस्ति वीरा न वा अस्ति चे
युद्धं जयं नो चेद्धिग्रहाग्रहेत्यत्र्काने संधि कर्त्तव्या शंका ममा
पि बहवः सन्तीत्याह अस्माकमिति हे द्विजोत्तम वर्णत्रया
णां श्रेष्ठ अस्माकं सर्ववीरसमूहानां मध्ये विशिष्टाः श्रेष्ठाः मम
सैन्यस्य नायकाः सेनापतयो ये सन्ति तान्निबोध त्वं जानीहि
संज्ञार्थं नाम बोधार्थं ॥ ७ ॥

मधुसूदनी टी॰

तु शब्देन तत्त्वत्रमपि भयं नास्ति दयानोष्टतामात्मनो द्योत
यति अस्माकं सर्वेषां मध्ये ये विशिष्टाः सर्वेभ्यः समुत्कर्षयुक्ता
स्तान्मयोच्यमानान्निबोध निश्चयेन मद्वचनादवधारयेति भो
वादिकस्य परस्मैपदिनो बुधेरूपं ये च मम सैन्यस्य नायकाः
मुख्यानेतारस्तान्संज्ञार्थं असंख्येषु तेषु मध्ये कतिचिन्नाम भि
गृहीत्वा परिशिष्टानुपलक्षयितुं तेतुभ्यं ब्रवीमि न त्वज्ञातं
किंचिदपि त्वज्ञापयामीति द्विजोत्तमेति विशेषणेनाचार्यस्त
वनं स्वकार्यं तदाभिमुख्येन संपादयति दोषपक्षे द्विजोत्तमे
ति ब्राह्मणत्वान्नाव युद्धाकुशलस्तेन त्वयि विभ्रमेव वाभी
ष्मप्रभृतीनां तत्त्रियप्रवराणां सत्वान्नास्माकं महती क्षतिरि
त्यर्थः संज्ञार्थमिति शिष्याणां पाण्डवाणां च मत्त्वं दृष्ट्वा हर्षे
णव्याकुलमनसस्तवस्वीय वीर विस्मृतिर्माभूत् ॥ ७ ॥

यद्येवं परबलमति
प्रभूतं दृष्ट्वा भीतोसि
हंत तर्हि संधिरेव परै
विधीयतां किं विग्रहाग्र
हेणेत्याचार्याभिप्राय
माशंक्याह ॥ ८ ॥

इति मम यस्
क्ति इति मा

मदानंदी टी॰

दृष्ट्वा त्विति सेनां भीतस्त्वं तर्हि संधिर्विधीयतां इत्याशंका मत्स्वाल
ल्पतरो नाहं वचोन्त्रपः १ तु शब्देनात्मनो भीतिमा छा
दयत्स्रपः द्योतयता त्वमेनाचार्यं गुरो रक्षेश महत्तरे २ मध्ये ऽस्मा
कं मम त्वानां ये विशिष्टा गुणान्विताः तान्मयोच्यमानान्
त्वमद्वाकादवधारय ३ मम सैन्यस्य नेतारो ये च तांस्ते ब्र
वीम्यहं गृहीत्वा नामभिः कांश्चिच्छिष्टांतापयितुं स्फुटं ४

द्विजोत्तमेति शब्देन ब्रह्मणानामदत्ततो संग्रामेहयवयत्पेष
दुष्टभावेन भूपतिः ५ संज्ञार्थमिति शब्देन प्रियशिष्यचमू
नव हृष्ट्वाहर्षवशांमात्स्वीयवीरस्वविस्मृतिः ६ ॥ ७ ॥

नीलकंठी टी० ॥

विशिष्टाः श्रेष्ठाः निबोधबुध्यस्व भौवादिकस्यपरस्मैपदिनो
बुधेरिदंरूपं संज्ञार्थं सम्यक्त्वहेतपिशूराः संतीतिज्ञापनार्थं ।
परेषांबलंहृष्ट्वानवोस्माकंभंगोमाभूदित्यर्थः ७ ॥

आनंदी टीका

एवंप्राधान्येनपांडवानांनायकान्निर्दिश्यस्वानाह असंक्षेपते
अमध्येसंज्ञार्थंकांश्चिद्ब्रवीमि १ ॥

रामकंठी टीका

स्पष्टार्थम् १ ॥

अस्माकं लालि[illegible] टीका

अस्माकंत्विति यानेतराज्ञाणांमध्ये श्रेष्ठाःसन्ति द्विजोत्तम मद्व तान्निबोध
चनादवधारय नेतारःश्रेष्ठाःसम्यग्ज्ञानार्थं ब्रवीमि १ ॥
येचममसैन्यस्यनायका तान्सूनाम्य

रसावीरसमिद्वोधिनी ॥

ननुयदिपरेषांबलमतिप्रभूतंबलंभासते तत्तवातिभीतस्यपरैः
संधिरेवोचितोनपुनर्विग्रहइत्याशयवतइतिद्रोणाभिप्रायमाशंक्याह
अस्माकंत्विति तु शब्दस्तुस्पष्टभयतिरोधानेनधृष्टताव्यंजकः अ
स्मत्पक्षेयेविशिष्टाःसर्वोत्कर्षभाजस्तान्मयाकथ्यमानान्निबोध
निश्चयेनमद्वचनादवधारयेत्यर्थः येचममसैन्यस्यमुख्या
नायकानेतारस्तानहंतुभ्यंसंज्ञार्थं संज्ञास्याच्चेतनानामदक्षा
येष्वार्थसूचनेतिनानार्थकोशादन्येषामनुक्तानांसूचनार्थम
संक्षेपतस्तेषुमध्येकतिचिन्नामभिर्दीत्तापरिशिष्टान्नपलक्ष
यितुंविज्ञापनंकरोमीति द्विजोत्तमेतिसंबोधनं ब्राह्मणानांको
मलाशयतयाहिंसाप्रायत्वात्कर्कशहृदयसंपाद्यंयुद्धंभवता
न्नकरमेवेतिभीष्मादिप्रवीरसत्वेनतयातवोपयोग इतिद्रोणा
भिप्राय व्यंजकं ७॥

रामचंद्रसरस्वतीकृतटी॰

अस्माकमिति चतुर्भिः । यथा पांडवानां विशिष्टा भीमार्जुनवा
सुदेवाः कथिताः सेनापतयश्च युयुधानाद्यसात्यकिप्रमुखा
उक्ताः एवमस्माकमपि धार्तराष्ट्राणां सर्वे ये विशिष्टास्तांस्त
ब्रवीमि ये च मम राज्ञः सेनानायकास्तांस्ते ब्रवीमीति पदमा
वर्तते हृयं योज्य द्रोणमभिमुखीकरोति निबोध द्विजोत्तमेति
नितरां बोधयानीति शास्त्रकौशलेयश्तेन निबोधास्त्वं चते द्विजा
श्रुतेष्वुत्तमनीतिज्ञोसि किं बहुभाषितेनेति भावः निबोधेति वा
तिङंतं परस्मैपदिनो ज्ञेयं संप्रदायात् [illegible] ननु किम[illegible]र्थं मस्मत्सैन्य
स्थाने च मां प्रति ब्रूषे इत्याशंक्याह संज्ञार्थमिति शिष्योहीनत्वेनोहेल
मतस्तत्स्वीयविस्मृतिर्नाहरदिति ममेयमुक्तिरिति भावः ॥७

भाषा अनुवाद

जो प्रबल शत्रु सेनादल देखि डरेसे बोलतेहो तो मेल क्यों
नकरलो लडाईसे क्या फलहै ऐसा द्रोणाचार्यने कहे इस
शंकासे दुर्योधन कहताहै कि मेरे पक्षमे जो नायक कहे
सेनापतिहैं वे सब आपसे छिपे नही तौभी उनके नाम
आपको स्मरन करानेके लिये कहताहै ॥ ७ ॥

दोहा ॥

सूरश्रेष्ठहमरेअवैतिनद्विजाराद्विजनाथ नायकहमरीसे
नकेकहूतनामतोहिसाथ ७॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः । अ
श्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

भाष्यंनास्ति आनन्दगिरिकृतटीका

तानेव स्वसेनानिविष्टान् पुरुषधौरेयानात्मीयभयपरिहारार्थं परिगणयति भवानित्यादिना ॥ ८ ॥

स्वामिकृतटीका ॥

तानेवाह भवानिति द्वाभ्यां भवान् त्वमेव तावत् यस्य नवयुद्धकौशलोपदेशेन भगवान् पशुपतिरप्यर्जुनेन निर्जितः स त्वं द्रोणः भीष्मः सकलक्षत्रक्षयकारिचण्डलीलावतारपरशुरामस्यापि रणे भयंकरत्वात् भीष्मः कर्णः वैरिणां कर्तनात् कर्णः कृपः शत्रुहिंसनशीलः हिंसार्थः समितिं संग्रामं जयतीति समितिंजयः अश्नुते व्याप्नोति अश्नाति वैरिणं भक्षयति वा अश्वत्थवा इवाभियाति च गच्छति येन स्थाम्ना बलेन तत् अश्वत्थामस्य त्ययोतोऽश्वशब्दः तत्ताहशः सकललोकोपसंहारदक्षस्सदाशि यगीपतेर्लीलावतार इत्यश्वत्थामा यस्मात् यस्य असमानवीरसंग्रामोपार्जितकीर्तिमंजरीवर्णनायां प्रस्पर्धिनः पार्थिवा विगतकर्णा बधिरा इवाह्रिजंतो भवंति इति विकर्णः पार्वतीपतिदत्तवरः सोमदत्तस्य पुत्रः सौमदत्तिः भूरिश्रवास्तथैव च तथा भवान् भीष्मश्च त्रैलोक्यपराजयक्षमौ तथैव तेऽपीत्यर्थः ॥ ८ ॥

रामानुजभाष्य ॥ आदिश्लोकेनगतार्थम्

ततस्तेषामाकर्ण्य सर्वेश्वरः ॥ ८

अभिनवगुप्तटीका ॥ ८ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

तानाह भवानिति भवान् द्रोणः भीष्मः कर्णः कृपः कृपाचार्यः समितिं संग्रामं जयतीति तथा सौमदत्तिः सोमदत्तस्य पुत्रो भूरिश्रवाः ॥ ८ ॥ वनमाली टी॰

तानाह द्वाभ्यां समितिंजय इति कृपविशेषणमव्यवहितत्वात्

गी. टी. प्र.

समितौ युद्धे जयशीलः सोमदत्तिः पुत्रो भूरिश्रवाः ८ ॥

ज्ञानमवैजयन्ती टी.

कतिचित्त्वामभिलानेव विशिष्टानाह भवानिति द्वाभ्यां भवान् द्रोणस्तथा भीष्मस्तथा कर्णस्तथा कृपः समितिंजयेति चतुर्णां द्रोणादीनां विशेषणम् समितिं संग्रामं जयतीति सतथा अश्वत्थामा द्रोणपुत्रः विकर्णो मद्भ्राता उ मया सह शिवः सोमस्तेन दत्तः सोमदत्तस्तस्य पुत्रः सोमदत्तिः भूरिश्रवाः ८ ॥

33

मधुसूदनी टी.

"तत्र विशिष्टानाह यति

"भगवान्द्रोणः भीष्मः कर्णः कृपश्च समितिंजय इति कृपविशेषणं कर्णादनंतरं गण्यमानत्वेन तस्य कोपमाशंक्य तन्निरासार्थं एते चत्वारः सर्वतो विशिष्टाः नायकान्गणयति अश्वत्थामा द्रोणपुत्रः भीष्मापीत्यया चार्यस्य प्रथमगणनवद्विकर्णगणनयातत्पुत्रस्य प्रथमगणनमाचार्यपरितोषार्थं विकर्णः स्वभ्राता कनीयान् सोमदत्तिः सोमदत्तस्य पुत्रः "द् श्रेष्ठत्वाद्भूरिश्रवाः जयद्रथः सिंधुराजः तथैव चेति क्वचित्पाठः ८ ॥

नि ना

सदानंदी टीका ॥

के ते इत्यपेक्षायामाह चत्वार आदरात् भवत्प्रभृतयः शूराः सर्वे संग्रामकोविदाः अश्वत्थामादयो ये च ते पि शूरा महत्तमाः १॥ ८ ॥

नीलकंठी ॥

विकर्णः स्वभ्राता सौमदत्तिर्भूरिश्रवाः जयद्रथपदस्थाने तथैव चेति क्वचित्पाठः ॥ ८ ॥

आनंदी टीका

एतेसर्वेमहारथाएव ॥ ८ ॥

रामकंठी टी०

स्पष्टार्थम् ८ ॥ ॥

लासिकी [illegible] टीका तथाभीष्मपितामहः कर्णः कृपाचार्यस्य सवर्तिं विधः साम तिजयः

आनेवाह आदौतावद्भवांस्त्वमेवश्रेष्ठः आचार्यः युद्धेजयनशीलः वि० तथास्वत्थामा
...मदत्ति कर्णोभूरिश्रवाः अन्येपिसन्तिइत्यर्थः ८ ॥ अश्वत्थामदुपक्ष इतिपादान्तरम्

रणवीरसमिद्धोधिनी ॥

तामेवपरिगणयति भवानितिद्वाभ्यां अस्यतत्वद्वाद्वयोपदे
शेनाणिमाद्यष्टसिद्धियुक्तोपिशिवोर्जुनेनजितः सभवान्द्रोण
अन्यस्य प्रथमं परिगणनं पवित्रोपार्थं स्वगुरोः परशुरामस्यापि
रणेतिघातयितयाभयंकरवाद्भीष्मोदेवव्रतः पाण्डूनांकर्णनाक
र्णः कृणोतीतिकृन् हिंसायामितिधातोरूपं कृप इति कृपोवि
युद्धता इतिविशिष्टपरिगणनं अश्वत्थातिभवत्यतिपाण्डूनां रुधिर
मितिअश्वत्थ तादृशःस्थामबलमस्येत्यश्वत्थामाद्रोणपुत्रः
यंविलोक्यरिपवोबधिरीभवंतिसविकर्णः सोमः पार्वतीपति
स्तेनदत्तवरः सोमदत्तस्तस्यापत्यंसौमदत्तिर्भूरिश्रवाः इति
नेरपरिगणनं ॥ ८ ॥

रामचंद्रसरस्वतीकृतटीका

ननु किमर्थं मम सैन्यस्थाने च नामग्रहणं यस्त्वाशंक्याह
तेशार्थमिति शिष्योदीतालोबेलमनसलेखी पविलत्तेना
हृदितिमममभियंत्रुमितिभावः भवान्भीष्मश्च कर्णश्चे
तिविशिष्टकथनं ॥ ८ शेषं सैन्यनायककथनं स्वसैन्यबाहुल्यं
तस्य ह्यस्मद्भक्तिरुद्योगः सर्वशास्त्रप्रवीणता युद्धकौशलं चास्त्येवेत्य
नेन दर्शितम् ८

भाषा अनुवाद ॥

सोई ये दो श्लोकसे कहतेहै संग्राम विजयी आप और भी
ष्मपितामह कर्ण कृपाचार्य अश्वत्थामा विकर्ण और सौ
मदत्तका पुत्र भूरिश्रवा और जयद्रथ ये सब वीर अपनी
औरहै ८ ॥

दोहा ॥

द्रोणतुमैंभीष्मकर्णकृपरिपुनाशनजोय अश्वत्थामविक
र्णपुनसौमदत्तितथासोय ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ना-
नाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

द्रोणादिपरिगणनस्य परिशिष्टपरिसंख्यार्थत्वं व्यावर्तयति
अन्ये चेति सर्वेऽपि भवन्तमारभ्य मदीयपृतनायां प्रविष्टाः स्व-
जीवितादपि मह्यं स्पृहयन्तीत्याह मदर्थ इति यत्तेषां शूर-
त्वमुक्तं तदिदानीं विशदयति नानेति नानाविधान्यनेकप्र-
काराणि शस्त्राण्यायुधानि प्रहरणानि प्रहरणसाधनानि
यां येषां ते तथा बहुविधायुद्धसम्पन्नावपि तत्प्रयोगनैपुण्याभा-
वे तैर्ह्वफल्पमिति चेन्नेत्याह सर्व इति ॥ ९ ॥

स्वामिकृतटीका ॥

अन्ये चेति अन्ये च अपरे सहायत्वेन समाहूता भगदत्तशल्यप्रभृ-
तयः बहवः शूरा मदर्थे मत्प्रयोजनार्थं मम विजयसाधनार्थं
वा त्यक्तजीविताः जीवितं त्यक्तुमध्यवसिता इत्यर्थः नानाविधा-
नि अनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदा
निपुणा इत्यर्थः ९ ॥

रामानुजभाष्यं ॥ आदिश्लोकेगतार्थम्

पार्थसारथी च पांडुतनयस्त्रैलोक्यविजयोपकरणभूते । ९

अभिनवगुप्तकृतटी० ९ ॥ नास्ति

परमार्थप्रपा टी० ॥

अन्ये चेति अन्ये मत्तोऽतिरिक्ता बहवः शूराः सन्ति मदर्थे मत्प्र-
योजनाय त्यक्ता जीविताः संकल्पितप्राणाः नानाशस्त्रैः प्रह-
रन्ति युध्यन्ति ते तथा अत एव विशारदाः ॥ ९

वनमाली० टी० ॥

अन्ये शल्यकृतवर्मादयः मदर्थे त्यक्तं जीवितं यैस्ते भवदाद-
यः नानाविधानि शस्त्राणि प्रहरणानि युद्धसाधनानि येषां
ते युद्धविशारदाः कुशलाः ९ ॥

ॐ उत्तमवैजयन्ती टी॰

किं चैतावन्त एव नायका न सन्तीत्याह अन्येपि जयद्रथकृतवर्मशल्यादयो मदर्थे त्यक्तजीविता मत्प्रयोजनाय त्यक्ताः प्राणा यैस्ते मयि स्नेहाधिक्येन स्वं स्वं मरणमप्यङ्गीकृतवन्त इत्यर्थः नानाशस्त्रप्रहरणा नानानेकविधानि शस्त्राणि खड्गादीनि प्रहरणानि येषां ते तथा युद्धविशारदाः युद्धकर्मणि पटुतराः तादृशा बहवोऽन्येके सर्वे शूरास्सन्ति [illegible] ॥ ॥

न केवलमेते एव [illegible] सर्वं वक्ष्यन्ति एवेन तथा विना किं स्यादित्यभिप्रायः [illegible] ॥
"किमेतावंत एव नायका" नेत्याह ॥

मधुसूदनी

अन्ये च शल्यकृतवर्मप्रभृतयः मदर्थे मत्प्रयोजनाय जीवितमपि त्यक्तुमध्यवसिता इत्यर्थेन त्यक्तजीविता इत्यनेन स्वस्मिन्ननुरागातिशयस्तेषां कथ्यते एवं स्वसैन्यबाहुल्यं तस्य स्वस्मिन्नु भक्तिं शौर्यं युद्धोद्योगं युद्धकौशलं च दर्शितं शूरा इत्यादिविशेषणैः ९ ॥

सदानंदी

अन्ये शल्यादयोनेके शूरा मन्त्रीति साधकाः मत्प्रयोजनसिद्ध्यर्थे जीवितं त्यक्तुमुद्यताः १ एवं स्वसैन्यबाहुल्यं स्वस्मिन्नुपरतिः परा युद्धोद्योगो रणोदार्यं चतुर्भिर्दर्शितं पदैः ॥ १ ॥ ९

नीलकंठी ॥

अन्ये शल्यकृतवर्मप्रभृतयः शस्त्राणि विदारकाणि खड्गादीनि प्रहरणानि केवलं प्रहारार्थानि गदादीनि नानाविधानि येषां ते नानाशस्त्रप्रहरणाः ९ ॥

आनंदी टीका

अन्ये शल्यकृतवर्मादयः त्यक्तेत्यत्रादिकर्मक्तः मत्प्रयोजने
जीवितमपि त्यक्तुमुद्यता इत्यर्थः ९ ॥

रामकंठी टीका ॥

स्पष्टार्थम् ९ ॥

लासिकी [illegible] टी. ॥

अन्ये च भगदत्तशल्यकृतवर्मादयो बहवः शूराः सन्ति मन्नि
मित्तं जीवितमपि त्यक्तुं मंत्र्यवस्थिताः कुशलाः ९ ॥ नानाशस्त्रप्रहरणाः
मि

रणवीररससिद्धोयिनी ॥

अथ परिशिष्टान्यविगणयति अन्ये चेति न केवलमेतावंत एवा
न्ये जयद्रथकृतवर्मवाह्लीकप्रभृतयोऽप्येवंविधा इति भावः शूराः
हस्वपांशुवनभ्रुकोपनकलिप्रीताश्च जिह्मेक्षणा ये केचित्कुकना
सिकाश्च सततं हृष्टास्तथा कामिनः ये कासारशिरोधयो हरिणकृ
त्तमस्तका वारणाह्वाः प्रोत्फालिकपंककर्णकलिताः शूरा न ते
लोहिताः इत्याचार्यपादैर्निरूपितं हस्वायाकृत्यनुमापितत्वप्रजात्यु
चितप्रोत्साहकारणीभूतांतरसत्त्वविशिष्टाः तथा च माकींडेयः
प्रांशवः शुकनासाश्च ये च जिह्मेक्षणा नराः संहतभ्रूयुगाश्चैव को
पनाः कलहप्रियाः नित्यं हृष्टाश्च हस्वाश्च शूरा ज्ञेयाश्च कामिन इति
वनभुवः संहतभ्रूयुगाः कोपनाः सदैव ललाटं भ्रुकुटीवलयः क
लिप्रीताः कलहप्रियाः सततं हृष्टाः संपन्नो विपन्नो वा प्रसन्नमन
सः कामिनो रणवार्ताभिलाषिणः कासारशिरोधयो महिषग्री
वाः हरिणकृत्तमस्तकाः सिंहगंडवक्त्रसदृशा वक्त्राः वारणा

त्वाद्दक्षिनेत्राः प्रोक्तेनालिकेनललाटेनपांऊसदृष्टाकर्णाभ्यांच
कलिताऽपलक्षिताः रक्तनखाः तद्रमेसूत्राईदप्रोनाक्रुतिमात्रेणं
नरसत्वाऽतिजेयाऽतिलक्षणाज्ञोकार्यः प्रोक्तंपर्यंनिगदव्याख्याते
९ ॥

रामचंद्रसरस्वतीकृतटीका ॥ स

श्रेष्ठैतेन्द्रनायककथंनेस्वसैन्यबाकुलं सहासिन्याकि
युयोगेनस्वर्वशास्त्रप्रवीणतोयुद्धकौशलंन [illegible] नैवत्यने
नदर्शितम ९ ॥

भाषा अनुवाद

अब कहते है कि और औरभी धीर वीर शूर जो मेरे अर्थ
प्राण परित्याग करनेको निश्चय करि रखेहै और नाना
प्रकारके शस्त्र चलानेवाले युद्धविद्यामें विशारदकहे अ
ति निपुणहे सब लोगभी इधरहैं ९ ॥

दोहा

औरबहुतजोसूरहैंतजैंप्राणममहेत जानेशास्त्रप्रहारबहु
नानायुद्धसचेत ९॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं
त्विदमेतेषां बलं भीमाभिरक्षितं १० ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

राजा पुनरपि स्वकीयभयाभावे हेत्वन्तरमाचार्यं प्रत्यावेदयति
अपर्याप्तमिति अस्माकं त्विदमेकादशसंख्याकाक्षौहिणी
परिगणितमपरिमितं बलं भीष्मेण च प्रथितमहामहिम्ना सू
क्ष्मबुद्धिना सर्वतो रक्षितं पर्याप्तं परेषां परिभवे समर्थं एतेषां
पुनस्तदल्पं सप्तसंख्याकाक्षौहिणीपरिमितं बलं भीमेन चञ्च
लबुद्धिना कुशलताविकलेन परिपालितमपर्याप्तमस्मा
कमभिभवितुमसमर्थमित्यर्थः अथवा तदिदमस्माकं बलं
भीष्माधिष्ठितमपर्याप्तमपरिमितमप्रगल्भमतोऽप्येतेषां पा
ण्डवानां बलं भीमेनाभिरक्षितं पर्याप्तं परिमितं सोढुं शक्य
मित्यर्थः अथवा तत्पाण्डवानां बलमपर्याप्तं नालमस्मा-
कमस्मभ्यं भीष्माभिरक्षितं भीष्मोऽभिरक्षितोऽस्मै परबलनि
हत्यर्थमिति तदेव तथोच्यते इदं पुनरस्मदीयं बलमेतेषां पा
ण्डवानां पर्याप्तं परिभवे समर्थं भीमाभिरक्षितं भीमो दुर्बल
हृदयो यस्मादस्मै परबलनिहत्यर्थमभिरक्षितः तस्मादस्मा
कं न किंचिदपि भयकारणमस्तीत्यर्थः १० ॥

स्वामिकृतटीका ॥

ततः किमित्यत आह अपर्याप्तमिति तत्तथाभूतैर्वीरैर्युक्तम
पि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यमपर्याप्तं तैः सह
योद्धुमसमर्थं भाति इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षि
तं सत्पर्याप्तं समर्थं भाति तथा सैन्यद्वयपरिकलनस्य प्रयोज
मे
नमाह तत्पाण्डवानां बलं सैन्यं भीष्मेण सेनापतिनाभिरक्षित
मस्माकं बलं त्वपर्याप्तमपरिपूर्णं संख्यया सामर्थ्येन च एवं
त्वस्माकं बलं पुनरेतेषां पाण्डवानां बलं भीमाभिरक्षितं प्रतिप-
र्याप्तं भीमस्यैकपक्षपातित्वादेतेषां बलं समर्थं भाति भीष्मस्या
भयपक्षपातित्वादस्माकं बलमसमर्थं भातीति दुर्योधनस्या

गी. अध्याय: १ ॥ रामानुजभाष्यम् ॥ अपर्याप्तमित्यादि

टी. महतिस्यंदने स्थितौ त्रैलोक्यं वशयंतौ ॥ १ ॥

प्र. किं तावता भवति तत्राह ॥ अभिनवगुप्ताचार्यकृतटीका ॥ तावदस्तु अनन्तमित्याह

अपर्याप्तमिति भीमसेनाभिरक्षितं पांडवीयं बलमस्माकं अपर्याप्तं जेतुमशक्यं अथवा अपर्याप्तं कियत्तदस्मद्बलमित्यर्थः इदं तु भीष्माभिरक्षितं बलमस्माकं संबंधि एतेषां पांडवानां पर्याप्तं जेतुं शक्यं यदिवा पर्याप्तं वक्तुं न समर्थं जयमेतेषामिति १ ॥

न्या परमार्थप्रपा टी. ॥

अथ सैन्यद्वयोपमाकारणमाह अपर्याप्तमिति तत्तद्विष्टमस्माकं बलं सैन्यं भीष्माभिरक्षितमपि पर्याप्तं संपूर्णं तैः सह योद्धुमसमर्थं तथा एतेषां पांडवानां बलं सैन्यं भीमाभिरक्षितं सत्पर्याप्तं संपूर्णं योद्धुं समर्थमस्ति ॥

पर्याप्तं वनमाली टी.

ततः किमत आह अपर्याप्तमिति तदस्माकमपर्याप्तं पांडवानां विजये असमर्थं भाति यद्यपि नोदासीनेन भीष्मेणाभिरक्षितं एतेषां पांडवानां तु बलमस्मद्विजये पर्याप्तं समर्थं भाति यतो न्यूनातिनिविष्टेन भीमेन रक्षितं १ ॥

ऊनमवैजयन्ती टी. ॥

एवमाचार्यवचनमुक्त्वेदानीं पितामहे कटाक्षं कुर्वन्नाचार्यं प्रत्याह अपर्याप्तमिति द्वाभ्यां भीष्माभिरक्षितं भीष्मेन सेनापतिना अभितः सर्वतो रक्षितमस्माकं सर्वेषां बलं सैन्यं अपर्याप्तमसमर्थं मन्ये यतो भीष्मस्य मतं तेषु पांडवेषु विवक्षितं स्नेह इति भाव इत्युक्तमेतेषां बलं परेषां सैन्यं पर्याप्तं समर्थं यस्माद्भीमेनाभिरक्षितं भीमस्य स्वस्मिन्नेव अनुरागातिरेकेन स्वबलपालनायैवोद्यतत्वात् १ ॥

मधुसूदनी ॥

अपर्याप्तमनंतमेकादशाक्षौहिणीपरिमितं कृपकर्णादिमहारथैर्भीष्मेण च प्रथितमहिम्ना सूक्ष्मबुद्धिनाभितः सर्वतो रक्षितं तथापि शस्त्रास्त्रकुशलवीराधिष्ठितमस्माकं बलं एतेषां पां

राजा पुनरपि सैन्यद्वयसाम्यमापांकास्वसैन्याधिकामावेदयति

डवानांबलंतत्पर्याप्तंपरिमितंसप्ताक्षौहिणीमात्रात्मकत्वा
न्नूनंभीमेनचातिचपलबुद्धिनारक्षितं तस्मादस्माकमेवा
विजयोभविष्यतीत्यभिप्रायः अथवातत्पांडवानांबलमप
र्याप्तंनालमस्माकमस्मभ्यंकीदृशंतत् भीष्माभिरक्षितोऽस्मा
भिर्यस्मैयन्निहृत्यर्थमित्यर्थः तत्पांडवबलंभीष्माभिरक्षि
तं इदंपुनरस्मदीयंबलमेतेषांपांडवानांपर्याप्तंपरिभवेस
मर्थंभीमोतितुच्छबलहृदयोभिरक्षितोयस्मै तदस्माकंबलंभी
माभिरक्षितं यस्माद्भीमोत्ययोग्यएवैतन्निहृत्यर्थं तैरक्षित
त्वस्माकंनकिंचिदपिभयकारणमस्तीत्यभिप्रायः १० ॥

सदानंदी टी० ॥

स्वसैन्याधिक्यमेवाहराजादुर्योधनोऽधुना अनंतसैन्यमस्मा
कंसंख्ययासूक्ष्मतया १ सर्वतोरक्षितंयस्माद्भीष्मेणोदारबुद्धि
ना पांडवानांबलंस्वल्पयत्सप्ताक्षौहिणीयुतं २ रक्षितंसर्वतो
यस्माद्भीमेनात्यल्पबुद्धिना यद्वापांडवसैन्यंतन्निवर्त्यसूक्ष्म
बुद्धिना ३ अस्मदीयंतुतत्सैन्यंनिवर्त्यचलबुद्धिना असमर्थ
मिदंतेषांबलमस्मत्पराभवे ४ समर्थंतुतदस्माकंबलमेत
त्पराभवे इतिवान्यत्समानंतत्सर्वमत्रापियोजितं ५ निश्च
येनततोऽस्माकंजयएवभविष्यति ६ १० ॥

नीलकंठी टी० ॥

पर्याप्तंपरितआप्तंपरिवेष्टितं पांडवसैन्यंहिसप्ताक्षौहिणीमि
तत्वादल्पंबहुनैकादशाक्षौहिणीमितेनास्मत्सैन्येनवेष्टयि
तुंशक्यंनतुतदीयेनास्मदीयमित्यर्थः एवंचपर्याप्तमित्य
स्यपारणीयमित्यर्थः १० ॥

आनंदी टीका

एवमुभयोः सेनयोः नायकान्निर्दिश्य सारासारतां निरूपयति
भीष्मेण सर्वथा द्युम्नाभ्यस्तेन रक्षितमस्माकं बलं तत्तस्मात्का
रणादपर्याप्तं परैर्वारयितुमशक्यम् तद्दुनः भीमेन क्रोधने
नाल्पेन भिज्ञेन रक्षितमेतेषां पांडवानां बलं पर्याप्तं वारयितुं श
क्यम् तथा च कोशः पर्याप्तिः स्यात्परित्राणहस्तवारणमित्य
पीति १० ॥

रामकंठी टीका

स्पष्टार्थम् १० ॥

लासिकी [illegible] टीका

अस्माकं बलं अलं भावाविषयं अभूतं एकादशाक्षौहिणीबहुलत्वात् भी
ष्मेण कुरुवृद्धेन नीतिकुशलेन सर्वतो रक्षितं तु पांडवानां बलं
अलं भवगोचरं परिमितं च भवति सप्ताक्षौहिणीपरिमितत्वा
त् [illegible] भीमेन नीत्यनभिज्ञेन यद्धविषयहनिना दिनस्य
अत्र हृत्वनायायमर्थोप्युपलभ्यते एतेषां पांडवानां बलं भीमा
भिरक्षितं अस्माकं बलं भीष्माभिरक्षितं अत्र भीष्मस्योभयपक्ष
पातित्वात्स्वार्थे बलं पांडुसेनाया अतस्तेषामेव बलं पर्याप्तं विज
यीति कटाक्षः १० ॥

रणवीरसमिद्धोधिनी ॥

पुनरपि स्वेयभयाभावे हेत्वंतरं स्वसैन्याधिक्यं वा वाचार्यं प्रत्यावेदय
ति अपर्याप्तमिति तत्तादृशा वीरपुरुषाधिष्ठितं भीष्मेण सर्वत्र प्र
सिद्धमहामहिमवता भितो रक्षितमस्माकं बलमपर्याप्तमेकाद
शाक्षौहिणीपरिमितत्वाद्बहु एतेषां विदमतिचपलप्राय पुरु
षबलं भीमेन केवलमात्मकक्षिं भवितया युद्धाकुशलेन पालितं

पर्याप्तं सप्ताक्षौहिणीपरिमितत्वादल्पमिति महदंतरमस्माकमे
तेषां च बलस्येति विजयोस्माकमेवेति यद्वा अस्माकं खल्विदमे
कादशाक्षौहिणीपरिमाणं बलं पर्याप्तं द्विगुणत्वेन समर्थं यतो·
भीष्मेणास्त्रगुरोरपि भार्गवस्य युद्धसाक्षात्प्रमनादत्युक्तत्वाच्चयम
तयातदृढनिश्चयेनान्वर्थाभिधानेन देवव्रतेन पालितं एतेषां
पुनस्तत्सप्ताक्षौहिणीपरिक्षितं बलमपर्याप्तं परपराभवे, सम·
र्थम् यतो भीमेन भियं मिनोत्यवमिनोति परेभ्यः सकाशाद्भीम
इति व्युत्पत्ते रतिभीरुस्वभावेन भीमसेनेन पालितमिति नाहमेते
भ्यो बिभेमीति भावः यद्वा तदिदमस्माकं बलमपर्याप्तं जेतुमश
क्यं यतो भीष्माभिरक्षितं एतेषां पुनर्बलं पर्याप्तं परिमितत्वात्सो·
ढुं शक्यमिति एवं स्वसैन्याधिक्यस्वीयभयाभावप्रतिपादनाभि
प्रायेणाप्युक्तापि दुर्योधनेनोक्तिर्हृषीकेशानुगृहीतपांडवसै
न्योत्कर्षस्वीयभययोः तैरेव पदैः स्फुटं प्रतिपत्तेर्विपरीतासंह
ता यथा तदस्माकं बलमपर्याप्तं शत्रुपराभवेऽसमर्थं यतो भीष्मे
णोभयपक्षपातिनाभितः समत्वबाह्यहृत्यैव रक्षितं न तु स्वांतर
हृत्या पांडवानां धर्मशीलतया तैरेव स्नेहस्योचितत्वात् एतेषां पु
नरिदं बलं पर्याप्तमस्मज्जये समर्थम् यतो भीमेनैकपक्षावलंबि
नाभितः सर्वतो रक्षितमिति एतदानुगुण्येनैव भीष्ममेवाभि
रक्षंतित्युत्तरोक्तिस्तथैव संगच्छते इति १०॥

रामचंद्रसरस्वतीकृतटीका । श्री

यस्मादस्माकंबलंभीष्मरक्षितमनंतंपांडवबलंतुबलवीर्यसाभीमे
नरक्षितंस्वल्पंतस्मात्काकथातद्विजयायेत्यपर्याप्तमित्यनेनो
क्तं।एवंभाषमाणेदुर्योधनेद्रोणऽपेक्षांकृतवान्तत्किंचिदुक्त
वानितिदर्शयन्संजयोदुर्योधनोत्कर्षसैनिकादेशंकथयति १

भाषा अनुवाद

इसके अनन्तर दुर्योधनने जो कहा सोई धृतराष्ट्रसे संजय क
हतेहैं कि ऐसे ऐसे शूरवीरोंसे भरी हुई और भीष्मपितामह से
रक्षितहोकेभी हमारी सेना अपर्याप्तकहै पाण्डवकी सेना॰
के साथ युद्धकरनेमे असमर्थ जानी जातीहै और विपक्ष पा
ण्डवोंका अपूर्णदल आलसी भीमसेन से रक्षित पर्याप्त अर्थात्
समरमें समर्थ सा देखपडैहै दूसरा अर्थ दुर्योधन अपने॰
हृदयकी निडरता प्रकाश करते द्रोणाचार्यसे कहतेहैं कि
हमारा ग्यारह अक्षौहिणी सैन्य दल महात्मा बुद्धिमान पि
तामह जिसकी हरतरहसे रक्षा करतेहैं निसन्देह शत्रु॰
वोंका पराभव करनेको समर्थहै और इन विचारोंकी एक
तो सात अक्षौहिणी मात्र थोडी सेना हमसे चपलबुद्धि म
हा गवांर भीमसेनसे परिपालित कहो हमारा सामना॰
क्या करेगी पराभव करना तो दूरहै १० ॥

सोरठा ॥

भीष्महमरीरक्ष अप्रमाणसेनाबहुत भीमरक्षबहुतुच्छ
इनकीसेनाजानिए १० ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममे
वाभिरक्षन्तु भवन्तः सर्वएव हि ॥ ११ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

स्वकीयबलस्य भीष्माधिष्ठितत्वेन बलिष्ठत्वमुक्त्वा भीष्मश्रेष्ठ
त्वेन तद्रक्षणमेव द्रोणादीनां प्रार्थयते अयनेष्विति कर्तव्यवि
शेषद्योती चशब्दः समरसमारम्भसमये योद्धॄणां यथाप्रधानं
युद्धभूमौ पूर्वापरादिदिग्विभागेनावस्थितिस्थानानि नियम्यन्ते
तान्यत्रायनान्युच्यन्ते सेनापतिश्च सर्वं सैन्यमधिष्ठाय मध्ये तिष्ठ
ति तेषु सर्वेषु प्रकल्पितं प्रविभागमप्रत्याख्याय भवानश्वत्था
मा कर्णः कृपश्चैवमादयो भवन्तः सर्वेऽवस्थिताः सन्तो भीष्ममेव से
नापतिं सर्वतो रक्षन्तु तस्य हि रक्षणे सर्वमस्मदीयं बलं रक्षितं
स्यात् परबलनिहन्तृत्वेन तस्मात् भीष्मरक्षितत्वादित्यर्थः ॥

स्वामिकृतटीका ॥

तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति हि यस्मात्सर्वएव भ
वन्तो यूयं वीर्येण प्रभवन्तो वा वीराः सर्वेषु समस्तप्रकारेषु अयने
षु च मार्गेषु गोमूत्रिकादिव्यूहस्थानेषु सर्वेषु यथाभागं व्यूहभा
गमनतिक्रम्य विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिता वर्तमानाः
सन्तो भीष्ममेव सेनानायकमभितः सर्वतो रक्षन्तु स्वस्वव्यूहाद्बहिर्या
यापि पालयत यथान्यैर्युध्यमानः पृष्ठतः कश्चिन्न हन्यते त
था रक्षन्तु भीष्मबलेनास्माकं जीवनमिति भावः ॥ ११ ॥

रामानुजभाष्यम् ॥ आदिश्लोके गतार्थम्

श्री [illegible] ॥ ॥

अभिनवगुप्तकृतटी ॥

अयनानि वीथयः ॥ ॥

परमार्थप्रपाटी ॥

तस्माद्भवद्भिरेवं कर्तव्यमित्याह अयने [illegible] इति अयनेषु व्यूह
प्रवेशमार्गेषु यथाभागरणभूमिं विभज्य स्थिताः सन्तः सर्वेऽपि भ

वंतोभीष्ममेवाभितः समंततोरक्षंतु तस्यव्यूहंप्रविष्टस्यपृ
ष्ठिरक्षत ॥ ११ ॥ वनमाली ॥

अतोभवंतः सर्वेपिव्यूहप्रवेशमार्गेषुयथाभागंस्वस्वभागम
परित्यज्यावस्थिताः संतः यथान्यैर्युध्यमानः पृष्ठतः केश्चिन्नहन्ये
ततथाभीष्ममेवाभिरक्षंतु भीष्मबलेनैववयंजीवामइतिभा
वः ॥ ११ ॥ ऊहमवैजयन्तीटी॰ ॥

अयतासम्मन्तुंशिवालिङनंगुरतो
द्युतिमसन्तरदेहोपितामहो
यथामरणभयाद्भिषोशुश्रुवुरं
नणकृतयायुधंसर्वेदितुसस
जमानातिष्ठन्नोस्परदणमेवरु
रुधुनोवैरुपहास्यताभविष्यति
त्यवंधितामहस्यापितिन्दायेभी
रोतितस्यकथंजयमिच्छसीति॥

ततः किंकर्तव्यमित्यपेक्षायामाह अयनेष्विति सर्वेषुअयनेषु
युद्धारंभेव्यूहरचनानंतरंवीराणांयानियान्यवस्थितिस्थानानि
निरूप्यंतेतान्ययनशब्देनोच्यंते तेषुतेषुअयनेषुस्थानेषुयथा
भागंस्वस्वस्थानमनतिक्रम्यास्थिताः संतः सर्वेभवंतोभीष्ममेवाः
भितोरक्षंतुहिशब्देकायमर्थः सेनापतिरक्षणेनसर्वस्यबलस्य
रक्षास्यादित्यभिप्रायोदुर्योधनस्य ॥ ११ ॥

मधुसूदनी ॥

एवंचेन्निर्भयोसि
तर्हिकिमितिबहु
जल्पसीत्यतआह

कर्तव्यविशेषद्योतीतुशब्दः समरसमारंभसमयेयोधानांयथा
प्रधानंयुद्धभूमौपूर्वापरादिदिग्विभागेनावस्थितिस्थानानिया
नियम्यंते तान्ययनान्युच्यंते सेनापतिश्चसर्वसैन्यमधिष्ठाय
मध्येतिष्ठति तत्रैवंसति यथाभागंविभक्तांस्वांस्वांरणभूमिमप
रित्यज्यावस्थिताः संतोभवंतः सर्वेपियुद्धाभिनिवेशात्सर्वतः पृ
ष्ठतः पार्श्वतश्चानिरीक्षमाणंभीष्मंसेनापतिमेवरक्षंतु भीष्मे
हिसेनापतौरक्षितेतत्प्रसादादेवसर्वेरक्षिताभविष्यतीत्य
भिप्रायः ॥ ११ ॥ मदानंदी टी॰

एवंचेन्निर्भयोसित्वंकिंवृथाबहुजल्पसि इत्यत्राहतुशब्देनक
र्तव्यद्योतयन्नृपः १ संग्रामारंभसमयेयुद्धभूमौयथायथंपू
र्वादिदिग्विभागेनवीराणांस्थितिभूमयः २ नियम्यंतेहिताः
प्रोक्ताअयनानीतिनच्च सर्वसैन्यमधिष्ठायमध्येतिष्ठतिसे
नापः ३ यथाभागविभक्तांस्वांस्वामप्यक्त्वारणस्थितिं भवंतो
वास्थिताः संतः पुरतः पृष्ठतोन्यतः ४ निरीक्ष्यमाणंभीष्मंतेस

वैरक्षंतुसैन्यपाः भीष्मसेनापतौसर्वैरक्षितेतस्मात्त्वरक्षिते ५
११ ॥ नीलकंठी टी॰
अयनेषुव्यूहरचनयास्थिते सैन्यप्रवेशमार्गेषुस्वेस्वस्थाने।
स्थितायूयंसर्वेभीष्ममेवाभिरक्षंतु अस्यसेनापतेश्चाच
ल्येसर्वापिसेना[illegible]कुलीभवेत् नत्वस्थैर्येस्थिराचभवेदतःस।
एवरक्ष्यइत्यर्थः ११ ॥

आनंदी टीका

हि यस्माद्भीष्मेण रक्षितमस्माकं बलं पांडवबलनिवारणे समर्थम् अतः सर्वेषु अयनेषु व्यूहरचनायां पूर्वपरादौ वीराणां प्रवेशनिर्गममार्गेषु यथाभागं स्वस्वभागे वा स्थिताः सावधानाः सन्तः सर्व एव भवन्तो भीष्ममेवाभिरक्षन्तु भीष्मे रक्षिते सर्वकार्यं सिद्ध्यतीत्यर्थः ११ ॥

रामकंठी टीका

स्पष्टार्थम् ११

लासिकी ~~[illegible]~~ टीका

तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति वीथिषु कक्ष्यासु व्यूहविभागमनतिक्रम्य सन्तः सर्व एव भवन्तो वीराः (भीष्ममेव सर्वसेनाधिप्रधानं पालयन्तु ॥) अत्रापीयं सूचना भीष्मस्य पांडवसेनायामपि प्रेम तस्माद्यथा नायं भीष्मः पांडवैः सह संगच्छति तथाभिरक्षणं वैस्तां भवंतः कुर्वन्त्वित्यर्थः ११ ॥

रणवीरसम्बोधिनी ॥

ततश्च किं कर्तव्यमित्याह अयनेष्विति समरसमारंभसमये योधानां यथाप्रधानं युद्धभूमौ पूर्वापरादिविभागेनावस्थितिस्थानानि यानि नियम्यंते तान्ययनान्युच्यन्ते सेनानीश्च समस्तसैन्यमधिष्ठाय मध्ये तिष्ठति यथोक्तमाचार्यपादैः व्यूहस्तत्र च पंचधैव कल्पना सर्वेषु पक्षावुभौ तद्वन्त्यावपि तावुरस्यश्च तथैव हि चैतैः कामत इति अत्रार्थः व्यूहाः सैन्यव्याप्याये उक्तास्तेषु सर्वेषु कल्पना कल्पना सैनिकविभाग इति यावत् पंचधैव यथा उभौ द्वौ भागौ पक्षौ कार्यौ पक्षवन्त्यावपि तावुभौ कार्याविति चत्वारो भागाः पंचमस्तु परिशिष्टो भाग उरस्य उरोदेशस्थितो विधेय इति पंचविभागैः

पंचदेशेषु सैनिकाः स्थाप्या इत्यर्थः शुश्रूषुभिः ते कामत इत्यत्र त्वप
योगात्तु व्याख्यायते ॥ यथाभागमिति विभक्तां स्वां स्वां रणभू
मिमपरित्यज्यावस्थिताः संतो भवंतः सर्वेपि भीष्ममेव सेनाप
तिमभितः सर्वतो रक्षंतु मा कश्चिदेनं हन्यात् पत्यावधीदिति
यतद्रक्षणमेवास्माकं जीवनमिति भागावस्थितिश्च भारते गक
उक्तस्य स्वयं हैडिंबादिव्रतकालं वज्रपीठभरद्वाजः कृतवर्मा च सा
त्वतः अश्वत्थामा कृपश्चैव पुरीषमात्रायणास्त्विनौ त्रिगर्त्तैर्मत्स्यकै
केयैर्वीरैर्यानैश्च संयुतौ भूरिश्रवाः शाल्वः शल्यो भगदत्तश्च मारिष
मद्रकाः सिंधुसौवीरास्तथा पंचनदाश्च ये जयद्रथेन सहिता ग्रीवा
यां संनिवेशिताः दुर्योधनो राजा सोदरैः सानुगैर्वृतः विन्ध्या
नुविन्ध्यावावंत्यौ कांबोजाश्च शकैः सह पुच्छमासीन्महावीर शूरसे
नाश्च सर्वशः मागधाश्च कलिंगाश्च दाशेरकगणैः सह दक्षिणं प
क्षमाश्रित्य स्थिता युद्धाय दंशिताः कानकाश्च विमुक्ताश्च मुक्ताः शु
द्रविणास्तथा बृहद्बलेन सहिता वामं पक्षमुपाश्रिताः इति कौरव
सेनावस्थिति विभागः अथ पांडवसेनावस्थितिविभागस्तत्रैव व्यू
ढं दृष्ट्वा तत्सैन्यं सव्यसाची परंतपः धृष्टद्युम्नेन सहितः प्रत्यव्यूह
त संयुगे अर्थवं द्वैपाव्यूहेन व्यूढं तमति दारुणं दक्षिणं शृंगमाश्रि
त्य भीमसेनो व्यरोचत नानाशस्त्रौघसंपन्नो नानादेश्यैर्नृपैर्वृतः
तमन्वेति विराटश्च द्रुपदश्च महारथः तदनंतरमेवासीन्नीलो नीला
युधैः सह नीलादनंतरं चैव धृष्टकेतुर्महारथः चेदिकाशिकरूषैश्च
पौरवैश्चाभिसंवृतः धृष्टद्युम्नः शिखंडी च पंचालाश्च प्रभद्रकाः म
ध्ये सैन्यस्य महतः स्थिता युद्धाय भारत तथैव धर्मराजोपि गजानीके
न संवृतः ततस्तु सात्यकी राजन्द्रौपद्याः पंच चात्मजाः अभिमन्युस्त
तस्तूर्णमिरावांश्च ततः परं भैमसेनिस्ततो राजन्केकयाश्च महारथाः
ततोभूद्विपरं श्रेष्ठो वामपार्श्वमुपाश्रितः सर्वस्य जगतो गोप्ता यो मायस्य जना
र्दनः एवमेतन्महाव्यूहं प्रत्यव्यूहंत पांडवा इति ११॥

अयनेषुचेति हे अयनेषु तत्तद्व्यूहमार्गेषु यथाप्रदेशं व्यवस्थिताः सैनिका भवंतः सर्वे युद्धाभिनिवेशादन्यतः पृष्ठतः पार्श्वयोः अनिरीक्ष्यमाणं भीष्ममेवाभिरक्षंतु तस्मिन् रक्षिते नैकरक्षित एव विजय इति भावः ॥ ११ ॥

भाषा अनुवाद

इससे अब तुम सब लोगोंको यही करना उचितहै कि शत्रुके सैन्यदलके भीतर प्रवेश करनेको क्रमसे अलग अलग हो अपनी अपनी रणभूमि पर खडे होकर भीष्मजीकी सब र क्षाकरो जिसमे और कोई शत्रुकी ओरका योधा पीछेसे इ नको न मारने सके इसको अभिप्राय यहहै कि भीष्महीके बलसे हमारा जीवनहै ११ ॥

सोरठा॥

यथास्थानस्थितहोय सर्व मार्गमे सर्वविधि तुमसमकारजजो य भीष्मकीरक्षाकरो ११॥

तस्यसंजनयन्हर्षं कुरुवृद्धःपितामहः सिंह नादंविनद्योच्चैः शंखंदध्मौप्रतापवान् १२ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

तमेवमाचार्यंप्रतिसंवादंकुर्वन्तं भयाविष्टंराजानंदृष्ट्वा तदभ्यास वर्ती पितामहस्तदुअंत्तरोधार्थं इत्थं कृतवानित्याह तस्येति राज्ञो दुर्योधनस्य हर्षं बुद्धिगतमुल्लासविशेषं परपरि भवद्वारा स्वकीयविजयद्वारकं सम्यगुत्पादयन्नभयं तदीय मपनिनीषुरुच्चैःसिंहनादंकृत्वा शंखमापूरितवान् किमिति दुर्योधनस्य हर्षमुत्पादयितुं पितामहोयतते कुरुवृद्धत्वात् तस्यकुरुराजत्वात् पितामहत्वाच्चास्यदुर्योधनभयापनयना र्थाप्रवृत्तिरुचिता तदुपजीवितयातद्वशत्वाच्च तस्यसिं हनादशंखशब्दे चपरेषांहृदयव्यथा सम्भाविते दूरादेवारि निवहंप्रति भयजननलक्षणप्रतापत्वादित्यर्थः १२ ॥

स्वामिकृतटीका ॥

तदेवंद्रोणंप्रतिराज्ञोभीष्मस्यबहुमानपुरस्सरंवचनंश्रुत्वा भीष्मःकिंकृतवान् तदाह तस्येति कुरुवृद्धःपितामहोगांगे यःतस्यैवंद्रोणंप्रतिनिरूपणंकुर्वतोदुर्योधनस्यराज्ञोहर्षंप्री तिंसंजनयन् उच्चैर्महांतंसिंहनादंविनद्यकृत्वासर्वसत्वसंत्रा सनंसिंहनादमिवनादमहहासंकृत्वाशंखंदध्मौआपूरितवा नित्यर्थःप्रतापवान् १२ ॥

रामानुजभाष्यम् ॥ आदिश्लोकेगतार्थम्

[illegible] ॥ १२ ॥

अभिनवगुप्तकृतटी० ॥ १२ नास्ति

परमार्थप्रपा टी०

तस्येति एवमित्यादिभिरुक्तैर्जनवाक्यैःस्ववीरोक्तीःकृतवतो दुर्योधनस्यहर्षमुत्साहंजनयन्कुरुषुकौरवसैन्येषुवृद्धःपि तामहोभीष्मःप्रतापवान्स्वयमुत्साहवान्सिंहवदट्टहासंकृत्वा

अथवा एवंभूतस्य ... [illegible]
फणिकंचुकवत् जीर्णनिजदेहस्य पातने दुर्योधनमतिमुपकारिणीं मन्यमानो आनंदेनोत्फुल्लसर्वांगस्य
हर्षमेवाजनयन्न तु हर्षं तस्य संजनयन्निति यो गुरोरात्मनश्चावज्ञां कृतवांस्तस्याधर्मरूपस्य क्रूरस्वभावस्य पर
बलेन जनितभयेनाचार्यमुपगतस्य तत्कपटज्ञाता गुरुणा वाङ्मात्रेणाप्यनादृतस्य दुर्योधनस्य गुरूपेक्षां ज्ञात्वा ॥ ०

गी. शंखं दध्मौ वादितवान् १२ ॥

टी. वनमाली टी. ॥

प्र. तस्मिन्दैन्यभारस्य राज्ञो हर्षं संजनयन्कुरुवृद्धो भीष्मः सिंहनादं कृत्वा शंखं दध्मौ १२ ॥

उत्तमवैजयन्ती टी. ॥

ततो दुर्योधनेन राज्ञा ममत्वस्तवकं मे नाधिपत्यत्वेन सर्ववीरा
धिकत्वबाधकत्वेन चात्मन सर्वदूषणगर्भवचनमुक्तं भीष्मानि
ष्टम्यात्मा ह्युक्तस्तु भूत्वा राजानमपि हर्षयुक्तं कृतवानित्याह
संजयस्तस्येति । हर्षं बाह्यान्तःकरणगतानंदविशेषं जनयन्नु
त्पादयन् सिंहनादं सिंहवदुच्चैर्महद्ध्वनिं विनद्य कृत्वा पिताम
हो भीष्मः शंखं दध्मौ वादितवान् कुरुवृद्धः बुद्धिबलपौरुषशास्त्र
शास्त्रविद्याजन्माभिः सर्वेषां कुरूणां मध्ये वृद्धः श्रेष्ठतमो न तु श
रीरमात्रेण अत एव प्रतापवानिति तेजस्वी कुरुवृद्धत्वेन पिताम
हत्वेन चास्योभयेषां वैषम्याभावादानंदकत्वं सूचितं प्रतापवा
नित्यनेन स्वेच्छामृत्युत्वादस्य मृत्युभयशंकालेशोऽपि नास्तीति
सूचितम् १२ ॥ मधुसूदनी ॥

एवं पाण्डवसैन्यदर्शनादतिभीतस्य भयनिवृत्त्यर्थमाचार्यकप
टे नृप शरणागतस्य इदानीमप्ययं मां प्रतारयतीत्यसंतोषवशादा
चार्येण वाङ्मात्रेणाप्यनादृतस्याचार्योपेक्षां बुद्ध्वा यन्नेष्टित्यादिना
भीष्मः स्ववचनैव तस्य राज्ञो भयनिवर्तकं हर्षं बुद्धिगतमुल्लास
विशेषं स्वविजयसूचकं जनयन् उच्चैर्महान्तं सिंहनादं विनद्य कृ
त्वा सिंहनादमिति णमुलन्तं अतो वैपोषं पुष्णातीतिवत्तस्यैव धातोः
पुनः प्रयोगः शंखं दध्मौ वादितवान् कुरुवृद्धत्वादाचार्यदुर्यो
धनयोरभिप्रायः परिज्ञाने पितामहत्वाददुपेक्षणेनत्वाचार्यव
दुपेक्षणे प्रतापवत्वादुच्चैः सिंहनादपूर्वकशंखवादनेपरेषां भया
त्पादनाय अत्र सिंहनादशंखवाद्ययोर्हर्षजनकत्वेन पूर्वापर
कालत्वमभिव्यञ्जनेति व जनयन्निति शतावश्यं भावित्व
रूपवर्तमानत्वं व्याख्यातव्यः १२ ॥

सदानंदी टी. ॥

सोऽनुवादिनं तु वा एतद्दर्शे देहः पतिष्यत्येवेत्याशये न तं हर्षयन्नेव सिंहनादं शंखवाद्ये च कृतवानित्याह

५

३ मे य द

एवं संस्तुवतो भीष्मं राज्ञो विजयवृद्धये उल्लासं जनयन्नुच्चैः सिं
हनादं महारवं १ कृत्वा प्रतापयुक्तात्मा शंखं वादितवांस्ततः कु
रुवृद्धतयाचार्यभूपयोराशयज्ञता २ राज्ञोनुपेक्षणेन स्य पिता
महत्तयोच्यते ३ १२ ॥

नीलकंठी टी॰ ॥

तस्य एवं वदतो दुर्योधनस्य संजयवाक्यमिदं सिंह[नाद]मिति तुमुलं ते
तेन विनद्येत्यस्यानुप्रयोगः कषादित्वात् समूलकाषं कषति स
दैत्यानित्यादिवत् कुरुवृद्धो भीष्मः प्राग्विराटनगरादौ दृष्टप्रभा
वान् पांडवान्दृष्ट्वा राज्ञो भयं माभूदिति शंखं दध्मौ हर्षं युद्धोत्सा
हं जनयन् हेत्वर्थे शतृप्रत्ययः हर्षजननार्थमित्यर्थः १२ ॥

आनंदी टीका

तस्यैवं वदत एव दुर्योधनस्य तद्बलस्य च वा हर्षं तस्मात् हर्षं संजनः
यन् कुरुवृद्धः पितामहः सिंहनादं विनद्यैरे पोषं घुष्णातीति व
ज्ञातो हि प्रयोगे सिंहनादमिति कोऽगुलि सिंहइ[illegible] वनदित्वा
सिंहनादं कृत्वा शंखं दध्मौ प्रतापवान् १२ ॥

रामकंठी टीका

स्पष्टार्थम् १२

लासिकी [illegible] टीका

राज्ञो दुर्योधनस्य हर्षं संजनयन् भीष्मपितामहः सिंहस्येव
नादं महद्धासं उच्चैः कृत्वा वादितवान् अरिभयजननीवार्ता
प्रतापसत्त्वात् १२ ॥ पाठः

रणवीरसंसिद्धोधिनी ॥

सर्वस्मिन्श्लोके न दुर्योधनो ह्रष्टो बिर्तं स्व महिमानं श्रुत्वा भीष्मः किमक
रोदित्याह तस्येति तस्य दुर्योधनस्य पितामहो भीष्मः सिंहनादं
सर्वप्राणिभयंकरं महद्धासं प्रतिनियद्दोषमप्रहृतिः प्रतापः १२

मुपलालय

रामचंद्रसरस्वतीकृतटीका ॥

तस्यसंजनयन्निति भीष्ममेवाभिरक्षन्त्वित्याकर्ण्यप्रद्रोणेन सहसा
हृतस्वक्रामामयमुपलालयतीति दुर्योधनाशयज्ञो भीष्मः
सिंहनादपूर्वकं शंखंवादितवान् तत्किंस्वाशयद्योतनाय
नेत्याह तस्यहर्षंजनयन्निति इत्थमर्जयन्ब्राह्मणः प्रतिष्ठ
ह्लीयादभिचरन्यजेतेत्यादिवत् शात्रवीणां प्रत्यवस्थिता
नित्यतःप्राक्तनाःस्पष्टार्थाः ॥ १२ ॥

भाषा अनुवाद

तब तो ऐसी ऐसी राजा दुर्योधनकी मनमानकी बातें सुनि भीष्मजीने जो किया सो कहते हैं कि दुर्योधनके सन्तुष्ट होनेके कारण कुरुवंशके वृद्ध पितामह उछल के आगे बढि सिंहनाद करि शंख बडे शब्दकार से बजाया १२ ॥

सोरठा

पितामहतिहकेरंहर्षप्रगटकुरुवृद्धकर कुचेसंखबजायोपेर प्रतापवान्हरिषाहृकर १२॥

ततः शंखाश्च भेर्यश्च पणवानकगोमुखाः सह-
सैवाभिहन्यंत सशब्दस्तुमुलोऽभवत् १३ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

राजाभिप्रायं प्रतीत्य भीष्मप्रवृत्त्यनन्तरं तत्पक्षैस्तैस्तैराजभिः शं-
खादयो वाद्यविशेषा झटिति शब्दवन्तः संपादिताः स च शंखादिप्र-
युक्तः शब्दस्तुमुलो बहुलं भयं परेषां परिप्याप्नुवन्नासीदित्याह त-
त इति । १३ ॥

स्वामिकृतटीका ॥

तदेवं सेनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्सवः प्रवृ-
त्त इत्याह ततः इति ततो भीष्मस्य शंखपूरणानन्तरं शंखाश्च परे भे-
र्यः पणवानकगोमुखाः सहसैव युगपदेवैकस्मिन्कालेनत्क्षण-
मेवाभ्यहन्यंत आस्फालिता वादिताः स च शंखादिशब्दस्तुमुलो म-
हानुपकवर्णो विवेचनायोग्योऽभवत् पणवा आनका गोमुखा
इत्याद्या वाद्यविशेषाः १३ ॥

रामानुजभाष्यम् ॥ आदिश्लोके गतार्थम्

स्वकीयान्शंखान्पृथक्पृथक्दध्मुः ॥ १३ ॥

अभिनवगुप्तकृतटीका ॥ नास्ति १३ ॥

परमार्थप्रपा ॥

ततइत्यादितः श्लोकषट्कं सुगमं १३ १४ १५ १६ १७ १८ ॥

वनमाली·टी·

सेनापतेर्युद्धोत्सवं दृष्ट्वा सर्वत्र युद्धोत्सवो जात इत्याह ततइति
सहसैव तत्क्षणमेव १३ ॥ कृष्णमैवजयन्ती टी· ॥

ततः किमभवदित्यपेक्षायामाह ततइति ततः सेनापालकस्य दे-
वव्रतस्य दरनादानन्तरमनेकाः शंखा बहुभेर्यश्च पणवानकगो-
मुखा वाद्यविशेषाश्च सहसैव तत्समये एवाभ्यहन्यंत अभि-
तो हताः कर्मकर्तरि प्रयोगः वादकैरिति कर्तृविशेषो वा सः शंखा-
दिशब्दस्तुमुलो महत्तरोऽभवदासीत् १३ ॥

मधुसूदनी ॥

भीष्मादीनां नायकानां धनुष्टङ्कारोत्तरं वाद्यास्फोटनं न्याय्यमिति स्मरणाद्य निमानपूर्वकमेककालावच्छिन्नं पाण्डवानां
पं शंखादिवाद्यानां च महद्घोरनादं श्रुत्वा पितामहपुत्राणां श्रीकृष्णसहायानां तत्सैन्यान्महता येन यथा नन्दो
जायते तथैवान्यकुलासोजातो न तु क्षोभ इति भावः ॥

गी॰ टी॰ प्र॰

ततोभीष्मस्यसेनापतेःप्रहर्षानंतरं पणवानकगोमुखाश्च
वाद्यविशेषाःसहसातत्क्षणमेवाभ्यहन्यंतवादिताः कर्मकर्तृ
विप्रयोगःसशब्दस्तुमुलोमहानासीत् तथापिनपांडवानांक्षोभो
जातइत्यभिप्रायः १३ ॥

सदानंदी टी॰ ॥

ततःसेनापतेःशंखवादनानंतरंक्षणे सहसाशंखभेर्याद्यावा-
द्यभेदाश्चवादिताः । सशब्दोपिमहानासीत्क्षोभकर्त्तृतयाविने २ १३ ॥

नीलकंठी ॥

अभिहन्यंतअभिहताः कर्मकर्तृविप्रयोगः १३ ॥ १४ । १५ । १६
१७ १८ १९ ॥

आनंदी टीका

स्पष्टम् १३

रामकंठी टीका॥

स्पष्टार्थम् १३

लासिकी ~~[illegible]~~ टीका ॥

भीष्मशंखवादनानन्तरम् भीर्याश्च सर्वपववाद्यविशेषाः । पणवानकगोमुखा

तत्क्षणमेववादिताः स शब्दःदारुणोभवत् १३ ॥

रणवीरसमिद्धोधिनी॥

पुरुषोत्सवेसद्वर्षभीष्ममालब्ध्यतत्रैवसर्वेषांप्रवृत्तिर्जातेत्याह॥

ततइतिभीष्मशंखध्मानश्रवणादनंतरं सहसैव भीष्मशंख

वादनसमकालमेव भेर्याद्यावाद्यविशेषाः १३॥

भाषा अनुवाद ॥

भीष्मपितामहकी युद्धमे ऐसी उत्साह देखि सकल सेनाके सरदारलोग जिसभांति युद्धउत्सवमें प्रवृत्तभये सोई कहते है कि तदनन्तर शंख भेरी कहे तुरही पणव जो मृदंग आनक जो नगारा गोमुख वाद्यविशेष तत्काल एकबारगी जो सभोंने बजाया तो वह शब्द एक बडा आश्चर्यभूत भयानक भूभूकारभया १३ ॥

सोरठा ॥

आनक बजावें भूरि संख भेरी गोमुख पणव शाब्दसो भरएदिस
दसासम बाजत भए १३ ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माध
वः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः १४ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

एवं दुर्योधनपक्षे प्रवृत्तिमालक्ष्य परिसरवर्तिनौ केशवार्जुनौ श्वेतैर्हयैरतिबलपराक्रमैर्युक्ते महत्यप्रधृष्ये रथे तावस्थितावाहतौ शंखौ पूरितवन्तावित्याह ततः श्वेतैर्हयैरिति १४ ॥

स्वामिकृतटीका ॥

ततः पांडवसैन्ये प्रवृत्तं युद्धोत्सवमाह ततइति पंचभिः ततो दुर्योधनसैन्यवाद्यकोलाहलानंतरं श्वेतैः शुक्लैः कैलासाचलशिखरकल्पैः परसैन्योत्कर्षतनूकरणसामर्थ्यवद्भिर्वाहैर्हयैरतिवेगातिरेकात्तत्स्वभावतो वा हंसाकाशीयांनीति हयाविशिष्टाश्वशालेः संयु[illegible]ते महत्यादित्यमंडलकल्पे प्रज्वे स्यंदने संग्रामभूमिप्रवणशीले रथवरे स्थितौ वर्तमानौ मायालक्ष्म्याधवः पतिः कृष्णः पांडवश्चार्जुनश्चापि दिव्यौ विभक्ती शाकतौ शंखौ प्रदध्मतुः परकीयवाद्यकोलाहलाभिभवसंपादनेन दध्मतुरापूरितवन्तौ· १४ ॥

माधवः (margin) — व

रामानुजभाष्यम् ॥ आदिश्लोकेनतोर्थम्

[illegible] ॥ १४ ॥

अभिनवगुप्तकृतटीका· १४ ॥ नास्ति

परमार्थप्रपाटी· ॥ १४ ॥ नास्ति

वनमाली टी· ॥

ततः पांडवसैन्यप्रयुद्धोत्सवमाह ततइति पंचभिः १४ ॥

उत्तमवैजयन्ती टी· ॥

एवं दृष्ट्वात्तु पांडवानीकमित्यारभ्य ततः शंखाश्चेत्यंतैः श्लोकैर्मामकाः किमकुर्वतेत्यस्य धृतराष्ट्रप्रश्नस्योत्तरं संजयेन दत्तमिदानीं ततः श्वेतेत्युपक्रम्य सद्योषइत्यंतैः षड्भिः श्लोकैः पाण्डवाश्च किमकुर्वतेत्यस्योत्तरमाह ततः श्वेतेरिति ततस्तदीयानां सैन्ये शंखादिशब्दश्रवणानंतरं श्वेतैर्हयैः शुभ्रवर्णैर्युक्ते योजिते·

गी॰
टी॰
प्र॰

महति लोकत्रयविजयोपकरणभूते स्यंदने स्थितौ माधवो रमापतिः
यद्वा मधोर्वंशे जातो माधवः सर्वेश्वरः पार्थसारथिः कृष्णः पा
ण्डवोर्जुनश्च श्रीमहिमौ शंखौ प्रदध्मतुः वादयामासतुः १४

मधुसूदनी ॥

अन्येषामपि रथस्थत्वे स्थिते साधारण्येन रथोत्कर्षकथ
नार्थं ततः श्वेतैर्हयैर्युक्त इत्यादि रथस्थत्वकथनं तेनाग्निदत्ते
दुष्प्रधृष्ये रथे स्थितौ सर्वथा जेतुमशक्यावित्यर्थः १४ ॥

सदानंदी ॥

ततः श्वेतैरिति श्लोके रथस्थत्वस्य कीर्तनात् माधवार्जुनयोः श्री
क्रमजेयत्वमसूचना ॥ १४ ॥

नीलकंठी ॥ १४ ॥

आनंदी टीका

स्पष्टमेव १४

रामकंठी टीका

सुगमोर्थः १४

लासिकी ~~[illegible]~~ टीका ततः ॥

ततः शंखादिशब्दश्रवणानंतरं श्रीशाह्कौ प्रदध्मतुः १४ ॥

दिव्यौ

रणवीरसमिद्धोधिनी ॥

कौरवसैन्यानांशंखनादेनोद्योगमालक्ष्यपांडवसैन्यानांयुद्धे
सर्वेषहृतिजीतेत्याह. ततइतिपंचभिः ततोदुर्योधनसैन्यवा
द्यकलकलश्रवणादनंतरं श्वेतैर्हिमाचलकल्पैः दिव्यावध्माकृ॰
तौ ॥ १४ ॥

भाषा अनुवाद ॥

तिसके बादि पाण्डवोंकी सेनामें युद्धकी तयारी पांच स्लो
कसे कहतेहैं कि इधर हंससे स्वेतवरन चार हय संयुक्त
सूर्यसे प्रकाशमान रथ पर सवार श्रीकृष्ण और अर्जुनने
भी अति उत्तम दोनो शंख युग्रकारे १४ ॥

दोहा ॥

स्वेतअस्वके युक्त पुनमहारथतामेदोप दिव्यसंखदहरिअर्जुन
वेद बजावतदोप १४ ॥

6

पांचजन्यंहृषीकेशो देवदत्तंधनंजयः पौंड्रं
दध्मौमहाशंखं भीमकर्मावृकोदरः १५ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका

तयोःशंखयोर्हिंवत्वमेवोपादयति पांचजन्यमिति केशवा (पं १)
र्जुनयोः युद्धाभिमुखयोर्दृष्ट्वा संहृष्टः सार [illegible] न समरस्मिको (धर्पे १)
भीमसेनोपि युद्धाभिमुखोभूदित्याह पौंड्रमिति १५ ॥

स्वामिकृतटीका ॥

तदेवविभागेनप्रदर्शयन्नाह पांचजन्यमिति हृषीकाणामिं
द्रियाणामीशोधिष्ठातालीलागृहीत देहोभगवान् श्रीविष्णुः
पांचजन्यंपंचजनाख्यदैत्यदेहोद्भवंधनंजयोदेवदत्तंवृकोद
रोभीमंकर्मयस्यसभीमकर्मामहाशंखंपौंड्रंदध्मौआपूरितवा
न् १५ ॥

रामानुजभाष्यम् ॥ आदिश्लोकेगतार्थम्

भवत्पुत्राणां हृदयाणि बिभेद ॥ १५ ॥

अभिनवगुप्तकृतटी० ॥ नास्ति १५ ॥

परमार्थप्रपाटी० । १५ ॥ नास्ति

वनमाली टी० ॥

भीमंभयंकरंकर्मयस्यसः वृकनामाग्निविशेषउदरेयस्यसः
१५ १६ १७ १८ ॥

कुसुमवैजयन्ती टी० ॥

पांचजन्यमिति हृषीकेशोबाह्यान्तःकरणप्रेरकः पांचजन्यंपं
चजननामासुरोदराडुत्पन्नंधनंजयः सर्वेषांभूपालानांधनंज (प्रसिद्धं १)
यतीतिसः देवदत्तंदेवनदत्तं भीमंभयानकंहिडंबककीचक
वधादिरूपंकर्मयस्यसः तथावृकोदरेवृकनामाग्निरुदरेय
स्यसः भीमः पौंड्रंनामानंमहाशंखंवृहदाकारंदृढंतुणवा भी
मकर्मेतिविशेषणेनदुर्योधनादीन् शतभ्रातृनूवधिष्यामि
दुःशासनस्यरुधिरंपास्यामीतियत्पूर्वंप्रतिज्ञातंतत्सर्वंनिः
संदेहंनेवकरिष्यतीतिसूचितम् १५ ॥

मधुसूदनी टी॰ ॥

पांचजन्योदेवदत्तः पौंड्रमनन्तविजय ः सुघोषमणिपुष्पकश्चेति शंखनामकथ नेनपरसैन्येस्वनामभिः प्रसिद्धाएतावंतः शंखाः भवत्सैन्येतुनैकोपिस्वनामप्रसिद्धः शंखोस्तीति परिघामुत्कर्षोतिशायकथनार्थं सर्वेंद्रियप्रेरकत्वेन सर्वांतर्यामी सहायः पांडवानामितिकथयितुंहृषीकेशपदं दिग्विजये सर्वान्राज्ञोजित्वा धनमाहृतवानिति सर्वश्रे ष्ठत्वमजेयमितिकथयितुं धनंजयपदं भीमंहिडिंबवधादिरूपं कर्मयस्य ताद्दशोवृकोदरत्वे

मधुसूदनी टी॰ ॥ १५ ॥

सदानंदी टी॰ ॥

पांडवानांसहायोस्तिसर्वेन्द्रियनियामकः राज्ञोजित्वाखिला न्युद्धेधनमाहृतवांजयः १ दिव्यप्रभावोनाथःको हृषीकेशध नंजयौ केशवार्जुनयोर्युद्धाभिमुखवीत्पहर्षतः २ स्वारथ्या द्भीमसेनोपियुद्धेतिरसिकोबली समराभिमुखोपासीदित्या ह्ववचनेनवरं ३ स्तोवधादिकंकर्मयस्यपाठ्नभयावह्द्द्वृको दरत्वाद्बह्वन्नपाकाङ्क्षीभीममहाबलः ४ ॥ १५ ॥

नीलकंठी ॥ १५ ॥

आनंदी टीका

सुगमोर्थः १५

रामकंठी टी॰

स्पष्टार्थः १५ ॥

लासिकी [illegible] टीका ॥

श्रीकृष्णः पांचजन्यनामशंखं । प्रति दध्मुः अर्जुनोदेवदत्ता
ख्यंघोरकर्माभीमसेनःपौंड्राख्यंशंखं ॥ १५ दध्मौ

रणवीरसत्सिद्धोधिनी॰

स्पष्टः १५॥

भाषा अनुवाद

अब किसने कौन शंख बजाया सो कहतेहैं कि पांचजन्य नामक श्रीभगवान और अर्जुन देवदत्त नाम शंख बजाया फेर भीमकर्म्मा भीमसेन भयानक महाशंख पौंड्र नाम ब-जाया १५ ॥

दोहा ॥

पांचजन्यहृषीकेश लयदेवदत्तकपिकेत भीमकर्मबजें
भीममहाशंख पौंड्र अतिहेत १५॥

65

अनन्तविजयंराजा कुन्तीपुत्रोयुधिष्ठिरः नकु
लःसहदेवश्च सुघोषमणिपुष्पकौ १६ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका ॥

एतेषांईदृशीं प्रवृत्तिं प्रतीत्य परिपालनावकाशमासाद्य राज्ञोयु
धिष्ठिरस्यापि प्रवृत्तिं दर्शयति अनंतेति ज्यायसो भ्रातॄणामनुस
रणमावश्यकमितिमत्वा तयोर्यवीयसोर्भ्रात्रोरपि प्रवृत्तिमाह
नकुलइति १६ ॥ स्वामिकृतटीका ॥

अनन्तविजयमितिद्वयमेपूर्वश्लोकोक्तक्रियात्रसंबध्यते कुंतीपुत्रो
युधिष्ठिरोराजापांडवानांस्वामीअनंतविजयंमहाशंखंदध्मौयस्य
शंखस्यापूरणादनंतःसंततोविजयोभवतीति अनंतविजयःतं
नकुलःसुघोषंनामशंखंप्रदध्मौसहदेवोमणिपुष्पकंच १६ ॥

रामानुजभाष्यम् ॥ आदिश्लोकेनार्थम्

अथैवनपेंकुहृणंबलमिति ॥ १६ ॥

अभिनवगुप्तकृतटीका १६ ॥ नास्ति

परमार्थप्रपा टीका १६ ॥ नास्ति

वनमालीटीका नास्ति १६ ॥

कुसुमवैजयन्ती टी. ॥

अनंतविजयमितिकुंतीपुत्रःभर्तुरनुज्ञयातितपसाकुन्त्याधर्ममा
राध्यतस्माल्लब्धः राजाराजसूयादियाजीयुधिष्ठिरः युधियुद्धेतिष्ठ
तीतिसतथासंग्रामेऽव्यग्रचित्तइत्यर्थः अनंतविजयनामानंशंखं
पदत्रयेणराज्यार्हं सएवनतुत्वमित्यर्थः इतिसूचितं नकुलःनवि
द्यतेकुलंरिपुकुलंयस्यपदयेरिसमूहोनतिष्ठतीत्यर्थः सहदेवः
देवेनकृष्णेनसहवर्ततेऽतएवकृष्णसहायेननिर्भयःसर्वभूमिंवि
जेष्यतीतिभावःसुघोषनामानंमणिपुष्पकनामानंचशंखंद
ध्माविन्यन्वयः १६ ॥ मधुसूदनी ॥

पांचजन्योदेवदत्तःपौंड्रअनंतविजयःसुघोषोमणिपुष्पकश्चेति

गी॰
टी॰
प्र॰

68

शंखनामकथनेनपरसैन्येस्वनामभिः प्रसिद्धाएतावंतःशंखाःभव
तःसैन्येतुनैकोपिस्वनामप्रसिद्धःशंखोस्तीतिपरेषामुत्कर्षउक्तं
सर्वेन्द्रियप्रेरकत्वेनसर्वान्तर्यामीसहायःपांडवानामितिकथयि
तुंहृषीकेशपदं दिग्विजयेसर्वान्राज्ञोजित्वाधनमाहृतवानिति
सर्वथैवायमजेयइतिकथयितुंधनंजयपदं भीमंहिडिंबवधा
दिरूपंकर्मयस्यतादृशोवृकोदरत्वेनबहन्नपाकादतिबलिष्टो
भीमसेनइतिकथितं कुंतीपुत्रइति कुंत्यामहतातपसाधर्ममा
राध्यलब्धःस्वयंचराजसूययाजित्वेनमुख्योराजा युधिष्ठिरायमेव
जयभागित्वेनास्थिरः नत्वतद्विपक्षाःस्थिराभविष्यंतीतियुधिष्ठि
रपदेनसूचितं नकुलःसघोषंसहदेवोमणिपुष्पकंदध्मावित्य
नुषज्यते १६ ॥ सदानंदी टी॰ ॥
महतातपसाकुंत्यालब्धोधर्मात्मनोपितत् राजाचराजसूययस्य
याजितेनस्वयंमहत् १ जयभागितयायुद्धेस्थिरस्त्वितियुधिष्ठिरः
पांचजन्यादिशंखास्तेप्रसिद्धाःस्वस्वनामभिः २ उक्ताःपांडवसेना
यांभवत्सैन्येनकोपिहि ३ ॥ १६ ॥

नीलकंठी ॥

१६ ॥

आनंदी टीका

स्वगमोर्थः ५

रामकंठी टीका

स्पष्टार्थम् ५

लासिकी [illegible]ी टीका ॥

अनंतेति युधिष्ठिरस्य अनंतविजयाख्यो रा
जा युधिष्ठिरो दध्मौ नकुलः सुघोषाख्यं सहदेवो मणिपुष्पक
नामकम् ५ ॥

रणवीरसमिद्धोधिनी ॥

स्पष्टः १८॥

67

भाषा अनुवाद

अनन्तविजयनाम शंख कुन्तीनन्दन युधिष्ठिरने बजाया और सुघोषनाम शंख नकुल और मणिपुष्पनाम सहदेवने बजाया १६ ॥

दोहा ॥

नृपतियुधिष्ठिरकुंतिसुतअनंतविजयजिहनाम शंखसुघोष
मणिपुष्पकहुंनकुलसहदेवअभिराम १६ ॥

काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

अन्येषामपि तत्पक्षीयाणां राज्ञामेकमत्यं विज्ञापयन् धृतराष्ट्रस्य दुराशां संजयो व्युदस्यति काश्यश्चेत्यादिना १७ ॥

स्वामिकृतटीका ॥

काश्यश्चेति चापरे काश्यः काशिराजः परम उत्कृष्ट इष्वासो यत्र यस्य स परमेष्वासः पुनः शिखंडी महारथः शिखंडवान् सकल सुरासुरजयी भीष्मवधार्थमुत्पन्नः पौरुषयशिखाशुक्तश्चापरे धृष्टद्युम्नः विराटश्च सात्यकिः स एवापराजितो जेयः एते सर्वे पृथक् पृथक् शंखान् दध्मुर्वादयांचक्रुरिति परेणान्वयः १७

रामानुजभाष्यम् ॥ आदिश्लोके गतार्थम्

यतिराजमुनिर्भेद एवं नहि जयाभिकाङ्क्षिणः ॥ १७

अभिनवगुप्तकृतटीका ॥ १७ नास्ति

परमार्थप्रपा टी॰ १७ ॥ नास्ति

वनमाली टी॰ १७ नास्ति

उत्तमवैजयन्ती टीका ॥

काश्यश्चेति परमेष्वासः श्रेष्ठधनुर्धरः काश्यः काशीराजः महारथः शिखंडी अपराजितः सात्यकिश्च १७ ॥

मधुसूदनी ॥ १७

॥ परमेष्वासः काश्यो महाधनुर्धरः काशिराजा. नपराजितः पारिजातहरणबाणयुद्धादि महासंग्रामेष्वेकाद्दशः सात्यकिः ॥

सदानंदी टी॰ ॥

महाधनुर्द्धरः काशिराजश्चान्ये महारथः शिखंडी धृष्टद्युम्नाद्याजयशीलश्च सात्यकिः १ द्रुपदाद्यादरानदध्मुः स्पष्ट राजन्समाहितः २ १७ ॥

नीलकंठी ॥

१७ ॥

69

ज्ञानेश्वरी टीका

स्पष्टार्थम् १७

रामकण्ठी टीका

स्पष्टमोऽर्थः १७

लालसिकी [illegible] टीका ॥

काश्यराजः उत्कृष्टधन्वा, विपक्षैरजितः महारथः शिखण्डी चापराजितः सात्यकिश्च द्रष्टव्यः काश्यकः शंखानुदध्मुरिति परेणान्वयः १७ ॥

(margin: परैरजितः)

रणवीरसमिद्धोधिनी ॥

स्पष्टः १७॥

90

भाषा अनुवाद ॥

और धनुर्धारी काशीराज शिखण्डी और धृष्टद्युम्न तथा विरा
ट राजा और युद्धमें अपराजित जो सात्यकी १७ ॥

दोहा ॥

काशप धनुषधारी बडे अरु सिखंडी महारथ धृष्टद्युम्न विराट
पुन सातकि जीत समरथ १७ ॥

71

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रः श्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् १८ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

द्रुपद इति परमेष्वासादिविशेषणलक्षणचतुष्टयं प्रत्येकं संबध्यते १८ ॥ स्वामिकृतटीका ॥

द्रुपद इति हे पृथिवीपते धृतराष्ट्र द्रुपदश्चान्ये द्रौपदेया द्रौपदीपुत्राः चापरे महाबाहुः सौभद्रः एते सर्वे पृथक् प्रत्येकं शंखं दध्मुः १८ ॥

रामानुजभाष्यम् आदिश्लोके गतार्थम्

धृतराष्ट्राय संजयो कथयत् ॥ १८ ॥

अभिनवगुप्तकृतटीका १८ ॥ नास्ति

परमार्थप्रपा १८ ॥ नास्ति

वनमाली १८ नास्ति

उत्तमवैजयन्ती टी॰ ॥

द्रुपद इति द्रौपदेया द्रौपदीपुत्राः प्रतिविंध्यादयो महाबाहुः सुभद्रापुत्रोऽभिमन्युश्च हे पृथिवीपते धृतराष्ट्र काश्यादयः सर्वे एते पृथक् पृथक् स्वान् स्वान् शंखान् दध्मुः वादयामासुः १८ ॥

मधुसूदनी ॥

परमेष्वासः काश्यो महाधनुर्धरः काशिराजोऽपराजितो [illegible] इति [illegible] युद्धादिमत्सु संग्रामेषु [illegible] हे पृथिवीपते धृतराष्ट्र स्थिरो भूत्वा श्रृणु इत्यभिप्रायः सुगममन्यत् १८ ॥

सदानंदी टी॰ ॥ १८ ॥

नीलकंठी टी॰ ॥ १८ ॥

आनंदी टीका

स्पष्टम् ५

रामकंठी टीका

स्वगमोर्थः ५

द्रुपदो लासिकी [illegible] टीका ॥ स्ते हेममहीपते धृत

राष्ट्र द्रौपदीपुत्रः पंच अभिमन्युः शंखोन् पृथक्पृथक् द

ध्मुः ५ ॥

रणवीरसमितिहोयिनी ॥

पृथिवीपते धृतराष्ट्र १८ ॥

भाषा अनुवाद ॥

और द्रुपद राजा तथा द्रौपदीके पांच पुत्र प्रतिविन्ध्यादि और सु
भद्राके पुत्र महाबाहु अभिमन्युजीहैं हे पृथ्वीनाथ धृतराष्ट्रयेस
बके सब भिन्न भिन्न शंखध्वनि करनेलगे १८ ॥

दोहा ॥

द्रुपदऔर द्रौपदीतनयमहाबाहुअभिमन्य भिन्नभिन्न बाजत
सम हि शंख शाहून्ट्पधन्यं १८॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् नभ
श्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका ॥

तैस्तै राजभिः शंखानापूरयद्भिरापादितो महान् घोषस्तुमुलो ऽ
तिभैरवो नभश्चांतरिक्षं पृथिवीं च भुवं लोकत्रयं सर्वमेव वि
शेषेणानुक्रमेण नादयन् नादयुक्तं कुर्वन् धार्तराष्ट्राणां दुर्यो
धनादीनां हृदयान्यंतःकरणानि व्यदारयत् विदारितवान् प्र
त्यते हि तत्प्रेरितशंखघोषश्रवणात्त्रैलोक्याक्रोशो नश्चपश्चादेव
तां तेषां हृदयेषु दीप्यमानत्वेन तदाह स घोष इति १९ ॥

स्वामिकृतटीका ॥

तस्य शंखनादस्य धार्तराष्ट्रान्प्रति भयजनकत्वं संजयश्चाह स घो
ष इति स घोषस्तुमुलो घोरः पांडवसेनापतीनां शंखादिजो घो
षो धार्तराष्ट्राणां त्वदीयानां हृदयानि व्यदारयत् विदारितवान्
किं कुर्वन् नभश्चाकाशं पृथिवीं च व्यनुनादयन् प्रतिशब्दं कारयन्
प्रतिध्वनिभिरापूरयन्नित्यर्थः १९ ॥

रामानुजभाष्यम् ॥ आदिश्लोकेगतार्थम्

अथ व्यवस्थितानित्यारभ्य भीष्मद्रोणप्रमुखत इत्यंते ॥ १९

अभिनवगुप्तकृतटीका १९ ॥ नास्ति

परमार्थप्रपाटी॰ ॥

स घोष इति स पांडवसैन्यसंभूतो घोषो धार्तराष्ट्राणां त्वदीयानां हृद
यानि व्यदारयत् व्याकुलीकृतवान् किंभूतस्तुमुलो भयानकः ।
किं कुर्वन् नभश्च पृथिवीं च व्यनुनादयन् प्रतिशब्देनापूरयन् १९

वनमाली टी॰ ॥

नभः पृथिवीं व्यनुनादयन् प्रतिध्वनिभिरापूरयन् स घोषो धार्त
राष्ट्राणां त्वत्पुत्राणां हृदयानि व्यदारितवान् १९ ॥

कुसुमवैजयन्तीटी॰ ॥

किं च स घोष इति तुमुलो नितीव्रः सः शब्दो नभः पृथिवीं च व्यनुना

दयन्नतिध्वनिभिरापूरयन्सन् धार्तराष्ट्राणांदुर्योधनादीनांचका
राज्ञीष्मद्रोणादीनांहृदयानिव्यदारयत् यादृशीपीडाहृदयवि
दारणेनोत्पद्यतेतत्सदृशींपीडांजनितवानित्यनेनाधैर्यवासम्हल
विनष्टमितिदुर्योधनादयोमेनिरे १९ ॥

मधुसूदनी ॥

धार्तराष्ट्राणांसैन्येशंखादिध्वनिरतितुमुलोपिनपांडवानांक्षोभ
कोबभूव पांडवानांसैन्येजातस्तुशंखघोषोधृतराष्ट्रस्यतवसंबं
धिनांसर्वेषांभीष्मद्रोणादीनामपिहृदयानिव्यदारयत् हृदय
विदारणतुल्यांव्यथांजनितवानित्यर्थः यतस्तुमुलोऽतितीव्रो
नोनभश्चपृथिवींचप्रतिध्वनिभिरापूरयन् १९ ॥

सदानंदी टी॰ ॥

यःसैन्येधार्तराष्ट्राणांशंखादीनांध्वनिर्महान् पांडवानांसैन्येवा
भूत्क्षोभकोवलिनांसतां १ पांडवानांसजातस्तुशंखघोषोमहत्त
रः तवसंबंधिनांभीष्मद्रोणादीनामपिव्यथां २ हृदयाणामज
नयद्विदारणसमांपरां प्रतितीव्रोनभोभूमिंपूरयन्प्रतिशब्दतः ३

नीलकंठी ॥ १९ ॥ १९

आनंदी टीका

नभश्च पृथिवीं चैवाभितस्तुमुलं अनुनादयत् शब्देन प्रतिश
ब्देन पूरयितवान् इत्यर्थः १९ ॥

रामकंठी टीका

स्पष्टार्थं १९ [भीष्मादीनां हृदयानि विदारितवान्]

लाक्षिकी [illegible] टीका

स पांडवानां घोषः शंखशब्दो धृतराष्ट्रसंबंधीनां हृदयविदारण
कर्त्ता हृदयानि विदारितवान् जनितवानित्यर्थः प्रतिशब्देन कारयत् १९
[कथंभूतः शब्दः]

रणवीरसमिद्धोधिनी ॥

स इति पांडवसैन्यशंखवादनध्वनिः धार्तराष्ट्राणां धृतराष्ट्रस्य
तवसंबंधिनां भीष्मद्रोणादीनामपि हृदयान्यंतःकरणानि वि
दारितवान् युज्यते चैवं यतो रोदसी विशेषेण सर्वव्याप्यानुक्रमे
ण नादप्रक्रोंकुर्वन् सर्वप्राणप्रेरणेन माधवादिभिः प्रवित
तात् १९ ॥

भाषा अनुवाद

वही उन सर्वोंकी शंखध्वनिने तुमारे पुत्र ओर पक्षपातियों के हृदयको विदीर्ण करदिया ओर आकाश ओर पृथिवीतलमे व्याप्त होती हुई प्रतिध्वनिरूपसे १९ ॥

अथव्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः २० ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

दुर्योधनादीनां धार्तराष्ट्राणामेवंभयप्राप्तिं प्रदर्श्य पार्थादीनां पाण्डवानां तद्वैपरीत्यमिदानीमुदाहरति अथेत्यादिना भीतिप्रत्युपस्थितेरनंतरं पलायने प्राप्तेऽपि धैर्यमुत्पाद्य व्यवस्थितानप्रचलितानेव परान् प्रत्यक्षेणोपलभ्य हनूमतैव वानरवरेण ध्वजलक्षणेनैवना दायावस्थितोऽर्जुनो भगवन्तमाह [illegible]तिसम्बन्धः किमाहेत्यपेक्षायामिदं वक्ष्यमाणं हेतुमद्वचनमित्याह वाक्यमिति कस्यामवस्थायामिदमुक्तवानिति तत्राह प्रवृत्त इति शस्त्राणामिषूणा[illegible]मप्रभृतीनां सम्पातः समुदायस्तस्मिन् प्रवृत्ते प्रयोगाभिमुखे सतीति यावत् किं कृत्वा भगवन्तं प्रत्युक्तवानिति तदाह धनुरिति महीपतिशब्देन राजा प्रज्ञाचक्षुः संजयेन संबोध्यते २० ॥

स्वामिकृतटीका ॥

एतस्मिन्समये श्रीकृष्णमर्जुनो यद्विज्ञापयामास तच्चतुर्भिः श्लोकैः संजय आह[illegible]थेति अथ शौर्यवृत्तेरनंतरं कपिध्वजोऽर्जुनो व्यवस्थितान् युद्धोद्योगेन स्थितान् विशेषेणोत्साहेनावस्थितान् स्वशौर्येण वा नादा दौरवत दर्प[illegible]परिभूतान् धार्तराष्ट्रान्दृष्ट्वा शस्त्रसंपाते उत्साहफले च धार्तराष्ट्राणां प्रवृत्ते सति धनुरुद्यम्य सज्जीकृत्य ॥ २० ॥

रामानुजभाष्यम् ॥ अथव्यवस्थितानित्यारभ्य भीष्मद्रोणप्रमुखतेत रत्यन्तम्

अथयुयुत्सूनवस्थितान्धार्तराष्ट्रान्भीष्मद्रोणप्रमुखान्वीक्ष्य [illegible] नू

अभिनवगुप्तकृतटीका ॥ २० नास्ति

परमार्थप्रपा टी० ॥

ततः किंवृत्तमित्यत आह अथेति कपिध्वजोऽ[illegible]र्जुनश्चतुर्भिः श्लोकैः कृष्णं विज्ञापयति [illegible] दुर्योधनस्य [illegible] २० ॥

वनमाली टी० ॥

पांडुतनयोऽतान ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधिं स्वसंकल्पकृत जगदुदयविभवलयलीलं हृषीकेशं परापर निखिललोकान्तर्यामि सर्वकरणानां सर्वप्रकारकनियमने व्यवस्थितं समाश्रितवात्सल्यविवशतया स्वसारथ्ये व्यवस्थितान् युयुत्सूनेतान्समतान्यावदहं निरीक्षे तावदुभयोः सेनयोर्मध्ये रथं स्थापयेति जगाद तथा चोदितस्तत्क्षणादेव भीष्मद्रोणादीनां सर्वेषामेव महीक्षितां प्रमुखे [illegible] अकरोत् ईदृग्भवदीयानां जयस्थितिरित्युवाच इति रामानुजभाष्यं।

अथार्जुनो हरिं विज्ञापयामासेत्याह अथेति चतुर्भिः व्यवस्थितान्
स्थितान् युद्धार्थं प्रवृत्ते प्रवर्तयितव्ये शस्त्रसंपाते युद्धे धनुरुद्यम्य २०

जहमेवैजयन्तीटी० ॥

इत्थं त्वदीयानां दरध्वनिभिः कुंतीपुत्रादीनामस्तु भिन्नं हृदयान्यस्मा
सन्नथ च पांडुपुत्राणां शंखशब्दैस्तावकानां हृदयानि विदीर्णान्य
भवन्नित्युक्तमिदानीमर्जुनस्य निर्भयत्वेनातिशूरत्वं वर्णय,
त्यथेति चतुर्भिः अथ व्यवस्थितानिति अथ स्वसैन्यशंखनादानं
तरं व्यवस्थितान् विशेषेण युद्धालंकारभूषितेनावस्थितान् धार्त
राष्ट्रान् धृतराष्ट्रपुत्रान् दृष्ट्वा कपिर्वायुपुत्रो ध्वजे यस्य सोऽर्जुनः श
स्त्रसंपाते प्रवृत्ते युद्धे प्रारब्धे सति गांडीवनामधनुरुद्यम्य ज्यास
ज्जीकरणपूर्वकं वामकरेणोद्धृत्येदं वाक्यमाहेत्युत्तरेणान्वयः पा
ण्डवः प्रकर्षेणैव भूविजयिनो धर्मशीलस्य राज्ञः पांडोः पुत्रः २०

इत्यनेन राजपुत्राः पाण्डवा एव राज्यार्हाः अन्यस्तत्र पूर्वमेव नर्हत्वं निरूपितं श्वासादिभिरत्त स्तत्र वाधिराज्यानर्हत्वेन स्तुतस्तां त्वत्पुत्राणां राज्यानर्हता राज्येच्छाभिलाषस्त्वेति निरूपितम्

मधुसूदनी ॥

भीति प्रत्युपस्थिते रनंतरं पलायने प्राप्तेपि तद्विरुद्धतया युद्धोद्योगे
नावस्थितान्नेव परान् प्रत्यक्षेणोपलभ्य तदा शस्त्रसंपाते प्रवर्तमा
ने सति वर्तमाने कुतः कपिध्वजः पांडवैर्हनुमता महावीरेण ध्वज
रूपतयानुगृहीतोऽर्जुनः सर्वथा भयशून्यत्वेन युद्धाय गांडीवं धनु
रुद्यम्य हृषीकेशमिंद्रियप्रवर्तकत्वेन सर्वांतःकरणवृत्तिज्ञं श्री
कृष्णमिदं वक्ष्यमाणं वाक्यमाहोक्तवान् नत्वविमृश्यकारितया
स्वयमेव यत्किंचित्कृतवानिति परेषां विमृश्यकारित्वेन नीति
धर्मयोः कौशलं वदन्नविमृश्यकारितया परेषां राज्यं गृहीतवान
सीति नीतिधर्मयोरभावात्तव जयो नास्तीति महीपते इति संबोध
नेन सूचयति २० ॥

धार्तराष्ट्राणां भयप्राप्तिं प्रदर्श्य पांडवानां तद्विपरीतमुदाहरति अथेत्यादिना

सदानंदी ॥

इत्येवं धार्तराष्ट्राणां भयप्राप्तिं प्रदर्श्य सः संजयः पांडवानां तु महत्
त्वं दर्शयन्नाह अथ १ धार्तराष्ट्रान् रणोद्योगे दृष्ट्वा व्यवस्थितान् रिपून् प्र
वर्तमाने सत्येव शस्त्रसंपाते उद्यतः २ ध्वजरूपतयात्मनवीरेण
स्थितहनूमता अर्जुनोऽनुगृहीतश्च गांडीवं धनुरुद्यम्य ३ उद्यम्याह
हृषीकेशं सर्वथीहनिमातिणं वक्ष्यमाणमिदं वाक्यं नीतियुक्तं।

महीपते ॥ ४ स्वपक्षप्रतिपक्षात्मसेनयोरुभयोरथं मध्ये संस्थाप
येत्येवं सर्वेश्वरोपि नियुज्यते ५ किमशक्यं हि भक्तानां हृक्षपाद्या॰
नुरागिणं यदीश्वरोपि भक्तानां नियोगमनुतिष्ठते ६ पांडवानां।
जयोवश्यमित्येवं तेन सूच्यते मां रथं स्थापयंतं तेव्यावधिष्ठानेश
त्रवः ७ रथादित्येवमाशंक्य संबोधयत्यच्युतेति च देशकालाद्य
नुरूपं तेकस्युवयितुमर्हसि ८ सर्वथा निर्विकारत्वान्नियोगेपि
कोपवान् ९ २१ ॥ नीलकंठी ॥

व्यवस्थितान् उभयोद्दिक्षुतयावैषम्येणावस्थितान् कपिध्वजपांड
वपदाभ्यां भीषणध्वजत्वं शौर्यं च प्रदर्श्यते २१ ॥

आनंदी टीका

व्यवस्थितान्विविधंयथाभागमवस्थितान् तदेववाक्यमर्जुन
उवाच ॥ २० ॥

रामकंदी टीका

स्पष्टार्थम् २०

ल्लासिकी धार्तराष्ट्रान् [illegible] टीका

अथशंखश्रवणानन्तरं ^ युद्धार्थं व्यवस्थितान् संज्ञाय दृष्ट्वा ^ अ
र्जुनः ^ प्रवृत्तेसति संपातेसंयोगे गांडीवंनामधनुरुद्यम्य २०

कपिध्वजः पांडवः

शस्त्राणां

रणवीररससिद्धोधिनी ॥

अथंदुर्योधनादीनांशंखध्वनिश्रवणमात्रेणक्षोभमुक्त्वापांड
वानांतद्भावं दर्शयति अथेति भीतिप्रादुर्भावादनंतरं व्यव
स्थितान् धैर्यमालंब्यसंभ्रमरहितएवस्थितान्पुनः प्रचलितान्धा
र्तराष्ट्रान्दुर्योधनादीन्निस्पन्दृष्ट्वा साक्षादुपलभ्यशस्त्राणांबा
णखड्गादीनांसंपातेसमुदाये प्रवृत्ते प्रयोगाभिमुखेसति ध
नुरुद्यम्यधृत्वा एतेनातिधीरत्वंप्रकाशितं कपिर्हनुमान्ध्वजे
यस्यसपांडवोर्जुनः २०॥ संबंधः

80

रामचंद्रसरस्वतीकृतटीका ॥

अथेति अथ रणतूर्यघोषानंतरं व्यवस्थितान्सम्यगागतेन विरुद्ध
तया युद्धसज्जतया वा व्यवस्थितान्दुर्योधनादीन्वीक्ष्य तदा शस्त्रसंपाते प्र
वृत्तकालेऽपि कपिध्वजः अविमृश्यकारी सध्रीचीनोऽपि शत्रुजनाय
विमृश्यकारीव वचनाहृतराष्ट्रपुत्रद्रवनाविमृश्यकार्यभूत् किं
तु पांडवः पवित्रस्य राज्ञां गुणेनः पुत्र हृषीकेशमिदं [illegible]
[illegible] धनु
[illegible] दुर्योधना [illegible]
हृतमित्यर्थः महीपते इति संबोधनं [illegible] वाक्यम
नुसरति सेनयोरिति ॥ २०

भाषा अनुवाद

इससमयमें अर्जुन श्रीकृष्णजी को जो जनाया सो चार श्लोक से संजय प्रगट करतेहैं कि हे महाराज धृतराष्ट्र इस प्रकार शंखध्वनि होने परभी तुमारे पुत्र लोगोंकी उत्साह युद्धमें देखि कपिध्वज अर्जुन धनुषचढाय उसकाल भगवानसे यह बात कही १९ ॥

दोहा ॥

धनुउठाय अर्जुनपुनकौरव को तिहकाल युद्धसमयमें देषके षडेजोसूर विशाल २०॥

उभयोः सेनयोर्मध्ये रथं स्थापयाच्युत

श्रानंदी टीका ॥

उभयोः पक्षप्रतिपक्षभूतयोः [illegible] २१

रामकंठी टीका

स्पष्टार्थः २१

तदाश्रीकृष्णं लासिकी वदेस्वच्युतमेरथं

[illegible]री टीका

हे धृतराष्ट्र इदं वक्ष्यमाणं वाक्यमुवाच सेनयोरुभयोर्मध्ये रथं स्थापय २१ नान्ययोजनमाह ॥

रणवीरसमिद्बोधिनी ॥

हृषीकेशं श्रीकृष्णं सारथ्ये सज्जीभूतमिदं वक्ष्यमाणं वाक्यमाहे तिसंबंधः महीपते इति संजयेन धृतराष्ट्रः संबोध्यते तदेव वाक्यं प्रस्तौति सेनयोरिति उभयोः समीपस्थितयोः सेनयोर्मध्ये ममरथं स्थापय २१ ॥

हृषीकेशमिन्द्रियप्रवृत्तिप्रवर्तकत्वेन तदन्तःकरणस्थमिदं वक्ष्यमाणवाक्यमाहोक्तवान्
धनुरुद्यम्येत्यस्यापृष्ठसता तस्य द्योत्यते ऊर्ध्वबाहुर्नैतद्विति पवृत्तत्व धिज्यंकृतमित्यर्थः
महीपते इति संजयेन धृतराष्ट्रः संबोध्यते तद्वाक्यमनुवदति सेनयोरिति

रामचंद्रसरस्वतीकृतटीका

व्यधिकरणे षष्ठ्यौ उभयोः पांडवकौरवयोः सेनयोर्मध्ये रथं स्थाप
य स्थिरीकुरु ननु यत्किंचिद्गृहीत्वा पत्त्याद्विवचने नन्वेवं रथः
स्थापयेत मामेते युध्याचार्यविषयंतीति तदीयाशंकां संभाव्य स
बोधयति अच्युतेति देशकालवस्तुपरिच्छेदत्वात् त्वां कालोऽपि व अप्रा
यिष्यतीति भावः ननु किमर्थं रथः स्थापनीय इत्याशंकायां सहेतु
प्रयोजनमाह ॥ २१ ॥

85

भाषा अनुवाद

श्रीकृष्णसे अर्जुन इतनीही बात कही कि हे अच्युत दोनोदलके बीच मेरे रथको खड़ाकरो २१ ॥

दोहा॥

हे राजा श्रीकृष्णको वाक्य कहे तब पार्थ दोनो सेनामध्यमें दिहा स्थिति कावो रथ २१ ॥

यावदेतान्निरीक्षेहं योद्धुकामानवस्थितान् कै
र्मयासह योद्धव्य मस्मिन्रणसमुद्यमे २२ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

मध्ये रथं स्थापयेत्युक्तं तदेव रथस्थापनस्थानं निर्धारयति या
वदिति एतान् प्रतिपक्षत्वेन प्रतिष्ठितान् भीष्मद्रोणादीनस्माभिः
सार्द्धं युद्धमपेक्षमाणान् यावद्गत्वा निरीक्षितुमहं क्षमः स्यां तावति
प्रदेशे रथस्य स्थापनं कर्तव्यमित्यर्थः किञ्च प्रवृत्ते युद्धारम्भे
बहवो राजानोऽस्मिन् युद्धभूमावुपलभ्यन्ते तेषां मध्ये कैः सह
मया योद्धव्यं न हि क्वचिदपि मम गतिप्रतिहतिरस्तीत्याह कैर्म
येति २२ ॥

स्वामिकृतटीका ॥

यावदिति अहमेतान्प्रधानवीरान् योद्धुकामानवस्थितान् या
वत् निरीक्षणपूर्वकं परीक्षां करोमि न तु त्वं योद्धा न तु युद्धप्रेक्षक
इत्याह कैरिति अस्मिन् रणसमुद्यमे मया कैः सह योद्धव्यं युद्धं क
र्तव्यमित्यर्थः २२ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

जगद्दलविगलयलीलं हृषीकेशं परावरदिविललोकांतर २२

अभिनवगुप्तकृतटीका २२ ॥ नास्ति

परमार्थप्रपाटी० ॥

किमुवाचेत्याह ॥ २२ ॥

वनमाली टी० ॥

किमर्थं रथस्थापनमत आह यावदिति २२ ॥

उत्तमवैजयन्तीटीका ॥

ननूभयोर्मध्ये रथस्थापनस्य किं प्रयोजनमिति चेत्तत्राह यावदिति
योद्धुकामान् न तु संधिकामानवस्थितान् निर्भयेन स्थितान्नेतान्
भीष्मद्रोणादीन् यावत्कालपर्यन्तं स्थित्वाहं योद्धा निरीक्षे तावत्स्था
पयेति पूर्वेणान्वयः ननु युद्धकर्तृत्वेन त्विन रवद्दृश्योस्ते तेषां दृश्यस्ते
निरीक्षणेन तव किं प्रयोजनं भवत्यतीति चेत्तत्राह कैर्मयेति अस्मि
न्निरीक्षणविषयभूते रणसमुद्यमे संग्रामोद्योगे कैर्वीरैः सह मया यो

गी॰
टी॰
अ॰

द्धव्यं युद्धं कर्तव्यमस्ति महदेतन्मे कौतुकमुत्पद्यते। तस्मात् द्रष्टुमि
च्छामीत्येतदेव रथस्थापनप्रयोजनमिति भावः॥ २२॥

मधुसूदनी टी॰॥

मध्ये रथस्थापनप्रयोजनमाह

योद्धुकामान् न त्वस्माभिः संधिकामान् [illegible] अवस्थितान् न तु भयात्प्रच
लितान् एतान् भीष्मद्रोणादीन्यावदहं निरीक्षितुं क्षमः स्यां ता
वदस्मिन्देशे रथं स्थापयेत्यर्थः। यावदिति कालपरं वा न तु त्वं योद्धा
न तु युद्धप्रेक्षकोऽसि तत्तव किमेतेषां दर्शनेनेत्यत आह कैरिति अ
स्मिन् रणसमुद्यमे बंधूनामेव परस्परं युद्धोद्योगे मया कैः सह यो
द्धव्यं मत्कर्तृकयुद्धप्रतियोगिनः के के मया सह योद्धव्यं किंक
र्तृकयुद्धप्रतियोग्यहमिति च महदिदं कौतुकमेतत्ज्ञानमेव
मध्ये रथस्थापनप्रयोजनमित्यर्थः॥ २२॥

सदानंदी टी॰॥

मध्ये किं स्थापनस्यास्ति फलमत्राह पांडवः योद्धुकामान् न चास्माभिः
संधिकामानवस्थितान् १ भीष्मद्रोणादिकानेतान्यावदहं त्वा निरी
क्षितुं क्षमोऽहं स्यां रथं तावन्मद्देशे स्थापयाच्युत २ योद्धा त्वमसि नो
युद्धप्रेक्षकः किं दिदृक्षया तवैषामिति शंकायामर्जुनः प्राह सद्व
चः ३ अन्योन्यमेव बंधूनां युद्धोद्योगे मया सह कैर्योद्धव्यं मया प्र
योद्धव्यं कैः सहेति वा ४ २२॥

नीलकंठी टी॰॥

रथस्थापनप्रयोजनमाह यावदिति कैः सह मया योद्धव्यं मया स
ह वा कैर्योद्धव्यमित्युभयत्र सहशब्दसंबंधः के वा मां जेतुं यतंते मे
या वा के जेतव्या इत्यालोचनार्थमित्यर्थः॥ २२॥

आनंदी टीका मध्ये स्थापन प्रयोजनमाह यावदिति

स्पष्टम् २२

रामकंठी टीका

स्पष्टार्थः २२

...प्रयोजनमाह यावदिति लासिकी [illegible] टीका ॥ पश्यामि कुतः अस्मिन्युद्धोद्योगे ॥

यतोऽहमेतोरेतान् सन्नद्धान् युयुत्सून्वीरान् तत्प्रयोजनमाह
यावदिति कैः सह युद्धं कर्तव्यं इत्येतदर्थं निरीक्ष्ये पश्यामि २२

मयायोद्धव्यं

रणवीरसमिद्धोधिनी ॥

तत्स्थापनप्रयोजनमाह यावदिति एतान्भीष्मद्रोणादीन् युद्धा
भिलाषिणोवस्थितान्युद्धभूमौसमेत्यस्थितान् यावान्निरीक्षेनि
रीक्षिष्ये अत्र यावद्योगे भविष्यतिकाले लट् युद्धस्थापनावधिमा
ह यावदिति यावद्देशंगत्वा यावत्कालपर्यंतंवा निरीक्षणसम
र्थः स्यामिति तावद्देशंप्राप्यतावत्कालपर्यंतंवा रथंस्थापयेति
भावः ननु यःसमीपमेत्य युद्धाय भवंतमाह्वयते तेन त्वं युद्ध्यस्वे
ति किमग्रेगत्वानिरीक्षणेनेत्याह कैरिति अस्मिन्रणसमुद्यमे
समागतानां राज्ञांमध्येकैः सार्धंमयायोद्धव्यमिति २२ ॥

रामचंद्रसरस्वतीकृतटीका ॥

यावदिति एतान्योद्धुकामान् न तु युद्धाभिनिविष्टान् अवस्थि
तान् न तु प्रचलितान् यावन्निरीक्षे निरीक्षितुं नन्वेवंविधानामपि
निरीक्षणेन तव कः पुरुषार्थ इत्यत आह कैरिति मयाऽर्जुनेन यद्यप्येत
ज्ज्ञातं तत्र समागता अमित्राः युद्धे दुर्बुद्धेर्धार्तराष्ट्रस्य प्रियचिकी
र्षवो न तु दुर्बुद्ध्यपनयनादौ भीष्मद्रोणादयस्तान् [illegible]न्योन्यामा
नानित्यहमेवेक्ष इत्यध्याहारेण योज्यं इतीति कथमत आह अ
स्मिन् रणसमुद्यमे बहूनामेव रणसमुद्यमे युद्धोद्योगमयाकैः स
ह योद्धव्यं मत्कर्तृकयुद्धप्रतियोगिनः के इति कैर्मया सह यो
द्धव्यं किंकर्तृकयुद्धप्रतियोगपदमिति च महदिदं कौतुकं अवे
क्ष इतीदमेव प्रयोजनमिति भावः यद्वा कैर्मयेति पूर्ववदेवमु
र्वेशेषत्वेन व्याख्येयं ननु युद्धोद्यता एवैते सर्वे तत्र किमेवं निरी
क्षणेनेत्यत आह ॥ २२ ॥

भाषा अनुवाद ॥

जो कहो कि क्या तमासगीरहो तुमतो आप योद्धा लडनेवाले हो इससे सेनाके मध्य रथ किसलिये खडा किया जायगा इस बातपर कहतेहैं उतनीदेर रथखडाकरो जबतक हमदेखें कि युद्धकी कामना करि खडी भई सेनाके बीच किसके साथ लडना हमें उचितहै २२ ॥

दोहा

जितनेहों देषतश्रनहिं रवडे युद्धकेहेत काकेसंगयुद्धयोग मोहिहेरणवीरसमेत २२॥

90

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्तरा
ष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

प्रतियोगिनामभावे कथं तत्र युद्धोत्सुकत्वं फलवद्भवेदिति तत्रा
ह योत्स्यमानानिति ये केचिदेते राजानो नानादेशेभ्योऽत्र कुरुक्ष
ेत्रे समवेतास्तानहं योत्स्यमानान् परिगृहीतप्रहरणोपायान्
नितरां संग्रामसमुत्सुकानुपलभे तेन प्रतियोगिनो बाहुल्यमि
त्यर्थः तेषामस्माभिः सह पूर्ववैराभावे कथं प्रतियोगित्वं प्रक
ल्प्यते तत्राह धार्तराष्ट्रस्येति धृतराष्ट्रपुत्रस्य दुर्योधनस्य दुर्बुद्धेः
स्वरक्षणोपायमप्रतिपद्यमानस्य युद्धाय संरम्भं जनयतो युद्धे यु
द्धभूमौ स्थित्वा प्रियं कर्तुमिच्छवो राजानः समागता इत्युपलभे तेन
तेषामौपाधिकमस्मत्प्रतियोगित्वमुपपन्नमित्यर्थः २३ ॥

स्वामिकृतटीका ॥

योत्स्यमानानिति अहं योत्स्यमानानवेक्षे युद्धं करिष्यतः अवेक्षे ॥ नि
ईरयाप्रियपतेत्र मम तव च समागमे दुर्बुद्धेरविचारकारिणो धा
र्तराष्ट्रस्य दुर्योधनस्य युद्धे युद्धस्थले प्रियचिकीर्षवः प्रियं विजयं
कर्तुकामाः समागताः अगलभ्यातिरेकेण सम्यक् वीरोचितसमा
रंभेन [illegible] गता [illegible] अविचारकारिण इत्यर्थः तान् यावदहं पश्यामि ता
वदुभयोः सेनयोर्मध्ये रथं स्थापयेत्यन्वयः २३ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

ब.द.सर्वकारणानां सर्वप्रकारकनियमनेनावस्थिते ॥ २३ ॥

अभिनवगुप्तकृतटीका ॥ २३ ॥ नास्ति

परमार्थप्रपा टी० ॥ २३ ॥

नास्ति वनमाली टी० ॥ २३ ॥

धार्तराष्ट्रस्य दुर्योधनस्य दुर्बुद्धेः कूटकारिणो युद्धे प्रियं कर्तुमिच्छन्तो य एतेऽत्र समागताः सन्ति तान्यावन्निरीक्षे तावदुभयोः सेनयोर्मध्ये रथं स्थापयेति २३

उत्तमवैजयन्ती टी० ॥

अथवा किंचान्यानपि युद्धार्थं स्थितानहं द्रष्टुमिच्छामीत्याह योत्स्यमानानिति
दुर्बुद्धेः कपटाचरणस्य धार्तराष्ट्रस्य दुर्योधनस्य युद्धे प्रियचिकी
र्षवः प्रियं कर्तुमिच्छन्तस्तेनात्र स्थाने समागताः सम्यक्प्राप्ताः ये भी

ननु धर्मज्ञा भीष्मद्रोणादयो भवता दुर्योधनादीनां च युद्धोद्योगं त्याजयित्वा परस्परं सन्धिं कारयिष्यन्तीति चेन्नत्याह

ते प्रियकाम्यया न तु स्वपापेनागता ये सर्वस्वमजानन्तस्ते कथं सन्धिं कारयिष्यन्ति न कथमिति भावः

ष्मद्रोणादयस्तान्योत्स्यमानानवीक्षेऽहमवेक्षे ईक्षणविषयीकुर्वे २३ ॥

मधुसूदनी ॥

यएते भीष्मद्रोणादयो धार्तराष्ट्रस्य दुर्योधनस्य दुर्बुद्धेः स्वरक्षणोपायमजानतः प्रियचिकीर्षवो युद्धे न तु दुर्बुद्ध्यपनयनादौ तान्योत्स्यमानानहमवेक्षे उपलभे न तु संधिकामान् अतो युद्धायैतत्प्रतियोगिप्रवलोकनमुचितमेवेति भावः २३ ॥

ननु वंधवृधेतपरस्परं संधिं कारयिष्यंतीति कुतो युद्धमित्याशंक्याह

सदानंदी टी॰ ॥

संधिं ते कारयिष्यंतीति बंधवोन्योन्यमेव चेत् कुतो युद्धं भवेदेवमाशंक्याहार्जुनो वचः १ यएते द्रोणभीष्माद्या धार्तराष्ट्रस्य दुर्मतेः प्रियं चिकीर्षवो युद्धे न तु दुर्मतिनाशने २ योत्स्यमानानहं तांस्तु उपलभे न तु संधिं अतः कौतुकसिद्ध्यर्थं प्रतियोगिप्रवलोकनं ३ युक्तमित्याशयो भाति पार्थस्यात्र विपश्चितः ४ २३ ॥

कान्

नीलकंठी ॥

योत्स्यमानान् न तु शांतिकामान् यतो दुर्बुद्धेः प्रियं चिकीर्षंति तेन तेषामपि तत्तुल्यत्वं सूचितं २३ ॥

आनंदी टीका

दुर्बुधेःभवतामन्धिंशार्थिनस्यापिहिताहितमज्ञात्वायुद्धायेव प्रवृत्तादुष्टबुद्धिर्यस्य २३ ॥

रामकंठीटी॰

स्पष्टार्थ २३

हमवेवसेयपते त्नासिकी वल्लभी टीका ॥ यपतेद्दष्टब्द्देः ॥

योंवतान् युयुत्सून्नत्रयुद्धस्थलेमिलिताः दुर्योधनस्यदुष्टबुद्धेःप्रियंविः जयलक्षणंकर्तुकामाः २३ ॥

रसावीरसमिश्रोथिनी ॥

ननुबंधुतयैतेसंध्यर्थमेवप्रवृत्ताइति युद्धानवकाशइत्याशंक्याह योत्स्यमानानिति अवास्यांयुद्धभूमौयपतेप्रत्यक्षंसमागतास्तानहंयोत्स्यमानान्युद्धाभिलाषिणोनतुनःसंधिकामानवेक्षे यपश्यामीतितत्रविलोकनंयोग्यमेवेति ननुकथमेषांभवत्प्रतियोगित्वमुपपन्नंपूर्ववैराभावादित्याह धार्तराष्ट्रस्येति दुर्बुद्धेः सरवलणोपायानभिज्ञस्यदुर्योधनस्ययुद्धेप्रियंकर्तुमागताइत्योपाधिकंप्रतियोगित्वमेषामस्त्येवेतिभावः २३ ॥

रामचंद्रसरस्वतीकृतटीका ॥

योत्स्यमानानिति यएतेत्रसमागताभीष्मद्रोणादयःधार्तराष्ट्रो
यंदुर्बुद्धिरसडक्तेनमृष्णेतिपांडवैःसहसामनकरोतिअतोयु
द्धेसत्रपस्थितेनवयमेतस्यप्रियंकरिष्यामइतिसंकल्पासक्ता
स्तेइदानीं योत्स्यमानाःसंतिनवेतियावदीक्ष इतियावच्छुद्धा
त्रुधंगेलेतिशाह्वाध्याहाराभ्यावाख्येयं एवमुक्तोनोक्तमनूद्यसं
जयउवाच ॥ २३ ॥

भाषा अनुवाद ॥

दुर्बुद्धि दुर्योधन का मनोरथ सिद्ध करनेके अर्थ जो राजालो-ग इस युद्धभूमिपर आय इकट्ठे भयेहैं इनको जबतक हम देखै तबलौं रथ दोनों सेनाके मध्यमे स्थापन करो अर्थात् खडा करो ॥ २३ ॥

दोहा ॥

येते इहां इकठे भए देषों रणउतसाह दुर्योधन दुर्बुद्धि को प्रिय चहत रणमाह २३ ॥

संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशेन भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् २४ मू

भाष्यं नास्ति

आनन्दगिरिकृतटीका

एवमर्जुनेन प्रेरितो भगवानहिंसारूपं धर्ममाश्रित्य प्रायशोऽयं ज्ञातीन्निवर्तयिष्यतीति धृतराष्ट्रस्य मनीषां संजयो राजानं प्रत्युक्तवानित्याह संजय इति भगवतो हि भूमेर्भारापहारार्थं प्रवृत्तस्यार्जुनाभिप्रायप्रतिपत्तिद्वारेण स्वाभिसन्धिं प्रतिलभमानस्य परोक्तिमनुसृत्य स्वाभिप्रायानुकूलमनुष्ठानमादर्शयति एवमिति २४ ॥

स्वामिकृतटीका

ततः किं वृत्तमित्यपेक्षायां संजय उवाच एवमिति द्वयं हे भारत धृतराष्ट्र गुडाका निद्रा तस्या ईशेन जितनिद्रेणार्जुनेन भीष्मद्रोणयोः प्रमुखतः अग्रे द्रोणः द्रुतगत्या नयाकुतोरहित इति द्रोणस्तयोः सर्वेषां च महीक्षितां भूमण्डलाधिपानां राज्ञां योद्धृवराणामग्रे इत्युवाच २४ ॥

एवं यथा वर्णित मुक्तो हृषीकेशः उभयोः सेनयोर्मध्ये रथोत्तमं स्थापयित्वा

रामानुजभाष्यम् २४

समाश्रितवात्सल्यविवशतया स्वसारथ्येऽवस्थितः २४ ॥

अभिनवगुप्तकृतटी॰ ॥ २४ नास्ति

परमार्थप्रपा ॥

[illegible] ॥ २४ ॥

वनमाली ॥

हृषीकाणामिन्द्रियाणामीशो नियामितयेन्द्रियप्रेरकः गुडाका निद्रायाईशेन जितनिद्रेण निरालस्येनैवमुक्तः २४ ॥

कुसुमवैजयन्ती टी॰ ॥

अर्जुनवचनविच्छेदार्थं संजय उवाचेति वैशंपायनवाक्यं एवमिति हे भारत गुडाकेशेन जितनिद्रेणार्जुनेनैवमुक्तप्रकारेणोक्तः कथितो हृषीकेश उभयोः कुरुपाण्डवयोः सेनयोर्मध्ये उत्तममग्निदत्तेन दिव्यौघनामानं रथं स्थापयित्वा स्थिरीकृत्योवाचे त्युत्तरेणान्वयः गुडाकेशेनेत्यनेन जितनिद्रत्वादस्य सर्वेन्द्रियसावधानता सूचिता हृषीकेश इत्यनेन सर्वेषामिन्द्रियाणां प्रेरकत्वाद्भगवतः स्वातन्त्र्येण त्वदीयानां शरीरेन्द्रियाणामपि श्रीकृ

ननु निखिलजगज्जन्मादिहेतुर्विधिशिवादिदेवपूजितपादपीठः व्याप्तसर्वकामः सर्वेश्वरः पुरुषोत्तमः श्रीकृष्णो भक्तस्य दर्जुनस्यादेशं किं कृतवान्नैव निधनं राज्ञस्याशयं ज्ञात्वा स्वाभाविकानन्तभक्तवात्सल्यादिगुणगणविशिष्टेन भक्तरक्षणबद्धकृतः सर्वेश्वरोऽपि भगवानधर्माभावाद्यापातदेहः स भक्तेनार्जुनेन यत्कारितं तत्सर्वमकरोत् [illegible] जितनिद्रो इति यत् [illegible] यति

भरतवंशस्यबीजभूतस्त्वन्निमित्तेनापि एषां कुलक्षयोत्पत्ति
स्त्वमेतान्ययापि कथं न वारयसीति सम्बोधनाभिप्रायः

गी. टी. प्र.

स्वाधीनानीति द्योतितम् ॥ २४ ॥

मधुसूदनी ॥

हे भारत धृतराष्ट्र भरतवंशमर्यादामनुसंधायापि द्रोहं परित्यज्य ज्ञातीनामिति संबोधनाभिप्रायः गुडाकाया निद्राया ईशेन जितनिद्रतया सर्वत्र सावधानेनार्जुनेनैवमुक्तो भगवान् अयं मद्भृत्योऽपि सारथ्ये मां नियोजयतीति दोषमासज्य नाजुप्सन् न वा तं युद्धान्न्यवर्तयत् किंतु ॥

एवमर्जुनेन प्रेरितो भगवान् हिंसारूपं धर्ममाश्रित्य आयशो युद्धान्न व्यावर्तयिष्यतीति धृतराष्ट्राभिप्रायमाशंक्य तन्नि वाचिकीर्षुः संजयो धृतराष्ट्रं प्रत्युक्तवानित्याह एवं शोकापनयनः संजय उवाचेति

सदानंदी टी. ॥

भगवान्प्रेरितोऽप्यनेन युद्धाद्व्यावर्तयिष्यति अहिंसाधर्ममाश्रित्येत्येवमाशंक्य संजयः १ प्राह हे भारतेत्येवं स्ववंशोचितमाचर सर्वत्र सावधानेन जितनिद्रेण केशवः २ एवमुक्तोऽप्ययं भृत्यो मां नियोजयतीति च दोषमासज्य नाजुप्सन्न तं युद्धान्न्यवर्तयत् ३ योः सेनयोर्मध्ये भीष्मद्रोणादिसंमुखे अग्निदत्ते रथे दिव्ये स्वयं भगवताश्रितेऽमुष्य स्थापयित्वा समस्तानां गूढभावज्ञ ईश्वरः ४ अर्जुनस्यापि विज्ञाय शोकमोहावुपस्थितौ ५ सोपहासमुवाचेदं स्वभक्तं प्रियमर्जुनं प्रियायाः स्त्रीस्वभावात्तु शोकमोहनिमग्नता ६ तवापि तत्त्वतस्त्वेन तद्धमास्तीति हृद्वचनं युयुत्सुं त्वं जह्न्याश्च निःशोकत्वेन तानिति ७ २४ ॥

नीलकंठी ॥

रथोत्तमं स्थापयित्वोवाचेति द्वयोः संबंधः ॥ २४ ॥

आनंदी टीका
सुगमोर्थः २४

रामकंठी टीका
स्पष्टार्थं २४

मुक्तो लासिकी ~~[struck out]~~ टीका हे भारत धृतराष्ट्र एवं यथोक्तं हृषीकाणींद्रियाणि तेषामीशो नियामकः श्रीकृष्णः गुडाकानिद्रा तस्या ईशेन जितनिद्रेणार्जुनेन सेनयोरुभयोः स्था मध्ये प्यरथं ॥ २४

रणवीरसमिद्धोयिनी ॥

एवमर्जुनेनभृत्यभूतेनापिजगत्स्वामीसत्संसंभ्रमतयास्वसारथ्येनियुक्तस्तयाभगवान्किंस्विन्नप्रकुपितइतितस्यशुद्धान्निवर्तनेनास्मत्पुत्रस्वच्छाभविष्यतीति धृतराष्ट्रमनोरथमाकारादिना संभाव्यसंजयोराजानंप्रत्युक्तवानित्याह संजयइति भगवतोपितथैवकर्तृप्रहृतस्यार्जुनाभिप्रायंवासंनिमित्तंतथैवोपलभ्य स्वाभिसंधानुकूल मनुष्ठानंदर्शयति एवमिति गुडाकानिद्रा तस्याईशेनतजयिनात्साबधानेनार्जुनेनैवमुक्तप्रकारेण प्रेरितोभगवान् ॥ २४ ॥

रामचंद्रसरस्वतीकृतटीका ॥

एवमुक्तइतिद्वाभ्यां हृषीकेशइतिगूढतदाशयज्ञतासूच्य
ते गुडाकेशेनेति गुडाकेशशब्दवाच्यंनिद्रोपलक्षितसर्वकार्य
र्जनवधानत्वमस्यनास्तीतिसूचयति भारतेतिसंबोधयनेरथ
स्योत्तमत्वमेतदेवयत्रभगवान्सारथिः॥ २४ ॥

भाषा अनुवाद ॥

तिसके बाद क्या भया यह कहते हुये संजय बोले कि हे म
हाराज धृतराष्ट्र अर्जुनकी यहप्रार्थना सुनिकै श्रीकृष्णजी
ने दोनो सेनाके बीचमें उसउत्तम रथको लेजायकर खडा
किया २४ ॥

दोहा ॥

हेराजाश्रीकृष्ण नकंदे अर्जुनकेइहभात दोउसेनामध्यमहिं
स्थापयो रथअतिकांत २४ ॥

मू

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति २५ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

भीष्मद्रोणादीनामन्येषां च राज्ञामन्तिके रथं स्थापयित्वा भगवान् किं कृतवानिति तदाह उवाचेति एतानभ्यासे वर्तमानान् कुरून् कुरुवंशप्रसूतान् भवद्भिः सार्द्धं युद्धार्थं संगतान् पश्य दृष्ट्वा च यैः सह त्वया योद्धव्यं तत्त्वावधारय तैः सार्कं युद्धं कुरु नहि त्वत्तेषां शस्त्रास्त्रशिक्षावतां महीक्षितामुपेक्षोपपद्यते सारथ्येन मनः खेदनीयमित्यर्थः ॥ २५ ॥

स्वामिकृतटीका ॥

इतीति किं हे पार्थ एतान् समवेतान् दुष्टुं भीष्मान् कुरून् पश्येत्युवाच २५ ॥

रामानुजभाष्यम् ॥ उपक्रमम् २५

दुष्टुमनेनैतान् समवेतान् यावदहं निरीक्षे तावदुभयोः सेनयोर्मध्ये रथं स्थापयेति जगाद तथा चोदितस्तत्क्षणादेव भीष्मद्रोणादीनां सर्वेषामेव महीक्षितां पश्यतां हृषीकेशो यथोक्तमकरोत् ईदृशं भवदीयानां [illegible] पश्येति [illegible] चोवाच २५ ॥

अभिनवगुप्तकृतटीका ॥ २५ ॥ नास्ति

परमार्थप्रपा टी॰ ॥ [1]

[illegible] २५ ॥

वनमाली टी॰ ॥ २५ ॥ नास्ति

[1] अथ श्रीकृष्णोपि तेनयोर्मध्ये भीष्मद्रोणप्रमुखानां सर्वेषां महीक्षितां राज्ञां च सन्मुखे रथं नीत्वोवाच भोः पार्थ एतान्समवेतान्कुरून्पश्येति [1]

कुरुसमवेजयन्ती टी॰ ॥

बहुत्वात्सैन्यस्य बहुविस्तीर्णत्वाद्रथस्थाननियममाह भीष्मद्रोणप्रमुखत इति भीष्मद्रोणयोः प्रमुखे सर्वेषां महीक्षितां राज्ञां च प्रमुखे तत्सम्मुखे सप्तम्यर्थे तसिल्प्रत्ययः [2] प्रमुखत्वसूचनाय तयोः पृथक्कीर्तनं समवेतान् दुर्योधनस्य प्रियचिकीर्षया संगतानेतान् युयुत्सून् कुरून् कौरवानन्यानपि त्वं पश्य प्रत्यक्षविषयीकुरु इति [3] वा वाच [illegible] २५ ॥ [4] पार्थेति सम्बोधनेन मम पितृष्वस्त्रीयस्त्वं मत्प्रियो न त्वद्धितार्थं त्वत्सारथ्ये भवामि त्वं निःशङ्को नया पश्येति सूचितम् [4]

[2] समासयुक्तोपि च शब्देनाहयतः [2]

[3] सार्वविभक्तिक तसिरिति [3]

मधुसूदनी ॥

सेनयोरुभयोर्मध्ये भीष्मद्रोणप्रमुखतः तयोः प्रमुखतः सर्वेषां च महीक्षितां संमुखे प्रमुखादित्वात्सर्वविभक्तिकस्तसिः चकारेण समासनिविष्टोपि प्रमुखतः शब्द आकृष्यते भीष्मद्रोणयोः पृथक्कथनमतिप्राधान्यसूचनाय रथोत्तमम् अग्निदत्तं दिव्यं रथं तं भगवता स्वयमेव सारथ्येनाधिष्ठितं तथा च सर्वोत्तमं स्थापयित्वा हृषीकेशः सर्वेषां निगूढाभिप्रायज्ञो भगवानर्जुनस्य शोकमोहावुपस्थिताविति विज्ञाय सोपहासमर्जुनमुवाच हे पार्थ पृथायाः स्त्रीस्वभावेन शोकमोहग्रस्ततया तत्संबंधिनस्तवापि तद्वत्तां समुपस्थितेति सूचयन् हृषीकेशत्वमा[त्म]नो दर्शय[ती]ति पृथा मम पितुः स्वसा तस्याः पुत्रोसीति संबंधोल्लेखेनाश्वासयति मम सारथ्ये निश्चितो भूत्वा सर्वानपि समवेतान् कुरून्पश्य त्वं पश्येन निःशंकतयेति दर्शनविषयाभिप्रायः अहं सारथ्यं तु सावधानतः त्वं तु सांप्रतमेव रथित्वं ग[त]ा त्वमसीति किं तव परसेनादर्शनेनेत्यर्जुनस्य धैर्यमापादयितुं पश्येत्येतावत्पर्यंतं भगवतो वाक्यं अन्यथा रथं सेनयोर्मध्ये स्थापयामासेत्येतावन्मात्रं ब्रूयात् २५ ॥

सदानंदी टी॰ ॥ २५ ॥

नीलकंठी टी॰ ॥

महीक्षितो पृथिवी महीक्षितां पृथिवीश्वराणाम् २५

आनंदी टीका

सुगमोऽर्थः २५

रामकंठी टीका

ततस्तथाप्युक्तवदित्यादि सीदमानोऽब्रवीदित्यन्तमर्जुनस्यापि
दर्शितमर्जुनस्य [illegible] स्वधर्मं [illegible]
पितृकार्येण ततःप्रकृतोपदेशाय [illegible]
तपितृभ्रातृमातुलादिबन्धुवधपर्यवसायि संग्रामकर्म विविदि
त्सया करुणाविशालचित्तस्यार्जुनस्य धर्मे मेऽधर्मत्वेन बुद्धि प्रा
प्तेः ॥ २५ ॥

लासिकी वल्लभी टीका

भीष्मद्रोणयोः संमुखे सर्वेषां राज्ञां च प्रमुखे नामि उवाच एतान्कुरु (हे पार्थ)
मभीष्टान् समवेतान्कुरून्पश्येति २५

रणवीरसमिद्बोधिनी॥

भीष्मद्रोणयोरन्येषां शल्यादीनामपि निकटे हयोः सेनयोर्मध्ये
रथं स्थापयित्वोवाचेति संबंधः इति किं हे पार्थ दयायाः
स्त्रीस्वभावत्वात्सलम शोकमोहाभ्यां युक्तत्वेन स्नेहाद्वा शोक
मोहपराभूतो भवसि अहं त्वत्सारथ्येन प्रमनः स्यामिति संबोधने
नाभिप्रायः एतान्भवद्भिः सार्धं योद्धुकामान्कुरून्कुरुपक्षावलं
बिनो राज्ञः समवेतान्पश्य दृष्ट्वा चैतैः सार्धं युद्धस्तानैः सह युद्धैः
न त्वं पेदोसे युद्धकामत्सारथ्येन मनः खेदनीयमिति भावः २५॥

सार्वविभक्तिकत्वात्तस्य भीष्मद्रोणयोः प्रमुखे संमुखे स्थापयि
त्वेति संबंधः सर्वेषां चेति चकारेण समासांतःस्थितोपि प्रमुखतः
शब्दोत्राकृष्यते सर्वेषां राज्ञां संमुखे इति यद्वा पश्यतामित्यध्या
हृत्य भीष्मद्रोणप्रमुखतो नो सर्वेषां राज्ञां पश्यतामुवाचेत्यनादरे
षष्ठी हृदयं व्याख्येयं पार्थेति संबोध्य यन्भगवान्पृथायाः कुंत्याः
स्त्रीत्वेन शोकमोहग्रस्ततया तत्संबंधिनस्तवापि तद्धत्ता सम्र
पाप्स्थितेति सूचयन्स्वीयं हृषीकेशत्वं प्रकटयति पश्यैतानि
ति सोपहासमेतेयं ॥ २५ ॥

भाषा अनुवाद

भीष्मद्रोण औ और औरराजावोंके सामने रथको खड़ाकरि श्रीभगवानने कहा कि युद्ध करनेके हेतु एकट्ठीभयी यह कुरुवंशियोंकी सेनाको देखो और जिनके साथ युद्ध अनु॰ चित मानि मन मलीन भया इनके साथ युद्ध करनाही पड़ेगा क्यों कि संग्राममें शस्त्रधारी राजोंके सामनेसे हटना। क्षत्रीके योग्य काम नहीहै ॥ २५ ॥

दोहा॥

भीष्मद्रोण मुखादिनृप सभके मनमुखजाय देखहुं अर्जुन इसमकहें कौरवजोमिलआय २५॥

10

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्त-
था श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि २६।

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

एवं स्थिते महाननर्थो मोहहिंसेति विपरीतबुद्ध्या युद्धादुपरिरंसा पा-
र्थस्य संप्रवृत्तेति कथयति तत्रेत्यादिना समरम्भा भगवदभ्यनुज्ञा-
ने समरसमारंभाय संवृत्ते सतीत्येतदुच्यते सेनयोरुभयोरपि
स्थितान् पार्थोऽपश्यदिति सम्बन्धः अथ शब्दस्तथा शब्दपर्यायः
श्वशुरा भार्याणां जनयितारः सुहृदो मित्राणि कृतवर्मप्रभृत-
यः २६ ॥

स्वामिकृतटीका ॥

ततः किं वृत्तमित्यत आह तत्रेति अथानन्तरं पार्थोऽर्जुनस्तत्रोभ-
योः सेनयोरपि स्थितान् पितॄन्याति पिबति वेति लालयतीति वा
पत्यानीति पितरस्तान् पितॄन् अत्र च पितृकल्याः पितृव्यादयः
पितृव्यानित्यर्थः पितामहान् गांगेयादीन् आचार्यान् द्रोणादी-
न् मातुलान् मात्राजनन्याः साम्येयेषांते मातुलास्तान् भ्रातॄन्सोद-
रान्पुत्रान्पुत्राम्नोनकारात्पितॄणांत्राणात्पुत्रास्तत्पुत्राः पौत्रा-
स्तान् दुर्योधनादीनां ये पुत्राः पौत्राश्च तानित्यर्थः सखीन्मित्राणि
सुहृदः कृतोपकारांश्चापश्यत् २६ ॥

रामानुजभाष्यम् ॥

तत्रापश्यत्स्थितान्पार्थ इत्यारभ्य एवमुक्त्वार्जुनः संखेइत्यन्तम् २६ ✓+^

अभिनवगुप्तकृतटीका ॥ २६ ॥ नास्ति

परमार्थप्रपा टी० ॥

तत्रापश्यदिति पितॄन् पितृव्यान् पितामहान् वृद्धानाचार्यांस्त-
था मातृवत्पूज्यान् मातुलानिति पूज्यत्वकोटिः ॥ २६ ॥

वनमाली टी ॥ उपक्रमे ॥ २६ ॥ नास्ति

ततः किं प्रवृत्त इत्यपेक्षायामाह

ऊरुमवैजयन्ती टी० ॥

तत्रेति भगवता सैन्यदर्शने आज्ञप्तः पार्थोऽर्जुनस्तत्रोभयोः सेन

✓+^ एवं तु पार्थो महामनाः परमकारुणिको ऽतिधार्मिकः कोमलमना भवद्भिरतिघोरैर्मारणैर्जतुगृहादिभिरसकृद्वंचितोपि
परमपुरुषसहायोपि हनिष्यमाणान्भवदीयान्विलोक्य बन्धुस्नेहेन परमया च कृपया धर्मभयेन चातिमात्रखिन्न-
सर्वगात्रः सर्वथा न योत्स्यामीत्युक्त्वा बन्धुविश्लेषजनितशोकसंविग्नमानसः सशरं चापमुत्सृज्य रथोपर्युपाविशत्
इति रामानुजभाष्यम्

योर्मध्येस्थितान्स्वानपश्यदित्यन्वयः तथाशब्दपर्यायोऽत्राथशब्दः पितॄन्पितृव्यान्भूरिश्रवादीन् मातुलान्शकुनिशल्यादीन् पुत्रान्लक्ष्मणादीन् पौत्रान्लक्ष्मणादिपुत्रप्रभृतीन् सखीन्समवयस्कानश्वत्थामप्रभृतीन् २६ ॥

मधुसूदनी ॥

तत्रसमरसमारंभार्थंसैन्यदर्शनेनभगवताभ्यनुज्ञातेसतिसेनयोरुभयोरपिस्थितान्पार्थोऽपश्यदित्यन्वयः अथशब्दस्तथापर्यायः परसेनायांपितॄन्पितृव्यान्भूरिश्रवःप्रभृतीन् पितामहान्भीष्मसोमदत्तप्रभृतीन् आचार्यान्द्रोणकृपप्रभृतीन् मातुलान्शल्यशकुनिप्रभृतीन् भ्रातॄन्दुर्योधनप्रभृतीन् पुत्रान्लक्ष्मणप्रभृतीन्पौत्रान्लक्ष्मणादिपुत्रान्सखीन्अश्वत्थामजयद्रथप्रभृतीन्वयस्यान्श्वशुरान्द्रुपदप्रभृतीन् सुहृदोमित्राणिकृतवर्मभगदत्तप्रभृतीन् सुहृदइत्यनेनयावंतःकृतोपकारामातामहादयस्तेद्रष्टव्याः एवंस्वसेनायामप्युपलक्षणीयम् ॥ एवंस्थितेमहानयमोहिंसेतिविपरीतबुद्ध्यामोहाख्ययाशास्त्रविहितत्वेनधर्मत्वेनधर्मत्वमितिज्ञानप्रतिबंधकेनचममकारनिबंधनेनमित्रत्वेनशोकाख्येनाभिभूतविवेकस्यार्जुनस्यपूर्वमारब्धाद्युद्धाख्यात्स्वधर्मादुपरिरंसामहानर्थपर्यवसायिनीहेतिदर्शयति २६ ॥

सदानंदी ॥

एवंभगवताप्रोक्तःसेनयोरुभयोरपि पार्थोऽपश्यत्स्थितान्भूरिश्रवआदीन्पितॄंस्तथा १ पितामहान्भीष्ममुखान्कृपद्रोणमुखान्गुरून् शल्यादीन्मातुलान्भ्रातॄन्दुर्योधनमुखान्बहून् २ लक्ष्मणप्रभृतीन्पुत्रानश्वत्थाममुखान्सखीन् पौत्रांल्लक्ष्मणपुत्रादीन् श्वशुरान्बहुधास्थितान् ३ सुहृदःकृतवर्मादीनेवमेवस्वसैन्यके एवंस्थितेयथाबुध्यास्वधर्मेधर्मरूपया ४ ॥

नीलकंठी ॥

पितॄन्पितृव्यादीन्भूरिश्रवःप्रभृतीन्पितामहान्भीष्मादीन् मातुलान्शल्यादीन् भ्रातॄन्दुर्योधनादीन् पुत्रान्लक्ष्मणादी

न् पौत्रान् लक्ष्मणादिपुत्रान् साम्बीन् प्रद्युम्नसत्यामादीन् २५ हृद:
कृतवर्मादीन् २६ रामचंद्रसरस्वतीकृतटीका ॥
तत्रेत्यारभ्य सार्धः श्लोकः ॥२६ ॥

आनंदी टीका पितृव्यान् भूरिश्रवप्रभृतीन्

पितामहान् भीष्मसोमसोमदत्तादीन् २६ आचार्यान् द्रोणकृपादीन्

मातुलान् शल्यशकुनिप्रभृतीन् भ्रातृन्दुर्योधनादीन् पुत्रान्दुर्यो

पौत्रान् सखीन्

अश्वत्थामादीन्

रामकंठी टीका

स्पष्टार्थं २६

लासिकी वल्लभी टी.

तत्र पार्थः पक्षपातस्थितान् पितृनिति पितृकल्पान्पितृव्यादीन् सुहृदः कृतोपकारान् २६ ॥

रणवीरसमिद्बोधिनी॥

ततः किंवृत्तमित्याह तत्रेति शुद्धाय भगवदभ्यनुज्ञाने सतीत्यर्थः ॥२६॥

105

भाषा अनुवाद ॥

तहां खड़े हुये चचा दादा आचार्य मामा भाई भतीजे पोता नाती और मित्र बन्धु ससुर सुहृदों को दोनों तरफ अर्जुनने देखा २६ ॥

दोहा ॥

देखें पारथ तहां बड़े पिता पितामह जोय भ्रात पुरोहित मातुल पुत्र पौत्र सखा सोय २८ ॥

तान्समीक्ष्यसकौन्तेयः सर्वान्बन्धूनवस्थितान्
कृपयापरयाविष्टो विषीदन्निदमब्रवीत् २७ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका

सेनाद्वयेऽवस्थितान् यथोक्तान् पितृपितामहादीनालोक्य । परमकृपापरवशः सन्नर्जुनो भगवन्तमुक्तवानित्याह तानि वि ति षीदन् यथोक्तानां पित्रादीनां हिंसासंरम्भनिबन्धनं विषादमुपतापं कुर्वन्नित्यर्थः २७ ॥

स्वामिकृतटीका ॥

श्वशुरानिति च पुनः श्वशुरान्सुहृदश्चापश्यत् ततः किं कृतवानित्यत आह तानिति सकौन्तेयः अर्जुनः सर्वानविशेषेण बंधून् बध्नंतिपरस्परं स्नेहपाशैरिति बंधवस्तान्समीक्ष्य कृपया करुणया परयातिशययाविष्टो व्याप्तो युक्तो विषीदन् विशेषेण सीदन्नवसादं ग्लानिं लभमानः इदमनन्तरमुच्यमानमब्रवीत् किमब्रवीदित्यपेक्षायामाह ॥ २७ ॥

नवस्थिता

रामानुजभाष्यम् ॥ उक्तमम् २८

एवं पार्थो महामनाः ॥ २७

अभिनवगुप्तकृतटीका २७ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

अथप्रेमास्पदानाह भ्रातॄन्दुर्योधनादीनुपकोत्तरशतमितान् अथकृपापात्राण्याह पुत्रान्पौत्रानिति दुर्योधनादीनां पुत्रान्स्वपौत्रांश्चेत्यर्थः अथापयशोहेतूनाह सर्वानित्यादि अथार्जुनः स्वनिर्वेदं कथयति ॥ २७

वनमाली टी॰ ॥

आविष्टो व्याप्तः २७ ॥

ऊरुमवैजयन्ती टी॰ ॥

श्वशुरान् दुर्योधनादिश्वशुरान् सुहृदश्चेति पितामहादीनां सर्वेषां विशेषणं यतो यावन्तः सर्वे कृतोपकारा भवन्ति तस्मात्सुहृदः अवस्थितान्युद्धत्वयास्थितान्बन्धून् ज्ञातीन् सर्वान् तान्समीक्ष्य

सः येन कृष्णसहायेन देवराजं विनिर्जित्य नत्वा वाण्डवं वनमग्नये दत्तं येनैकरथेनोत्तरगोग्रहे त्वदीयान्सर्वान्विजित्य सर्वेषां शिरोभ्य उष्णीषाण्यपहृतानि योगन्यैर्वनीयमानं सस्त्रीकं दुर्योधनं युधिष्ठिरादयानान्मित्वा निर्लज्जं त्वन्तुजं प्रामोचयन्मः इत्यनेनासभयरहितत्वेनातिसमृद्धिरोम शिरात्वमतिधार्मिकत्वं चोक्तं कौन्तेयः पृथुकृष्णलयस्य भगवतः पितृष्वस्रेय इत्यनेनास्यातिकृपालुता सू

गी॰
टी॰
प्र॰

मम्यगीक्षणविषयं कृत्वा शत्रुविषयिणीयतस्ततः परयेति परया निर्हेतुक्या कृपयाविष्टो युक्तोऽत एव विषीदन्विषादं कुर्वन्नुहृदेव ह्यमाणं वचनमब्रवीदिति येनैव विषादेनार्जुनस्य वचनं नेष्टं तत्त्राह यस्मिन्सेनाकथयन ॥ २७ ॥

मधुसूदनी ॥

कौन्तेय इति स्त्रीप्रभवत्वकीर्तनेन पार्थवत्तात्कालिक स्वच्छतामपेक्ष्य कृपया कर्त्र्या स्वव्यापारेणैवाविष्टो व्याप्तो न तु कृपां केनचिद्व्यापारेणाविष्ट इति स्वतः सिद्धैवास्य कृपेति सूचितात्पततप्रकटीकरणाय परयेति विशेषणं अपर इति वाच्छेदः स्वसैन्ये इवापि कृपाभूत् एवतस्मिन्समयेन कौरवसैन्ये ऽप्यपरा कृपाभूदित्यर्थः विषीदन्विषादं प्राप्नुवन्नब्रवीत् इत्युक्ति विषादयोः समकालतावद नुसगद्गदकंठतासुपातादिविषादकार्यसक्तिकालेयोतयति ॥ [illegible] अवस्थासम्यक् येनार्जुनस्यापिरिहादा वा यमवचनावत्यानि संजयोऽर्जुनऽवाचेत्या दि [illegible] स्मकाऽर्जुनः संप्यप्रतः [illegible] येन तत्र स्वधर्मप्रवृत्ति कारिणीभूततत्त्वज्ञानप्रतिबंधकः स्वपरदेहेष्वात्मात्मीयाभिमान वतोऽनात्मविदोऽर्जुनस्य युद्धे स्वपरदेहविनाशप्रसंगदर्शिनः शोको महानासीदितितल्लिंगकथनेन दर्शयति त्रिभिः श्लोकैः २७

सदानंदी ॥

ममत्वाविष्टयात्मतमोहग्राहगृहीतया अभिभूतविवेकस्य स्वधर्मादर्जुनस्य च ५ यर्म्याद्युद्धाच्छरावध्यान्महानर्थावसानिकां संज्ञातोपविंवेसमतिदर्शयत्यधुना स्फुटं ६ कृपयाकर्त्त्र्याहूयपिर्णिकमभूतोऽर्जुनो वशः व्याप्तोनादिमहामोहजन्यया ध्यासरूपया ७ स्वकीयात्तुपलभ्यैतेममेत्याक्रांतमानसः संतापंप्राप्नुवन्नाहवक्ष्यमाणमिदंवचः ८ ॥ २७

नीलकंठी ॥

सुहृदः कृतवर्मादीन् २७ ॥ २७ ॥ २७ ॥

कृपया स्नेहेन सर्वस्वजनमिति विशेषेण प्रदर्श्यते २७ ॥

एवं स्थिते महानर्थ धर्मोऽहिंसेति विपरीतबुद्ध्या मोहात्यया शास्त्रविहितत्वेन धर्मत्वमिति ज्ञानशक्तिबंधकेन च ममकारनिबंधनेन चित्तवैक्लव्येन शोकाख्येनाभिभूतविवेकस्याऽर्जुनस्यैवमारब्धात् युद्धात्तु स्वधर्मादुपरिरंसामहानर्थपर्यवसायिनीं हृत्वे निदर्शयति

आनंदी टीका परया भूयस्या कृपया मंमेते वन्यवो मुमू

पितृन्पितामहान्भूरिश्रवप्रभृतीन् पितामहान् भीष्मसोमदत्ता

दीन् आचार्यान्द्रोणकृपादीन् मातुलान् शल्यशकुनिप्रभृती

न् भ्रातृन्दुर्योधनादीन् पुत्रान्दुर्योधनादिपुत्रान् सखीन् य

सन्यामादीन् कौंतेयावस्थितान्समीक्ष्य २६ ॥

रामकंठी टीका

स्पष्टार्थं २६

कृपया आविष्टो व्याप्त इदंवक्ष्यमाणमब्रवीदन्यः

(ला)सि(की) टीका

सुहृदः कृतोपकारान ॥ सुगमोर्थः २७ ॥

रणवीरसमिद्धोधिनी ॥

सेनयोरुभयोर्मध्येस्थितानितिसंबंधः पितृकल्यान्पितृव्यादीन्
सखीन् मित्राणि सुहृदःकृतोपकारान् ॥ २७ ॥

दिव: कथं रक्षिता: स्यु
रिति मम नाति वेपतया
मतो विज्ञवनयाविह:
निवीरवुमत्यंभ्राग:
इंरदाकामयवीत् ॥२६

रामचंद्रसरस्वतीकृतटीका ॥

तानितिकौन्तेयइतिपार्थवत्कृपयाविष्टोनतुकृपामाविष्टोऽतो नास्येयंकृत्रिमाकृपेतिद्योत्यते अपरयेतिछेदःस्वसेनायांकृपा हिदेवतस्मिन्समयेकौरवेष्वपिपराकृपाभूदित्यर्थः विषीदन्निति क्रिविषादयोः समकालतांवदन्सगद्गदकंठतांविरिंच्योक्तिम श्रुपातादिचाकृतयति ॥ २८ ॥

109

भाषा अनुवाद ॥

सो कुन्तीपुत्र अर्जुन उनसब बंधुवोंको लडनेके लिये संग्राम मेंखडे देखि परम कृपासे युक्त अति कातर स्वभाव हो विषाद करते भये यह वचन बोले ॥ २७ ॥

दोहा ॥

ससुर सुहृद बांधव सभी सेना दोउ मध्य तिन्हहूंको स्थित देषके तहांपांडवसनह २७ ॥

अर्जुनउवाच दृष्ट्वेमान्स्वजनान्कृष्ण युयुत्सून् समवस्थितान् सीदन्तिममगात्राणि मुखंचपरि शुष्यति २८ ॥ भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

तदेवंदर्शनशब्दवाच्यं वचनमुदाहरति दृष्ट्वेति आत्मीयं बन्धुवर्गं युद्धेच्छया युद्धभूमावुपस्थितमुपलभ्य शोकप्रवृत्तिं दर्शयति सीदन्तीति देवाशेष्येवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतस्त्रियस्य युद्धारम्भे तन्निमित्तप्रसंगदर्शिनः शोको महानासीदित्यर्थः ॥ २८ ॥

स्वामिकृतटीका ॥

दृष्ट्वेममित्यादियावदध्यायपरिसमाप्ति हेकृष्णभक्तानांक्लेशविलेखनाद्विनाशनात् कृष्णेमंस्वजनंयुयुत्सुं योद्धुमिच्छन्तं पुरतःसमवस्थितंबंधुजनंदृष्ट्वा मदीयानिगात्राणिकरचरणादीनिअंगानिसीदन्तिविशीर्णानिशिथिलान्युत्साहहानिभवन्तिविशीर्यन्ताइत्यर्थः चपुनर्मुखंपरितःसमन्तात्शुष्यति निर्द्रवीभवति ॥ २८

रामानुजभाष्यम् ॥उपक्रमम्॥

[illegible] ॥ २८ ॥ ॥ ॥

अभिनवगुप्तकृतटीका ॥ना २८ स्ति॥ २८ ॥

परमार्थप्रपा टी॰ ॥

दृष्ट्वेममित्यादि गात्राण्यंगानिकरचरणादीनिसीदन्ति शिथिलानि भवन्तिमुखंचशुष्कंभवति अथकरुणरसाविर्भावसात्त्विकानाह २८

वनमाली टी॰ ॥

कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतेइति ममगात्राणिसीदन्तिशीर्यन्ते २८ ॥

जस्तुमवैजयन्तीटीका ॥

दृष्ट्वेममित्यारभ्य यदिमामप्रतीकारमित्यन्तैःसार्द्धैरष्टादशभिःश्लोकैः अर्जुनउवाच दृष्ट्वेममिति हेकृष्णयुयुत्सुंयोद्धुमिच्छुंसमुपस्थितंरणभूमौप्राप्तमिमंमत्पुरःस्थितंनिर्दिश्यस्वजनमात्मबंधुवर्गंदृष्ट्वा । निरीक्ष्य पश्यतो ममगात्राणिअंगानिहस्तपादादीनिसीदन्तिव्यथ

दृष्ट्वेममित्यर्थेद्वाभ्यांतदेवा ... नस्वकबंधुनराणां संजयोकथयत्

गी.
टी.
प्र.

+तदेव भगवंतं प्रत्यर्जुनवाक्यमवतारयति संजयोऽर्जुनउवाचेत्यादिना एवमर्जुनः संख्ये इत्यतः शोकेन ग्रस्तेन तत्र स्वधर्मप्रवृत्तिकारिणीभूतं तत्वज्ञानप्रतिबंधकः स्वपरदेहेष्वात्मात्मीयाभिमानवतो ऽनात्मविदोऽर्जुनस्य युद्धे स्वपरदेहविनाशप्रसंगदर्शिनः शोको महानासीदिति तल्लिंगकथनेन दर्शयति त्रिभिः श्लोकैः +

ने मुखं च परिशुष्यति अन्तर्दाहतया मुखं शुष्कं भवतीत्यर्थः २९

मधुसूदनी ॥

+इमं स्वजनमात्मीयं बंधुवर्गं युयुत्सुं युद्धेच्छुं समुपस्थितं दृष्ट्वा स्थितस्य पश्यतो ममेत्यर्थः अंगानि व्यथंते मुखं च परिशुष्यतीति श्रमादिनिमित्तशोषापेक्षया ऽतिशयकथनाय सर्वतोभाववाचिपरिशब्दप्रयोगः २९ ॥

सदानंदी ॥

स्वधर्मकरणे हेतुभूतज्ञाननिरोधकृत् महान्शोकोऽर्जुनस्यासीन्ममाहमिति चेतसा ॥ इति तल्लिंगतो वक्ति पार्थो किं संजय त्रिभिः बंधुवर्गमिमं स्वीयं युद्धे सुयुद्धं समागतं ॥ पश्यतो मेऽङ्गसंघोऽयं तेगात्र्यानं न परिशुष्यति कंपः पुलकितत्वं च गांडीवभ्रंशनं तथा ॥ त्वग्दाहोऽधैर्यं दौर्बल्यं मनः संतापहेतवः ॥ १२ ॥ २९

नीलकंठी ॥

~~[illegible]~~ २९ ॥

सीदंति निःसत्त्वानि भवन्ति रोमहर्षो रोमांच: २९

ज्ञानेश्वरी टीका

[illegible]
[illegible]
[illegible] स्वपरदेहेष्वात्मात्मीया
भिमानवान् स्वपरदेहनाशशंकया शोकाविष्टोऽर्जुन उवा
च २८ ॥ इत्युक्ति स्पष्टम्

रामकंठी टीका

स्पष्टार्थ २८

नासिकी [illegible] टीका

[illegible]
[illegible] २८ ॥ इमं पुरोभूमौ समुपस्थितं योद्धुकामं बन्धुजनं दृष्ट्वा मम
अङ्गानि सीदन्ति विशीर्यन्ते शिथिलीभवन्ति मुखं च परितः शुष्कतामेति ॥

रणवीरसमिद्धोधिनी ॥

एवं व्यवस्थितान्पितृादीन्विलोक्य परमकरुणाविष्टचेताः स
न् अर्जुनो भगवंतमुक्तवानित्याह तानिति इदं वक्ष्यमाणमब्र
वीदिति संबंधः विषीदन्निति बंधुहिंसानिमित्तमुपतापं कु
र्वन्नित्यर्थः २८ ॥

भाषा अनुवाद ॥

उससमय अर्जुनने जो कहा सो संजय कहते हैं कि तब अर्जुन कृष्णसे बोले कि हे श्रीकृष्ण युद्धकी इच्छा करि संग्राम भूमिमें खड़े हुये इन स्वजन बन्धुवों को देखि मेरे हाथ पांव ढीले हो गये और सारी शरीरमे पसीना हो आया अब भी हलता जाता है ॥ २८ ॥

दोहा

परमकृपाके युक्त है और विषादसमेत कृष्णप्रति अर्जुन
तबे कहैं वाक अश्रुदेत २८॥

रामचन्द्रसरस्वतीकृतटीका ॥

दृष्ट्वेममित्यादिश्लोकत्रयंस्पष्टार्थम् ॥ २८ ममार्जनस्यैतादृशीद
शा त्वत्कृतस्येतिस्वस्यान्यथातवापीमेस्वजनापवेत्येतद्धेकथम
योगःस्यादितिभावः ॥ २८ ॥

वेपथुश्च शरीरे मे रोमहर्षश्च जायते गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते २९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

अंगेषु व्यथा मुखे परिशोषश्चेत्युभयं शोकलिंगमुक्तं सम्प्रति वेपथुप्रभृतीनि भीतिलिंगान्युपन्यस्यति वेपथुश्चेति रोमहर्षो रोम्णां गात्रेषु पुलकितत्वम् २९ ॥

स्वामिकृतटीका ॥

किंच वेपथुरिति मे मम शरीरे वेपथुः कंपस्तथा रोमहर्षो रोमाञ्चश्च जायते गांडीवमिति मे मम गांडीवं स्रंसते अधः पतति त्वक्चैव परिदह्यते अंतरशोकज्वलनेन सर्वतः संतप्यते २९ ॥ हस्तात्

रामानुजभाष्यम् ॥ उपक्रमम्

कोमलमनाभवद्विरतिर्वीरमार्वाणे ॥ २९ ॥ ॥

अभिनवगुप्तकृतटीका ॥ २९ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

सर्वशरीरे वेपथुः कंपो भवति रोमहर्षो रोमांचः अयं आगवैकल्यं दर्शयति गाण्डीवं धनुर्हस्तात्स्रंसते निपतति त्वक् परिदह्यते संतप्यते ततः परं कथं योद्धव्यमित्याह ॥ २९ ॥

वनमाली टी॰ ॥ २९ पूर्वश्लोकान्तरे ॥ २९ नास्ति

ऊरुमवैजयन्ती टी॰ ॥

किंच मे मम शरीरे वेपथुः कम्पः रोमहर्षः पुलकितत्वं च जायते गाण्डीवमिति गाण्डीवं स्रंसते धैर्येण गाण्डीवनामधनुर्भ्रंशते च पुनस्त्वक् परिदह्यते त्वगित्युपलक्षणं बाह्येन्द्रियाणां ॥ ॰ २९ ॥

मधुसूदनी ॥

वेपथुः कंपः रोमहर्षः पुलकितत्वं गांडीवभ्रंशेनाधैर्यलक्षणं दौर्बल्यं त्वक्परिदाहेन चांतः संतापो दर्शितः २९ ॥

सदानंदीटीका ॥ पूर्वश्लोकान्तरे ॥ २९ ॥

॰ त्वगादि सप्तधातूनां वा सर्वाणि बाह्येन्द्रियाणि चर्मादीनि मांसशोणितास्थिमज्जादीनि च समन्तादहन्त इत्यर्थः ॰

नीलकंठी टी॰ ॥

सीदंतिमिच्छेहायाणिभवंति रोमहर्षेरेतेयः २९ ॥

आनंदी टीका

स्पष्टं २९

रामकंठी टीका

दृष्ट्वेमं स्वजनमिति [illegible] तन्मे देहेन तत्संबंधित्वमाति नत्तु [illegible] [illegible] [illegible] व्याख्यातमेव २९ ॥

+ [illegible] नासि ~~की~~ [illegible] टीका [illegible] ॥

+ स्वजनं युयुत्सुं [illegible] सीदंति विशीर्यंतेऽशिथिलीभवंति [illegible] [illegible] २९ ॥ ममशरीरेकंपो रोमांचश्च जायते गांडीवं नाम धनुस्तत्स्रंसते त्वक्चशोकाग्निना संतप्यते ॥

दृष्ट्वा ममांगानि

रणवीरसंसिद्धबोधिनी ॥

तदेव वचनमुदाहरति दृष्ट्वेति कृषिर्भूवाचकः णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति स्मृतेः सर्वेषामानंदमयत्वं कथं ममेदृशो हिंसाप्राये घोरकर्मणि नियोगेन क्लेशजनको भवसीत्यभिप्रायेण कृष्णेत्यर्जुनेन संबोध्यते भगवान् गात्राणीति पदेन करचरणाद्यंगस्थितप्राणसंधिबंधास्तद्यंते तानि सीदंति शिथिलीभवंति इत्यंगवय्यास्तुल्यप्रयोगो पद्योकलिंगत्वेनोक्तो २९ ॥

116

भाषा अनुवाद ॥

और देह कांपतीहै रोवां खडेहो हो उठतेहै हाथसे गाण्डीवध
नुभी गिरापडताहै सर्वांगकी खाल जलीसी जातीहै ॥ २९

दोहा ॥

बन्धुबांधवकों देषके षडेजोयुद्धकोहेतम पीडतहोतहैं
अंगममसूखतमुखसटम २९ ॥

नचशक्नोम्यवस्थातुं भ्रमतीवचमेमनः निमित्ता
निचपश्यामि विपरीतानिकेशव ३१ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

किंचाधैर्यमपि संवृत्तमित्याह नचेति मोहोपि महान् भवतीत्या
ह भ्रमतीवेति विपरीतनिमित्तप्रतीतेरपि मोहोभवतीत्याह
निमित्तानीति तानि विपरीतानि निमित्तानि यानि वामनेत्रस्फु
रणादीनि ३१ ॥

स्वामिकृतटीका ॥

चा:परंमेमनःकर्तव्याकर्तव्यबोधसाधनमंतःकरणंभ्रमतीवभ्र
मंगच्छतिनिर्द्धारणंकर्तुंस्थातुंचनशक्नोमि निमित्तानीति हेके
शवविपरीतानिअनिष्टसूचकानिनिमित्तानिभयसूचकानिचि
ह्नानिशकुनानिपश्यामि ॥ ३१ ॥

रामानुजभाष्यम् ॥ उपक्रमम्॥

गांडीवंस्रंसतेहस्तादित्यादिभिरमकर्तुंचितोपि ॥ ३१ ॥

अभिनवगुप्तकृतटीका ॥ ३१ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

नचेतिकेवलमवस्थातुंनशक्नोमिकिंतुनर्योद्धुं अथमनसिधैर्य
मवलंब्ययोद्धव्यमितिचेत्तदपिनेत्याहभ्रमतीति मनंकोदिशीकत
याप्रकृतिस्थंनभवति किंच भोकेशवमानसानिनिमित्तानिभाव्य
र्थसूचकानिइहलोकसाधनानिविपरीतानिअनिष्टहेतूनि ॥ ३१

वनमाली टी॰ ॥

केशौब्रह्मरुद्रौवायतिप्रवर्तयतीतिकेशवःकंब्रह्माणमीश्व
र्यईकामंईशंशंकरंचप्रवर्तयतीतिवा हेकेशव ३१ ॥

मधुसूदनी टी॰ ॥

किंचात्रदेहंस्थापयितुमसमर्थोस्मिस्यप्रच्छ्रादिकस्वकार्वर्तेत्याह न
चशक्नोमीति अहमवस्थातुंशरीरंस्थापयितुंचनशक्नोमिसमर्थो
नभवामीत्यनेनसर्वशरीरावयवानांशैथिल्यंत्वक्सूचितम् नन्वबा
ह्येंद्रियाणामन्तःकरणाधीनत्वाद्विचारात्मकेनमनसादेहावस्थाने

भवामीत्यर्थः कश्चित्स्वभक्तेषु विधिशिवौ वाति ज्ञातौ निजभक्तौ विहाय यथा तयोः स्वेष्टं संहरणकूपस्ये
प्सितस्य परिपूरकस्त्वमसि तथा ममापि पुत्रभावात्मकं कामं पूरयिष्यसि यद्वा केशवरूपं त्वां निगच्छ
ति यथा वरुणगतात्स्वपितरं नन्दगोपं तत्पात्पूर्वादमोचयस्तथा मामपि बन्धुस्नेहपाशात्त्वं मोचय
यद्वा केशौ केशिनामानमसुरमपि दित्वाद्वद्वधितवानिति वृत्त्यर्थः यथा केश्यादिदुष्टदैत्यवधेन
भवान्गोकुलादिषु स्वजनानरक्षत्तथा मामपि शोकमोहाख्यस्य विनाशेन त्वं रक्षेति केशवेति स
म्बोधनाभिप्रायः ॥

ऊर्विति चेत्तत्राह भ्रमतीवेति मे मम मनो भ्रमतीव विक्षिप्तत्वाद्भ्रमद्वस्तु
मन इव भ्रमतीत्यर्थः मनसो भ्रमणे च कारणमाह निमित्तानीति
यतो विपरीतानि वामाक्षिस्फुरणादीनि निमित्तान्यनिष्टसूचकानि
च पश्याम्यनुभवाम्यतो हे केशव मनसश्चञ्चलत्वेन शरीरं धारयितुम
क्षमोऽहं एवं विपरीतनिमित्तदर्शनेन मनसश्चञ्चलत्वाद्धैर्याक्षमो
ऽस्मीति दैर्घ्यपर्यवसन्नाभावः ॥ ३० ॥

मधुसूदनी ॥

अवस्थातुं शरीरं धारयितुं न च शक्नोमीत्यनेन मूर्च्छा सूच्यते तत्र
हेतुः मम मनो भ्रमतीवेति भ्रमणकर्तृसादृश्येन मम मनः कश्चि
च्चित्तविकारविशेषो मूर्च्छायाः पूर्वावस्था चोक्ता यत एवमतो नावस्था
तुं शक्नोमीत्यर्थः पुनरप्यवस्थानासामर्थ्ये कारणमाह निमित्तानि
च लक्षकतया सन्दुःखस्य विपरीतानि वामनेत्रस्फुरणादीनि प
श्यामि अनुभवामि अतोपि नावस्थातुं शक्नोमीत्यर्थः अहमनात्मवि
त्त्वेन दुःखित्वाच्छोकनिबन्धनक्लेशमनुभवामि त्वं तु सदानन्दरूपत्वा
च्छोकासंसर्गीति कृष्णपदेन सूचितम् अतः स्वजनदर्शने त्वल्पोऽपि
शोकासंसर्गित्वलक्षणाद्विशेषात्त्वं मामशोकं कुर्विति भावः के
शवपदेन च तत्करणसामर्थ्यं को ब्रह्मा सृष्टिकर्ता ईशो रुद्रः संह
र्ता तौ वात्यनुकम्पनतया गच्छतीति तत्त्व्युत्पत्तेः भक्तदुःखकर्षित्वं वा
कृष्णपदेनोक्तम् केशवपदेन च केश्यादिदुष्टदैत्यनिबर्हणेन सर्व
दा भक्तान्पालयसीत्यतो मामपि शोकनिवारणेन पालयिष्यसीति
सूचितम् ३० ॥

सदानन्दी ॥

स्वशरीरं न शक्नोमि मनो धारयितुं तथा वामाक्षिस्फुरणादीनि नि
मित्तान्यन्यथान्यथा १ विपरीततया दुःखदायीन्यनुभवाम्यहं अहं
चात्मवित्त्वेन दुःखित्वाच्छोकहेतुकं २ क्लेशमनुभवामीति सदा
नन्दतया भवान् शोकक्लेशासंसर्गीत्येवं कृष्णेति सूचितं ३ माम
शोकमतः कुरु त्वमिति चाशयः को ब्रह्मा सृष्टिकर्तास्यादी
शो रुद्रः संहारको हरः ४ अनुकम्पनतया नौ द्वौ वाति याति स केशवः ५
३० ॥

नीलकंठी ॥ पूर्ववत् ॥ ३० ॥

निमित्तानि भूमिकम्पादीनि लोकक्षयकराणि

118 दुः ना

श्री आनंदी टीका अवस्थातुं शरीरं धारयितुं न शक्नोमि विपरीतानि
निमित्तानि दिव्यान्भौमां [illegible] न्यानान् [illegible] दीन् पश्यामि
[illegible] ३०

रामकंठी टीका
स्वगमोर्थः ३०

लासिकी [illegible] टीका [illegible]
[illegible] ३० ॥ अहमवस्थातुं शरीरं धारयितुमपि न शक्नोमि मेम
नो भ्रमतीव अवसादमिव प्राप्नोति हे केशव निमित्तानि भावि सूचकानि शकुनानि विपरीतानि
अनिष्टसूचकानिच पश्यामि उपलभे ॥

रणवीरसमिद्धोयिनी ॥

भीतिविह्वान्याद वेपथुरिति ३० ॥

119

रामचन्द्रसरस्वतीकृतटी० ॥

निमित्तान्यहितसंवादीनि ब्रह्माप्येतान्सर्वानुत्पादयन्नपितवात्मकं यः ईशो हरोप्येतानिदानीं संहरंस्तवात्मकं यपवेतिकेशवेत्य नेनाह कश्चेशश्च केशौ तौ वात्मकं यतया गच्छतीति केशवश ब्दव्युत्पत्तेः [नतु दुर्योधनादिस्वजनश्चेत्तत्किं युधिष्ठिरभीमसेना दिस्वजनः येन स्वजनं युद्धं त्वमपि हन्तुं नवेदृशी दशा भवति ह तेह हत्वा किं भविष्यतीति न विद्म इत्याशंक्य स्वजनमेवांगीकृत्य त द्वधः प्रयोजनाभावान्नकर्तव्य इत्याह ॥ ३१ ॥

120

भाषा अनुवाद ॥

श्रौर मेरे अब खडेहोनेकी सामर्थ्य भी नही वही मेरा मन भ्रमता है श्रौर निमित्त असगुन उलटे देखताहूं बाई श्रांख श्रौर हाथभी फरकतेहैं ॥ ३० ॥

दोहा ॥

कंपअरुरोमांचमोहि प्रगटभयहैं देह छूटतगांडिवहस्त सें त्वचाजरत हैं यह ३०॥ दोहा नहिंसकत स्थित होयमें भ्रमतहोमेरोचित केशावउलटे देखहों में यह होतनिमित

नचश्रेयोऽनुपश्यामि हत्वास्वजनमाहवे नकांक्षे विजयंकृष्ण नचराज्यंसुखानिच ३१ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

युद्धे स्वजनहिंसया फलानुपलम्भादपि तस्मादुपरिरंसाजायतइ त्याह नचेति आत्मनो युयुत्सूनां हिंसया विजयो राज्यंसुखानिच लब्धुं शक्यानीति कुतो युद्धादुपरतिरित्याशंक्याह नकांक्षइति ३१

स्वामिकृतटीका ॥

किंचनचेति स्वजनमाहवेयुद्धेहत्वाश्रेयःकल्याणमनुपश्चात्तद नंतरकालेनपश्यामि ॥ ३१ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

परमकृतस्सहायोपिहनिष्यमाणान्भवदीयान् ॥ ३१ ॥ ए।

अभिनवगुप्तकृतटीका ॥ ३१ ॥ नास्ति

परमार्थप्रपा ॥

पश्यामि किंचश्रेयःपरलोकसाधनेनपश्यामि किंचयदर्थमेवायं ^२ युद्धप्रसंगस्तदपिनरोचतेत्याह ॥ ३१

वनमाली टी॰ ॥ ३१ सर्वमेवस्पष्टं ॥ ३१ नास्ति

विपरीतनिमित्तदर्शनेनेमनसश्चञ्चलत्वमुक्त्वा नीवृद्धेर्विपर्यं दर्शयति ^२

उत्तमवैजयन्तीटी॰ ॥

नचेति चपुनःआहवेयुद्धेस्वजनंबंधुवर्गंहत्वा श्रेयःफलंनानुप श्यामिनानुभवामि द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौपरि व्राड्योगयुक्तश्चरणेचाभिमुखोहतइत्यादिवचनाद्धतस्यैवश्रेयोवि शेषकथनंनतुहंतुरतोहननकर्तुर्ममस्वजनवधेनश्रेयसोभावान्निष्प्रयोजनंयुद्धादि मितिभावः ^२ ३१ ॥

मधुसूदनी टी॰ ॥

श्रेयःपुरुषार्थंदृष्टमदृष्टंवाबहुविचारणादनुपश्चादपिनपश्यामि आत्मस्वजनमपियुद्धेहत्वाश्रेयोनपश्यामि द्वाविमौपुरुषौलोकेसूर्य मंडलभेदिनौ परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः इत्यादिना हतस्यैवश्रेयोविशेषाभिधानात् हंतुस्तुनकिंचित्सुकृतमेवमस्व जनवधेपिश्रेयसोभावे स्वजनवधेस्तरांतदभावइतिज्ञापयितुंस्व

एवंलिंग द्वारेणस मीकीनप्र वृत्तिहेतुश् नतत्वतानु त्पत्तिंबंधकी भूतंपूर्णकम का संप्रतितन्नारितं विपरीतप्रवृत्तिहेतुभूतां विपरीतबुद्धिंदर्शयति

^२ ननराज्यानिविजयंराज्यलाभंसुराज्यासुनादिभोगात्मकान्यनेकविधानिसु खानिचबहूनि श्रेयोजनानिसन्ति निष्प्रयोजनत्वंयुद्धस्यकथंवदसिइतिचेत्तत्राह नकांक्षे इति समेजामदग्न्यादितोषष्ठवीर्यैर्भीष्मद्रोणादिकंनिहत्यसचकृतमनस्वे सुरासुरैः प्रार्थनीयवीर्यादिमत्वंविजयं नकांक्षे नेच्छामि प्रशस्यंकथयतोपात्तराज्यान् लोभा कृतवित्तान्विधनादीन् हत्वा तेभुक्तंराज्यंच नेच्छामि कुत्र सभादिषु दुष्कृतिकुपालान्दून्पुत्रादीन्निहत्य नहचनशररहितानिदेहेन्द्रियादिजातानिसुखानि नेच्छामि कृष्णेतिसम्बोधनेन सदानन्दरूपस्त्वंप्राप्तु भामरूपेषुविजयादिषु ममाकांक्षांवारयेतिध्वनितम् ^२ =

जनमित्युक्तं एवमनाहवेवधेश्रेयोनास्तीतिसिद्धसाधनवारणा
याहवइत्युक्तं [निहत्यमातृदृष्टंप्रयोजनंदृष्टप्रयोजनाभावेपिविज
योराज्यंसुखानिच निर्विवादानीत्यतआह] ॥ ३१ ॥

मधुसूदनी टी॰ ॥

एवंलिंगद्वयेनैवशोकंज्ञाननिरोधकं उक्त्वेदानींस्वधर्मेपियुद्धे
धर्ममतिगतः १ आहपार्थोमहामोहजन्यामासाद्यतोवचः विचारे
णापिदृष्टंवादृष्टंश्रेयःकथंचन २ पश्चादपिनपश्यामिहत्वास्वज
नमाहवे द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ ३ परिव्राड्योग
युक्तश्चरणेचाभिमुखोहतः इतिप्रोक्तंहतस्यैवश्रेयोहंतुर्नकिंच
न ४ मास्त्वदृष्टफलंकिंचिद्दृष्टंत्वस्तिजयादिकं इत्यत्राहनमे
वांछाजयादौदृष्टगोचरे ५ ॥ ३१ ॥

नीलकंठी ॥

निमित्तानिलोकजयकर्तारिभूमिकंपादीनि ॥ ३१ ॥

आनंदी टीका

अवस्थानेऽशरीरं धारयितुं विपरीतानि निमित्तानि दृष्ट्वान्नै मित्तज्ञानमाह आहवत्यागेन स्वजनवधाप्रसंगाच्छ्रेयःप्रा प्तिरित्यर्थः ३१ ॥

रामकंठी टीका

स्पष्टार्थम् ३१

लासिकी [illegible] टीका [illegible]

[illegible] नच श्रेयोऽनुपश्यामि अवस्थानमिव शरीरमोदि [illegible] निमित्तानि भाविदुःखसूचकानि [illegible] सुखसूचकानि हे केशव कल्याणं श्रेयः पश्चाद्युत्तरकाले न च तर्कयामि [illegible] ३१ ॥ तस्माद्विजयं राज्यं विषयसुखानि च न प्रार्थये ॥

श्रणवीरसमिद्धोयिनी ॥

धैर्यत्यागलक्षणमाह नचेति भ्रमतीवेति मोहलिंगं विपरीता निनिमित्तानि वामांगस्फुरणादीनि इदमपि मोहजननेनि मित्तं ३१ ॥ अतश्च युद्धे उपरिरंसा जायत इत्याह नचेति अनुस्वजनहिंसातोऽनंतरं राज्यसुखादिलब्धिरूपस्य श्रेयसः सत्वे किमित्युपरम इत्याह नकांक्षे इति ३२ ॥

रामचंद्रसरस्वतीकृतटीका ॥

नचेति चः किंचेत्यर्थे स्वजनमितिच्छेदः किंच स्वजनं हत्वा
श्रेयो न पश्यामि यतः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति हतस्यैव श्रेयो विशे-
षः श्रूयते न हंतुः ननु निहतमस्वजनं हंसि विषंवादे[illegible]यदेवं
आयासे इत्याशंक्याह माहवइति संग्रामे हतैर्वैरिभिर्न हंतुः श्रे-
यः उक्तवाक्यादिति भावः ननु मा भूच्छ्रेयो विशेषो दृष्टफलानि
तु विजयराज्यसुखानि भविष्यंतीत्याशंक्याह न कांक्षइति दृ-
ष्टफलोपाये प्रवृत्तिरपि तत्फलकामनायां भवति भोजनेच्छा-
विरहिणः पाकादावप्रवृत्तेरिति भावः जनतस्तदनाकांक्षत्वं तथा-
ह ॥३१॥

दासि

५३१

व. श्री

124

भाषा अनुवाद

मैं कल्याण नही देखताहूं स्वजन बन्धुवोंको संग्राममें मारके हे कृष्ण नही चाहिये हमै विजय और नराज्य और सुखकी भी इच्छानही है ॥ ३१ ॥

दोहा ॥

नहि देखों कल्याण मे युद्ध में बांधव मार जीत न चाहों कृष्ण मैं
नहि राज्य सुख सार ३ ॥

किंनोराज्येनगोविंद किंभोगैर्जीवितेनवा येषा
मर्थेकांक्षितंनो राज्यंभोगाःसुखानिच ३२ ॥

भाष्यंनास्ति आनन्दगिरिकृतटीका ॥

किमिति राज्यादिकं सर्वाकांक्षितत्वात् नकांक्षसे तेनहि पुत्र
भ्रात्रादीनां स्वास्थ्यमाधातुं शक्यमित्याशंक्याह किमिति राज्या
दीनामाक्षेपे हेतुमाह येषामिति ३२ ॥

स्वामिकृतटीका ॥

ननुविजयादिकंश्रेयोवर्तमानेकिंनपश्यसीतिचेत्तत्राह नकांक्ष
इतिहेकृष्णाहंविजयंविशिष्टंजयंसंग्रामेउत्कर्षंनकांक्षेनप्रार्थ
येचपुनःराज्यंराज्याधिपत्यंचसुखानिचविजयजन्यानुप्रमोदान्
नप्रार्थये हेगोविन्दनःअस्माकंराज्येनकिंभोगैर्विषयसुखैःकिं
जीवनेनापि किंगोभिःश्रुतिभिःवेदान्तवाक्यैःविद्यतेपरमार्थ
रूपेनलभ्यतेइतिगोविन्दस्तस्यामंत्रणं हेगोविन्द ॥ ३२ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

विलोक्यविपुलस्नेहेन परमयाच ॥ ३२ ॥ ३२ ॥

अभिनवगुप्तकृतटीका ॥ ३२ अयं ॥ नास्ति

परमार्थप्रपा ॥

किन्त्वइनिसुगमं अत्रयुक्तिमाह येषामिति येषामर्थेयन्निमित्तं
यत्पोषणायराज्यंकांक्षितमभीप्सितंचपरेभोगाःसुखानिकांक्षि
तानि ॥ ३२ ॥ वनमालीटी. ॥

उक्तंप्रपंचयतिद्वाभ्यां गांगंधर्वविद्याःयेनभूमिस्वर्गानुज्ञानरश्मी
नूवाविंदतिलभतिलंभयतीतिगोविंद एर्दर्थ्येगोभिर्वेदैर्वेद्यतेइ
तिवाहेगोविंदयदर्थंअस्माकंराज्यादिकंतपनेआचार्यादयःप्रा
णधनादिकंत्यक्त्वायुद्धार्थंस्थिताः अतःकिमस्माकंराज्यादिनाऽतं
किमपीत्यर्थः ३२ ॥ उत्तमवैजयन्तीटी. ॥

ननुराज[illegible]मादीनिबहूनि[illegible]विषयानि
[illegible]प्रयःपश्यसीतिचेत्तत्राह [illegible] मुरेशुदि[illegible]भिःप्रार्थ्य
मानेषुविजयादिषुतदेच्छाउत्तमानजायतेतत्राह किंनोराज्येने

गाभिन्द्रियगणं विन्दत्यनन्तरात्मस्वरूपेण प्राप्नोमीति युज्यते याथार्थं सर्वदा सर्वेन्द्रियप्रवृत्तान्सर्वं जानासि तथापि ममाप्ययं यद्धृदयं तत्त्वं जानासीति गोविन्देति संबोधनाभिप्रायः राज्यादीनां निर्वेददत्वे बीजमाह येषामिति येषां स्वबन्धुवर्गीणामर्थे पालनाद्येनोऽस्माकं राज्यं कांक्षितमपेक्षितं भोगाः सुखापेक्षिताः सुखानि चापेक्षितानि ॥

गी. टी. प्र.

ति बंधुविरहितेन राज्येन किं शारीरेन्द्रियविषयसुखरूपैर्भोगैर्वा किं जीवितसाधनरूपेण विजयेन वा किम् न वाञ्छितानां नोऽस्माकमतितुच्छैरेभिर्न किमपीत्यर्थः ॥ ३२ ॥

मधुसूदनी ॥ ननु मा भूद्दृष्टं प्रयोजनं नि तु विजयो राज्यं सुखानि च

निर्विवादानीत्यत आह ॥

फलाकांक्षायुपायप्रवृत्तौ कारणं अतस्तदाकांक्षाया अभावान्तदुपायेषु युद्धे भोजनेच्छाविरहिण इव पाकादौ मम प्रवृत्तिरनुपपन्नेत्यर्थः अतः पुनरैतरपुरुषैरिष्यमाणेषु तेषु न वाञ्छितेत्याह किं न इति भोगैः सुखैर्जीवितेन जीवितसाधनेन विजयेनेत्यर्थः विना राज्यं भोगान्कौरवविजयं च वने निवसतामस्माकं तेनैव जगति श्लाघनीयजीवितानां किमेभिरकांक्षितैरिति भावः गोशब्दवाच्यानीन्द्रियाण्यधिष्ठानतया नित्यं प्राप्तस्त्वमेव ममैहिकफलविरागं जानासीति सूचयन् संबोधयति गोविन्देति राज्यादीनामानैपेक्ष्यमाह ॥ ३२ ॥

सदानंदी टी. ॥

राज्यादिभिर्नश्चास्माकमीषदपि प्रयोजनं त्वमिन्द्रियाण्यधिष्ठानतया प्राप्तोऽसि सर्वदा १ फले रागं विरागं च जानासीत्येवं सूचयन् गोविन्देत्याह राज्यादेरनपेक्षे हेतुमाह च २ एकाकिनो न राज्याद्यपेक्षितं तदपेक्षितं एषामर्थे त एते प्राणान्धनानि च त्यक्त्वा युद्धे स्थिताः ३ त्यक्त्वाचार्यादयो युद्धे मृत्युवक्त्रे स्वयं स्थिताः ते सर्वे संगरे यर्हि हत्वाचार्यकादयः ४ किं नः स्यात्तर्हि राज्यादिभोगैः पापकैरेहैर्यथा ५ ॥ ३२ ॥

नीलकंठी ॥

पूर्वश्लोकान्तरे ३२ ॥

आनंदी टीका

अत्रहेतुमाह [illegible] ३२ येषामिति येषां बान्धवानामर्थे

रामकंठी टीका

स्तगमोर्थः ३२

लासिकी वल्लभी टीका ॥

[illegible] योभिर्वेदांतवाक्यैः परमात्मरूपेण विद्यते लभ्यते इति गोविंद । [illegible] [illegible] नोस्माकं राज्येन किं भोगैः किं जीवितेन किं न किंचित्फलमित्यर्थः अत्रहेतुमाह द्वाभ्यां ३२ ॥ येषां बन्धूनां हेतो राज्यं भोगा विषयाः सुखानि विषयोपभोगजन्या हर्षा नोस्माकं कांक्षितं वाञ्छितम्

रणवीरसमिद्धोधिनी॥

अत्र हेतुमाह किंनइति कुतो न राज्यादयपेक्षेत्याह येषामिति ३२ ॥

रामचंद्रसरस्वतीकृतटीका ॥

किंन्नइति जीवितशब्दोविजयीजीवितीतिकार्यकारणभावाद्वि
जयंलक्षयति विनाराज्यंविनाभोगान्विनाकौरवविजयंवनेनि
वसतामेवजगतिश्लाघनीयजीवितानांनःपांडवानांकिमेभि
राज्यादिभिरितिभावः इंद्रियाणिगोशब्दवाच्यानिप्रधिष्ठानतया
नित्यप्राप्तत्वमेवास्माकमैहिकफलविरागंजानासीतिसंबोधन
व्याजेनाह गोविंदेति नतुस्वस्यविरक्ततायामपिस्वीयानामर्थेय
तितव्यमित्याशंक्याह येषामिति किंतयानरशार्दूलविदेशागत
याश्रिया प्रयोजनपशुपतिबंधुभिर्यानभुज्यते इत्युक्तेर्ये
षामर्थेस्माभिरेतत्फलमाकांक्षणीयं नएते प्राणान्धनानिचत्यक्त्वा युद्धेऽव
स्थिता इतिनस्वीयार्थेप्ययंप्रयत्न इतिभावः ३२

तइमेवस्थितायुद्धे प्राणांस्त्यक्त्वाधनानिच आः
चार्याःपितरःपुत्रा स्तथैवचपितामहाः ३३ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका ॥

तानेव विशिनष्टि आचार्या इति ॥ ३३ ॥ ३३ ॥

स्वामिकृतटीका ॥

येषामिति येषांस्वजनानामर्थेप्रयोजनायनोस्माकंराज्यभोगाःसु
खानिच तइमेयुद्धनिमित्तंप्राणान्प्राणत्यागंधनानित्यक्त्वा
विहायधनानिबाह्यप्राणांस्त्यक्त्वावस्थिताः अतःकिमस्माकंराज्यादि
भिःकृतमित्यर्थः ॥ ३३

रामानुजभाष्यम् ॥ उपक्रमम् ॥

तत्पर्यायमेवेयेनवातिमात्रविश्य ॥ ३३ ॥

अभिनवगुप्तकृतटीका ॥ ३३ ॥ नास्ति

परमार्थप्रपा ॥

तइमेअत्रयुद्धेधनानिविषयभोगोपकरणानिस्त्रीपुत्रादीनिप्राणांश्च
त्यक्त्वाअवस्थिताःसंतितेषुहतेषुराज्यंकेनभोक्तव्यं केवलंस्व
पिंडपोषणैकफलमित्यर्थः ॥ ३३ ॥

वनमाली टी॰ ॥ पूर्वश्लोकांतरे ॥ ३३ ॥

उत्कर्षदीपिका टी॰ ॥

राज्यादीनांनिर्वेदहेतुत्वमाह येषामिति येषांस्वबंधुवर्गाणाम-
र्थेयत्कार्येनोस्माकंराज्यंकांक्षितं भोगाःसुखानिच
[illegible]पेक्षितानि इमेमत्रेत्रगोचरवर्तिनस्तेपूर्वबंधवःप्राणान्
जीविताशांधनानिचधनाशांचत्यक्त्वापरित्यज्ययुद्धेस्थिताः इत्या
त्मनआत्मीयानांचसुखाद्यभावत्वान्निष्प्रयोजनंविजयादिक
मितिभावः ३३ ॥ येषामर्थेयुष्माकंराज्यभोगादिकमपेक्षितं नेकइत्याकांक्षायां

मधुसूदनी टी॰ ॥

राज्यादीनामाते हेतुमाह ॥ एतेनस्वस्यवैराग्येपिस्वीयानामर्थेयतनीयमित्यपास्तं एकाकि
नोहिराज्याद्यनपेक्षितमेवयेषांतुबंधूनामर्थेतदपेक्षितंते एतेते
प्राणान्प्राणाशांधनानिधनाशांचत्यक्त्वायुद्धेवस्थिताइतितेनस्वा
र्थः स्वीयार्थोवाप्रयत्नइतिभावः भोगशब्दः पूर्वत्रसुखपरतया

नानाद्वापीयाइतिसप्ता ध्यायम् ॥

गी॰
टी॰
म॰

निर्दिष्टोप्यत्र पृथक् सुखग्रहणात् दुःखसाधनविषयपरः प्राण
धनशब्दोपि तत्र दाराः शालक्ष्यकौश प्राणत्यागेपि स्वबंधूनामुपभोगाय
धनाद्यासंभवेदिति तद्वारणाय पृथग्धनग्रहणं ३३ ॥

सदानंदी टी॰ ॥

पूर्वश्लोकान्ते ३३ ॥

नीलकंठी ॥ टी॰ ३३ ॥

129

वान्यवानेव आह आचार्येति

आनंदी टीका [illegible]

देवंवांधवानामर्थे २२ [illegible]

रामकंठी टीका

स्पष्टम् २२

लासिकी [illegible] टीका

देवंबांधवानामर्थे वान्यवानेवाह [illegible] अथवि हेत्वमाह

[illegible] देवानामितिद्वाभ्यां [illegible] विषयाः [illegible] त्वमाह सवान्

तद्भवे बान्धवः प्राणभूतानि धनानि [illegible] सर्वस्वभूतान्

प्राणान् अथवा धनानि सर्वस्वभूतान् प्राणान् अथवा प्राणान् अ

नूधनानि अर्थात्त्यक्त्वा उपस्थिता इहैवास्थिताः तान्बन्धून्विशि

नष्टि आचार्या इत्यादिना [illegible] २२

वराणवीरसमिद्धोधिनी॥

केत इत्यपेक्षायामाह आचार्या इत्यादि २ ॥

२२

रामचंद्रसरस्वतीकृतटीका ॥

इत्युक्ते येनामर्थैस्ताभिर्वेनत्फलमाकांक्षणीयं न एतेषां प्राणशा
यनार्थाद्यत्मकाद्य्दे ऽवाप्यिनाइतिनमीमांसायंयम्यनरति
भावः प्राणशायांत्मकायांसर्वत्यागात्पुनर्धनग्रहणं प्राणेभ्यो
पि धनस्यापेक्षणीयतायातनार्थं प्राणधनशाह्याभ्यां तदाशालः
क्षणीये भोगशाह्योविषयपरः केनेत्यपेक्षितेऽत्तरश्लोकः सच
स्पष्टः ॥ ३२ ॥

131

भाषा अनुवाद

क्या करनाहै हमे राज्य लेकर हेगोविंद श्रोर भोगसे क्याहै श्रोर जीनेसे भी हमे क्या प्रयोजनहै कि जिनके वास्ते हम राज्य भोग सुखकी श्राकांक्षा करतेहै वेई पाण्डव प्राण धन छोड मेरेसामने संग्राममे खडेहै श्रोर श्राचार्य पितृ पितामह पुत्र पौत्रही सकल देख खडेहै ॥ ३२ ३३ ॥

दोहा

राज्यभोगजीवन भए क्या हमरो गोविंद जिन्हलग चाहें हें
हमे राज्यभोगसुखसंग ३३ ॥

नायोद्धारः उभयोःसेनयोर्मध्येमदीयाएवअतोनयोत्स्यामीतिभा
वः ३५ ॥ सदानंदी टी॰ ॥

ननुत्वंकृपयाविष्टोयदिमांत्वंहनिष्यसि राज्यलोभाद्धनिष्यंतित्वा
मेतइतिचेच्छृणु १ त्रैलोक्यराज्यसंसिद्ध्यैनैतान्हंतुंहतोप्यहं उ
र्वीमिच्छामपिस्वीयान्किंतुहन्यांमहीकृते २ मधुसूदनवेदाद्युसं
प्रदायप्रवर्तक मामपिप्रेरयश्रौतमार्गेमोक्षप्रदेशुभे ३ विनि
वर्त्याशुभान्मार्गादितिभावोर्जुनस्यच ४ ॥ ३५ ॥

नीलकंठी ॥

स्यालाइतिस्यालशब्दोदंत्यादिः विजामातुरुततवाग्यास्यालादिति
मंत्रवर्णात् स्यालाल्लाजानावपतीतिवालाजालाजतैःसंसृष्टैःस्यते
इतियास्कः ३५ ॥

आनंदी टीका

यदित्वंकृपयैतान्नहंसि नर्हित्वामेवैनेहनिष्यन्ति तत्वमेवैतान्हत्वाराज्यंभुंक्ष्वेत्याशंक्याह ३४ ॥

रामकंठी टीका

सप्तम् ३५

लालिकी [illegible] टीका

सम्बन्धिनोविवाहादिसंबन्धयुक्ताः अतएव ॥ [illegible] एतानाचार्यादीन्नतोपि मारयतोपि

रत्नवीरसमिहो

एतानाचार्यादीन् एतेनस्वधर्मप्रच्युतिर्मोहादिफलंदर्शितं ननुजिघांसंतंजिघांसीतेति नियमादजिघांसन्तःकिंप्रहर्तुनेच्छासीतिनेत्याह अतोपीति ३ ॥

३५

रामचंद्रसरस्वतीकृतटीका ॥

ननूत्कलकन्यायानाहृष्टी तावत्तत्रायर्थैसाधनीयामात्तुभवतो
भोगादीच्छेत्याशंक्याह हे नानिति ब्रूतोप्येतान्भ्रातृन्हंतुमिच्छामः
हे न कुर्यां किमुत हन्यां नहि पुत्राणामिंद्रादिपदाभिलाषेणापि
भ्रातरो हंतव्याः किमुत भूमिलाषेण त्वमपि पुत्रहिताय ममेव हिंसि
तवानसि नैनमिति संबोधनव्याजेनोक्तं ॥ ३४ ॥

२४ ५

भाषा अनुवाद ॥

जो कहो कि कृपा करिके चाहो तुम इन्हे छोडो परये सब संग्रा
ममें अब तुझे मारे होंगे विनमारे किसी तरह न छोडेंगे इससे
तुम इनसबको संहारकरि राज्यभोग क्यों न करो तो हे मधुसूदन
ये लोग चाहे हमे मारे परन्तु मारते हुयेभी मामा नाती पोते
भतीजे ससुरे संबन्धी इनको हम मारनेकी इच्छा नही करते
है ॥ ३५ ॥

दोहा॥

सोयहस्थितहैं युद्धमेत्याग देखब प्रक्रमाण पितृगुरोहित पु
त्र सम पितामह त्यों जान ३४॥ मामा ससुर साला तथा
पौत्रसाकसंबंद इनकों नहि मारा चहों प्राण अंतगोविंद॥

136

अपि त्रैलोक्यराज्यस्य हेतोः किन्नु महीकृते नि
हत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ३५।

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

पृथिवीप्राप्त्यर्थं हि हननमेतेषामिष्यते नच तत्प्राप्तिः समीहिते
ति कैमुतिकन्यायेन दर्शयति अपीति नहि महदपि त्रैलोक्यलक्ष
णं राज्यं लब्धुं स्वजनहिंसायै मनो मदीयं स्पृहयति पृथिवीप्रा
प्त्यर्थं तु नतरां न स्पृहयामीति किं वक्तव्यमित्यर्थः दुर्योधना
दीनां शत्रूणां निग्रहे प्रीतिप्राप्तिसम्भवाद्युद्धं कर्तव्यमित्याशङ्क्
याह निहत्येति ३५ ॥

स्वामिकृतटीका ॥

त्रैलोक्यराज्यस्यापि हेतोः प्राप्त्यर्थं हन्तुं नेच्छामि किं पुनर्महीमा
त्रप्राप्त्यर्थमित्यर्थः निहत्येति हे जनार्दन जनान् देवविपक्षभू
तान् असुरादीन् अर्दयति पीडयति अथवा जनैरधिकाविरुद्धै
रभ्युदयादिकमर्थ्यते प्रार्थ्यते स्मादिति जनार्दनः हे जनार्दन धार्त
राष्ट्रान्निहत्य नः अस्माकं का प्रीतिः किं सुखं स्यात् न किमपीति
नवम ॥ ३५ ॥

रामानुजभाष्यम् उपक्रमे ॥ ३५ ॥

अभिनवगुप्तकृतटीका ॥ ३५ ॥ नास्ति

परमार्थप्रपा ॥

त्रैलोक्यराज्यस्यापि हेतोः एतान्हन्तुं नेच्छामि किं पुनर्महीकृ
ते किंभूतानेतान् घ्नतोपि मारयतोपि स्वात्मानं हन्तुं प्रवृत्तानपि
तेन हन्तव्या इत्यर्थः यथा दैववशात्प्राणघातायोपस्थितस्य ति
र्यग्भावं प्राप्तस्य गर्भकस्य हनने माता न प्रवर्तते तद्वदस्मद्दैवनो
दितास्ते यत्किंचित्कुर्वन्तु तथापि वयं तान् हन्तुं नार्हाः ॥ ३५ ॥

वनमालीटी· ॥

त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमपि हन्तुं नेच्छामि किं पुन
र्महीमात्रप्राप्तय इत्यर्थः मधुं सूदयतीति मधुसूदनः जनान् अर्द
यति गमयति जीवान् सदसद्गती ति जनार्दनः का प्रीतिः
किं सुखं ३५ ॥

गी. टी. प्र.

137

अथ भैवेजयन्ती टी.॥

ननु करुणां हित्वैतान् शीघ्रं त्वं मारय नो चेदकरुणं एते सकरुणं
त्वां मारयिष्यन्त्येवेति चेत्तत्राह एतान्नेति एतान् घ्नतोऽपि स्वान् घ्नत
एतोऽप्यहं त्रैलोक्यराज्यस्यापि हेतोस्त्रिभुवनराज्यप्राप्त्यर्थमपि
कामी तान्बंधुवर्गान्हन्तुं नेच्छामपि न करोमि महीकृते महीमात्रस्य
प्राप्तये तु किमु वक्तव्यमिति भावः मधुसूदन मधुनामानं महा
रं सूदयति पूर्वं यथा वेदापहारिणं महासुरं हत्वा सद्धर्मप्रवर्तक
स्त्वमासीस्तथेदानीमपि मम बंधुवधेच्छात्मकं महान्तं महासुरं नि
हत्यैव स्वेन हरूपं सद्धर्मं प्रवर्तयेति सम्बोधनकथनस्याभिप्रा
यः नन्वितराचार्यादीन्विहाय युष्माकमतिदुःखदान् हननाततायि
नो बहूपकर्तॄन्केवलं दुर्योधनादीनेव त्वं मारयेः तेषां वधे तु भ
वतां सुखमेव भविष्यतीति चेत्तत्राह निहत्येति धार्तराष्ट्रान्प्रज
रायस्तस्य नेत्रहीनस्य राज्यलुब्धस्य धृतराष्ट्रस्य पुत्रान्निहत्य स्थि
तानां नोऽस्माकं का प्रीतिः स्यान्न कापीत्यर्थः ॥ ३५ ॥

मधुसूदनी ॥

त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमप्यस्मान् घ्नतोऽप्येतान्नहं
न्तुमिच्छामि इच्छामपि न कुर्यामहं किंपुनर्हन्यां महीमात्रप्राप्त
ये तु न हन्यामिति किमु वक्तव्यमित्यर्थः मधुसूदनेति संबोधय
न्वैदिकमार्गप्रवर्तकत्वं भगवतः सूचयति नन्वन्यान्विहाय धार्त
राष्ट्रा एव हन्तव्यास्तेषामत्यन्तक्रूरतरतदुःखदातृत्वेन वधे प्री
तिसंभवादित्यत आह धार्तराष्ट्रान्दुर्योधनादीन्भ्रातॄन्निहत्य स्थितानां
नोऽस्माकं का प्रीतिः स्यान्न कापीत्यर्थः नहि मूढजनोचितक्ष
णमात्रवर्तिसुखाभासलोभेन चिरतरनरकयातनाहेतुर्बंधुवधो
ऽस्माकं युक्त इति भावः ॥ ३५

[मधुसूदनी] ॥ सदानंदी टी.॥

नन्वन्यान्संपरित्यज्य दुर्योधनमुखाः खलाः हन्तव्याः क्रूरनाशी स्या
त्प्रीतिरित्यत आह सः १ दुर्योधनमुखान्भ्रातॄन्निहत्यास्माकमीदृ
शान् न कापि प्रीतिराभाति हिंसा क्वापि नो वरा २ क्षणिकानंद
लोभेन नैतेषामुचितो वधः यद्येवं पापयातर्हि हन्तव्याः खलना
शिना ३ प्रलये सर्वसंहारकर्तृत्वेनाप्यसंगिना जनार्दनपदेनेति

ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यन्त्येव अत स्त्वमेवैतान्हत्वा राज्यं भुंक्ष्वेत्यत आह

ना

नहू पं.

गी. टी. प्र.

137

अस्मैवैजयन्ती टी.॥

ननुकल्याणेहित्वैतान् शीघ्रं त्वं मारय नो चेदकल्याणमेते सकल्याणं त्वां मारयिष्यन्त्येवेति चेत्तत्राह एतानिति एतान् घ्नतोप्यस्मान्घ्नत यतोप्यहं त्रैलोक्यराज्यस्यापि हेतोस्त्रिभुवनराज्यप्राप्त्यर्थमप्ये तान्बंधुवर्गान्हन्तुं नेच्छामपि न करोमि महीकृते महीमात्रस्य प्राप्तये तु किमुवक्तव्यमितिभावः मधुसूदन मधुनामानमसुरं सूदयति पूर्वं यश्चाथ वेदापहारिणमसुरं हत्वा सद्धर्मप्रवर्तकस्त्वमासीस्तथेदानीमपि ममबंधुवधेच्छात्मकं महान्तमसुरं निहत्यैश्वर्येण स्वरूपं सद्धर्मं प्रवर्त्तयेति संबोधनकथनस्याभिप्रायः नन्वितराचार्यादीन्विहाय युष्माकमतिदुःखदान्हननाततायिनो बहुपकर्तृन्केवलं दुर्योधनादीनेव त्वं मारयैषां वधेन तु भवतां सुखमेव भविष्यतीति चेत्तत्राह निहत्येति धार्तराष्ट्रान्धृतराष्ट्रस्य नेत्रहीनस्य राज्यलुब्धस्य धृतराष्ट्रस्य पुत्रान्निहत्यास्थितानां नोस्माकं का प्रीतिः स्यान्न कापीत्यर्थः ॥ ३५ ॥

मधुसूदनी ॥

त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमप्य[illegible]स्मान् घ्नतोप्येतान्नहंतुमिच्छामि इच्छामपि न कुर्यामहं किंपुनर्हन्यां महीमात्रप्राप्तयेतु न हन्यामिति किमु वक्तव्यमित्यर्थः मधुसूदनेति संबोधयन्वैदिकमार्गप्रवर्तकत्वं भगवतः सूचयति नन्वन्यान्विहाय धार्तराष्ट्रा एव हंतव्यास्तेषामत्यंतक्रूरतरत्वदुःखदातृत्वं बधे प्रीतिसंभवादित्यत आह धार्तराष्ट्रान्दुर्योधनादीन्भ्रातृन्निहत्य स्थितानां नोस्माकं का प्रीतिः स्यान्न कापीत्यर्थः न हि मूढजनोचितक्षणमात्रवर्तिसुखाभासलोभेन चिरतरनरकयातनाहेतुर्बंधुवधोस्माकं युक्त इतिभावः ॥ ३५

ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यन्त्येव अतस्त्वमेवैतान्हत्वा राज्यं भुंक्ष्वेत्यत आह

[illegible] ॥ सदानंदी टी.॥

नन्वन्यान्संपरित्यज्य दुर्योधनमुखा बलाः हंतव्याः क्रूरनाशी स्यात्प्रीतिरित्यत आह सः १ दुर्योधनमुखान्भ्रातृन्निहत्यास्माकमीहशान् न कापि प्रीतिराभाति हिंसाकृतापि नो वरा २ क्षणिकानंदलोभेन नैतेषामुचितो वधः यदि वध्यास्तु यातर्हि हंतव्याः खलनाशिना ३ प्रलये सर्वसंहारकर्तृत्वेनाप्यसंगिना जनार्दनपदेनेति

आनंदी टीका

आचार्यादिभ्यद्दिनावकृपा तर्हि तान्परित्यज्यैतनायिनोथा।
नेराष्ट्रं जहिहत्याशंकाह ३५ ॥ 'निहत्येति

रामकंठी टीका

स्पष्टम् ३५

लातिकी ~~[illegible]~~ टीका

आचार्यादीन्मारयतोपि त्रैलोक्यराज्यप्राप्त्यर्थमपि नेछामि।
किं पुनर्वक्तव्यं महीमात्रप्राप्तये हंतुमिच्छामि किं तु त्वं स्यात्
न किमपि ३५ ॥

हे जनार्दन धार्तराष्ट्रान् हत्य नो अस्माकं

रणवीरसमिद्धोधिनी॥

यद्यर्थ्यं चैते हन्युं तेतस्यामया: प्राणैरपि न समीहितेति कैमु
त्येनाह अपीति त्रैलोक्यराज्यमपि लब्धुं न वयं जिघांसामि
किमुतमहीमात्रंप्राप्तुमिति हे तु कथनं प्रतामप्यहननेच्छति
नतु प्रीतिमात्रमेव प्रयोजकं भवतित्याशंकाह निहत्येति ३६

स्तुवितेस्तुत्मबुद्धिना ध ॥ ३५ ॥

नीलकंठी ॥ टी० ॥

हंतुंइच्छापिममनभवति किमुतहंतुंत्वमित्यर्थः महीकृतेपृ०
थिव्यर्थे ३५ ॥

139

रामचंद्रसरस्वतीकृतटी° ॥

किंचपुत्रादीनांपृथिवीभवतितिभ्रातृहृतेभुक्षीयंनकिंचित्प्रयो
जनेपशूणामीत्याह निहत्येति नह्यन्यस्यस्वार्थायान्येनाकरणीयंक
रणीयमितिभावः नचवयंहंतुमप्येतान्विनासंहर्तुंस्तवेच्छा प्रभवामइ
त्याशयेनाह जनार्दनेति ॥ ३५ ॥

भाषा अनुवाद

~~जो कहो कि कृपा करिके चाहो तुम इन्हे छोडो परंवे सब संग्राम में खब तुले मारैंगे तिनमारे किसी तरह न छोडेंगे इससे हम इन सबको संग्राम करि [illegible] मधुसूदन ये लोग चाहे हमें मारें परंतु मारने कुं ये भी~~ ॥ जिनको हम तीन लोककी राज्य संपदा के वास्ते भी मारनेकी इच्छा नहीं रखते तो हे जनार्दन केवल पृथिवी भरकी राज्य के हेतु दुर्योधन आदिको नाश करिके हमारी क्या प्रीति अर्थात् कौन बड़ा कार्य सिद्ध होगा तात्पर्य यह कि कुटुम्ब को नाश करि हमको संसार का सुख नहीं है ३५ ॥

दोहा

मिलें राज्य त्रैलोक कीं भूमि हेत का बात हत्य मारकु हून ह
मे का प्रीति सरसात ॥ ३ ॥

पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः तस्मा
न्नार्हा वयं हंतुं धार्तराष्ट्रान्स्वबांधवान् स्वजनं हि
कथं हत्वा सुखिनः स्याम माधव ३७ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

यदि पुनरमी दुर्योधनादयो न निगृह्येरन् भवन्तस्तर्हि तैर्निगृ
हीता दुःखिताः स्युरित्याशंक्याह पापमेवेति यदीमे दुर्योधना
दयो निर्दयाघानेवास्मान् युद्धभूमौ हन्युस्तदैतानग्निदो गरदश्चेत्या
दिलक्षणोपेतानाततायिनो निर्दोषस्वजनहिंसाप्रयुक्तं पापं
पूर्वमेव पापिनः समाश्रयेदित्यर्थः अथवा यद्यप्येते भवन्त्याततायिनस्तथाप्येतानतिशोच्यान् दुर्योधनादीन् हिंसित्वा तत्कृ
तं पापमस्मानेवाश्रयेदतो नास्माभिरेते हन्तव्या इत्यर्थः अथ
वा गुरुभ्रातृसुहृत्प्रभृतीनेतान् हत्वा वयमाततायिनः स्यामः
ततश्चैतान् हत्वा तत्कृतं पापमाततायिनोऽस्मानेव समाश्र
येदिति युद्धादुपरमणमस्माकं श्रेयस्करमित्यर्थः फलाभावा
दनर्थसम्भवाच्च परहिंसा न कर्तव्येत्युपसंहरति तस्मादिति ।
किंच राज्यसुखेप्सुर्हि नृप युद्धमुपक्रम्य तेन च स्वजनपरिक्षये
सुखमुपपद्यते तेन न कर्तव्यं युद्धमित्याह स्वजनं हीति ३७ ॥

स्वामिकृतटीका ॥

ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव ष
डेते ह्याततायिन इति स्मरणादग्निद त्वादिभिरपि षड्भिरपि हेतुभिरे
ते तावदाततायिनः आततायिनामेषां च वधो विहितत्वाद्युक्त एव
आततायिनमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हंतु
र्भवति कश्चनेति वचनात् तत्राह साथैनपापमिति आततायिन
मायांतमित्यादिकमर्थशास्त्रं धर्मशास्त्रादुर्बलं यदुक्तं याज्ञवल्के
नेति स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु
बलवद्धर्मशास्त्रमिति स्थितिः तस्मादाततायिनामप्येतेषामाचा
र्यादीनां वधेऽस्माकं पापमेव भवेत् अन्याय्यत्वादधर्मत्वाच्चैतद्वधस्य
इत्येतामाशंकां धर्मशास्त्रस्यार्थशास्त्राद्बलवत्त्वेन परिहरति पाप
मिति न केवलमिहलोके सुखं नास्ति परलोकेपि तन्नास्ति यस्मा
देतानाततायिनो हत्वास्मान्पापमेव नरकादिदुःखकारणमा

अयेत् ३६ यस्मादेतेषां हनने लोकद्वयेप्यकल्याणमेव तस्मात्सर्वा न् स्वबांधवान्धार्तराष्ट्रान् हंतुं वयमर्हा न एतेषांन्यायत्वात् अथ मेत्वाच्च न केवलमस्माकं पारलौकिकं दुःखं न भवति ऐहिकमपि न भवतीत्याह स्वजनमिति हे माधव हि यस्मात् स्वजनं हत्वा वयं इह सुखिनः कथं स्याम ३७ ॥

वधस्या

रामानुजभाष्यम् ॥ उपक्रमे ॥ ३७ ॥

अभिनवगुप्तकृतटीका ॥

अमी आचार्यादय इति विशेषबुद्ध्या बुद्धावारोप्यमाणा वधकर्मतया ऽवश्यं पापदायिनः तथा भोगसुखादि दृष्टार्थमेतद्युद्धं क्रियत इति बुद्ध्या क्रियमाणे युद्धे एव वधहननादि तदवश्यं पातककारीति पूर्वपक्षाभिप्रायः अत एव स्वधर्ममात्रतयैव कर्माण्यनुतिष्ठन् विशेषधियेत्युत्तरं दास्यते निहत्यथातेति आततायिनो हननेन पापमेव कर्तृ अतो ऽयमर्थः पापेन तावदेते समाक्रान्ता हताः परतंत्रीकृताः तांश्च निहत्यास्मानपि आश्रयेत् पापमत्र लोभवशात्कुलक्षयादिदोषादर्शनम् अत एव कुलादिक्षयमाणमुपपत्तिं करोति स्वजनं हि कथमित्यादिना ॥ विशेषफलबुद्ध्या हन्तव्यादिविशेषबुद्ध्या च हननं महापातकमित्येतदेव संक्षिप्याभिधा तम् ॥ ३७ ॥

ता

परमार्थप्रपा टी॰ ॥

तदुक्तं उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागस इति अथास्मासु तत्कृपया सख्ययुद्धेषु सत्स्वेतेकथं हनिष्यतीत्याह आततायिन इति अपराधराहित्येपि परं हन्तुं अत्र स्मृतिः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आततायिनः इति आततायिनमायान्तं हन्यादेवाविचारयन् इत्याद्यपि स्मृत्युक्तमस्तीति चेन्न इदं चौरादिषु द्वेष्येषु राजनीतौ प्रोक्तं न पुत्र पौत्रादिदिति ॥ ३७ ॥

षि॰

वनमाली टी॰ ॥

नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ता च षडेते आततायिनः आततायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्युक्तात् आततायिलक्षणयुक्तान् जहीत्यत आह पापमिति आततायिवधबोधकशास्त्रार्थशास्त्रत्वेन अहिंसा परमो धर्म इत्यादि धर्मशास्त्रतो दुर्बलत्वेन बाधितत्वादाततायिनां ग्रहणं तत्संबंधिनामाचार्याणां वधो नास्माकमिष्टः किं तु पापमेव

स्यार्

कामीतिरित्युक्तं स्पष्टयति स्वजनं हीति मायालक्ष्म्याः धवः पतिर्माधवः
श्रीमानोना प्रतिबंध इति वा मा न विद्यते पतिर्यस्य स माधवः मायो
लक्ष्मीतनयमौं वहति वर्तयतीति वा

भवेत् ३६ ॥

अस्त्रमैवैजयन्ती टी॰ ॥

नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आ
ततायिन इति आततायिनमायान्तं हन्यादेवाविचारयन् नाततायि
वधे दोषो हन्तुर्भवति कश्चनेति वचनात्सर्वप्रकारेणाततायिना
मेषां वधे दोषाभावात्कथं एते हन्तव्या तत्राह पापमेवेति आतता
यिनोऽपि एतान् दुर्योधनादीन् हत्वा स्थितानस्मान् पापमेवाश्रयेदा
श्रयात् हे जनार्दन [illegible] कामीति
[illegible] नन्ति
[illegible]
[illegible] पापमेवेति [illegible] ॥ पूर्वोक्तवध
नेन बन्धुवर्गातिरिक्ताततायिविषयमिति भावः तस्मादिति यस्मा
देतेषां वधे श्रेयसोऽभावस्तस्मात्सबान्धवानेतानाततायिनोऽपि धा
र्तराष्ट्रान् हन्तुं वयं नार्हा [illegible] न योग्या भवामः हि यस्मात्स्वज
नं हत्वा [illegible] कथं सुखिनः स्याम भवेम न कथमित्यर्थः
प्रतिधर्मशीलस्य मम योर्वंशोऽत्पन्नस्त्वमन्यकर्माणि बन्धुवधरूपे
मा प्रेरयसि मा यवेति संबोधनाभिप्रायः ३७ ॥

मधुसूदनी ॥

जनार्दनेति संबोधनेन यदि दस्यूनपि त्वमेवैतान् जहि प्रलये
सर्वजनहिंसकत्वेऽपि सर्वपापासंसर्गित्वादिति सूचयति नन्वग्नि
दो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आत
तायिन इति स्मृतेरेतेषां च सर्वप्रकारेणाततायित्वात् आततायिन
मायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्च
नेति वचनेन दोषाभावप्रतीतेर्हन्तव्या एव दुर्योधनादय आतता
यिन इत्याशङ्क्याह पापमेवेति एतानाततायिनोऽपि हत्वा स्थिता
नस्मान्पापमेवाश्रयेदिति संबंधः अथवा पापमेवाश्रयेत् न किंचि
दन्यद्दृष्टमदृष्टं वा प्रयोजनमित्यर्थः न हिंस्यादिति धर्मशास्त्रादात
तायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलत्वात् तदुक्तं याज्ञवल्क्येन
स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थशास्त्रात्तु बलव

द्धर्मशास्त्रमिति स्थितिरिति अपराधाभावेन तु धार्तराष्ट्रान् घ्नतां भव-
तां प्रीत्यभावेपि अस्मान् घ्नतां धार्तराष्ट्राणां प्रीतिरस्त्येवातस्तेऽस्मा-
न् हन्युरित्यत आह पापमेवेति तस्मात् हत्वा स्थितानेतानाततायि-
नो धार्तराष्ट्रान् पूर्वमपापिनः सांप्रतमपि पापमेवाश्रयेत् नान्य-
त्किंचित् सुखमित्यर्थः तथा चायुध्यतोस्मान् हत्वैत एव पापि-
नो भविष्यंति नास्माकं कापि क्षतिः पापासंबंधादित्यभिप्रायः ३६
फलाभावादनर्थसंभवाच्च परहिंसा न कर्तव्येति न च श्रेयोनुपश्या-
मीत्यारब्धं तदुपसंहरति ॥ अदृष्टफलाभावोनर्थसंभवश्च तच्छ-
ब्देन परामृश्यते दृष्टसुखाभावमाह स्वजनं हीति माधवेति ल-
क्ष्मीपते त्वामलक्ष्मीके कर्मणि प्रवर्तयितुमर्हसीति भावः ३७॥

सदानंदी टी ॥

नन्वाततायिनां हिंसा न च पापकरी स्मृता अग्निदो गरदश्चैव शस्त्र-
पाणिर्धनापहः ५ क्षेत्रदारापहारी च षडेते ह्याततायिनः आतता-
यिनमायांतं हन्यादेवाविचारयन् ६ नाततायिवधे दोषो हंतुर्भ-
वति कश्चन इति शास्त्रेण हंतव्याः पुत्रवच्चेति चेदुच्यते ७ पापमे-
वाश्रयेदस्मान् श्रेयोपि कथंचन पापिनां न सुखं किंचिदिह दृष्टं नादृ-
ष्टमेव वापि ८ न हिंस्यात्सर्वभूतानीत्येवं धर्मानुशासनात् अर्थ-
शास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृतेः ९ अस्मान् युध्यतो हत्वैतान
प्येतानाततायिनः पापमेवाश्रयेन्नान्यच्छ्रेय इत्यर्थ एव वा १० पर-
हिंसा न कर्तव्या सर्वश्रेयोभिघातिनी तेनैतान् वयं हन्तुं योग्याः
स्वीयानन्यानपि नैवैतेषां वधे दृष्टसुखं नो भाति माधव नास्मिन्
कर्मण्यलक्ष्मीके प्रवर्तयितुमर्हसि ३७ ॥

नीलकंठी टी॰ ॥

आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारह-
रश्चैव षडेते आततायिनः आततायिनमायांतं हन्यादेवाविचारयन्
नाततायिवधे दोषो हंतुर्भवति कश्चनेति यद्यप्येवं तथापि एतान्
हत्वा अस्मान् पापमेवाश्रयेत् आततायिवधो हि अर्थशास्त्रविहि-
तः न हिंस्यात्सर्वभूतानीति तु धर्मशास्त्रं तच्च पूर्वस्मात् प्रबलं यथो-
क्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थ-
शास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति अस्मात् हत्वा एतान्

आनंदी टीका

आततायिनः सतोपि धृतराष्ट्रस्य पुत्रान्हत्वा पापमेव ज्ञलत्वय हतैवक्ष्यमाणप्रकारेणाश्रयेदित्यर्थः ३६ ॥ एतदेव विशेषयति तस्मादिति

रामकंठी टीका ।

स्पष्टम् ३६ ॥

लासिकी वल्लभी टीका

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आततायिन इति स्मरणादेतेषां सर्वेषामाततायित्वात् आत- मा तायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्यस्मिन्नाततायिवधे हन्तुर्दोषाभावप्रतीतेर्हन्तव्या एवैते इति तत्राह सार्धेन पापमिति एतानाततायिनो हत्वास्मान् पापमेवाश्रयेत् न दृष्टादृष्टप्रयोजनं यतो न हिंस्यात्सर्वभूतानीति धर्मशास्त्रादाततायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलत्वात् यदुक्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः यस्मादेवम् ३६ ॥ न केवलं पारलौकिकं सुखं नास्ति ऐहिकमपि नेत्याह स्वजनमिति ३७

रणवीरसमिद्धोधिनी ॥

प्रीतिरूपं चेष्टं दूरे तावदास्तां प्रत्युतानिष्टापत्तिरेवेत्याह पापमेवेति एतानाचार्यादीन्हत्वाततायिनः संपन्नानस्मान्पापमेवाश्रयेन्न तु किंचिदिष्टं स्यात् आततायिलक्षणं च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आततायिन इति उक्तमर्थमुपसंहरति तस्मादिति यस्माद्बन्धुवधे फलाभावोऽनर्थापत्तिश्च तस्माद्धेतोः ३७ ॥

आततायिनःपापमेवाश्रयेद्धित्वापरायोजिता तथाचपतनएवास्मद्
येननपुण्यंतेनतुवयमेतेषांवधेननंत्स्यामइतिभावः ३६ ॥ ३७ ॥

२ नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहर्ता च षडेते ह्याततायिन
इति स्मृतेरेषां दुर्योधनादीनां सर्वैः प्रकारैराततायित्वादाततायिनमायान्तं ह
न्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेति वचनाद्धन्तव्या ए
वैत इत्याशंक्याह

रामचंद्रसरस्वतीकृतटीका ॥

२ पापमेवेति स्थितानित्यथा हत्वा समानकुलैकतान्ह्येतान्या श्रेयं स्यादे
न हिंस्यादिति धर्मशास्त्रादाततायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलमि
ति भावः तदुक्तं अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति
न च श्रेयोनुपश्यामीत्यारभ्य स्वजनवधादिवांछाभावात्केन तद्वधोस्माकं
कमितियदुक्तं तदुत्तरत्र विशेषाभिधित्सया तावन्निगमयति तस्मा
दिति किंच स्वान्हत्वा न निर्वृतेन तद्भूमादपि रणादपि विजितं तत्क्षत्रिय
स्यैव दृष्टधर्मोपवृद्धजितं च धर्मो धनं तथापि श्रेयः साधनमतो श्रेयः
स्वजनवधे श्रेयो नानुबंधि अन्यथा दुर्योधनादीनामपि धर्मतापत्तेः त
तस्माच्छ्रेयोनुबंधित्वाय्यतद्विजयादीनामनाकांक्षणीयत्वेन श्रे
यस्त्वाभावात् असमुद्धस्याधर्मत्वेनाकर्तव्यता वदन्नश्रेयोनुबं
धित्वं विजयादीनामाह स्वजनं हीति सार्धसप्तभिः ॥ ३७ ॥

स्वादिभिः
क्षत्रियस्य

भाषा अनुवाद

जो कहो कि घरमे आगलगाय या विष पिलाय मारे अथवा वध करनेको खड्ग उठाये और धन हरन करे या भूमि छीनले और स्त्री हरिलेनेवाला ये छवो आततायी कहातेहैं इनके मारनेमें दोष नही है ऐसा शास्त्र अर्थात् नीतिमे लिखाहै इस बात पर अर्जुन उत्तर देतेहैं कि यह आपकी अभिप्राय केवल नीति युक्तहै पर धर्मशास्त्रके अपेक्षा यह नीति पक्ष दुर्बलहै याज्ञवल्क्यने कहाहै कि नीति और धर्मका जहां विरोध हो तहां स्मृति मूलक युक्ति बलवतीहै और अर्थशास्त्रसे धर्मशास्त्रप्रबलहै इससे आततायि स्वरूप आचार्य्य आदिकको नाश करनेसे हमको अवश्य महापाप होगा और इन लोगोंका वध अयोग्यहै और अधर्म्म लोकपरलोक मे अयश और दुःखका मूलहै तो कहो हे माधव हम अपने स्वजनको विनाश करिके कैसे सुखी होंगे इससे बन्धु समेत धृतराष्ट्र पुत्रोंको मारनेको मेरी सामर्थ्य नही है ॥ ३७ ॥

दोहा ॥

इन आततायिनके हने हमे पापइकहोग कौरवस्वबांधवको
हमे ताते हननयोग ३० ॥

147

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः कुल
क्षयकृतं दोषं मित्रद्रोहे च पातकं ३८ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

कथं तर्हि परेषां कुलक्षये स्वजनहिंसायां च प्रवृत्तिस्तत्राह यद्य
पीति लोभोपहतबुद्धित्वात्तेषां कुलक्षयादिप्रयुक्तदोषप्रतीत्य
भावात् प्रवृत्तिविस्रम्भः सम्भवतीत्यर्थः ॥ ३८ ॥

स्वामिकृतटीका ॥

ननु चैतेषामपि बंधुवधदोषे समाने सति यथैवैते बंधुवधदो
षमंगीकृत्य युद्धे प्रवर्तंते तथैव भवानपि प्रवर्ततां किमनेन वि
षादेनेत्याशंक्य बुद्धिभेदेन परिहरति यद्यपीति यद्यप्येते धार्तरा
ष्ट्रा लोभोपहतचेतसः तिरस्कृतकर्तव्याकर्तव्यविवेकविज्ञाना
सन्तः कुलक्षयकृतं गोत्रवधनिमित्तं दोषं मित्रद्रोहे च पातकं न
पश्यंति ॥ ३८ ॥

रामानुजभाष्यम् उपक्रमे ॥ ३८ ॥

अभिनवगुप्तकृतटी० ॥

परितापातिशयसूचनाय शास्त्रगतमेवार्जुनोक्तवचनमाह अहोब
तेति ॥ ३८ ॥

परमार्थप्रपाटी० ॥

अथ तेऽपि कथं पुत्रपौत्रादिविनाशव्यवहारे न रता इतीत्याह लोभोपहत
चेतस इति राज्यभोगेच्छया अपहृतत्वप्रकाशस्मृति चेतो येषां ते तथा अ
[illegible] जनभाजनाभीति [illegible]कृतत्वात् ॥ ३८

वनमालीटी० ॥

...आततायिनं सम्यगनि स्वजनं हीति मायालक्ष्याथ वः पुनि[illegible]
[illegible]आततायिनः प्रतिषेध इति वचनात् [illegible] नेथ वः पति[illegible]
[illegible] समोवाय [illegible] माथो [illegible] धर्मावह [illegible] तयनीतिवा न

तथाप्यस्माकं च

ननु यद्येतेषां बंधुवधदोषे समाने सति तेन तमंगीकृत्य युद्धे यदि प्रव
र्तेरन् तर्हि त्वमपि तथैव प्रवर्तस्व किमनेन विषादेनेत्यत आह यद्य

ध

पीति यद्यप्येते दुर्योधनादयो राज्यलोभेन नष्टविवेकाः कुलवधात्
पापं दोषं न पश्यंति ॥ ३८ ॥ कृष्णमैवेजयन्तीटी० ॥

ननु यथा तवैते बन्धवस्तथा त्वमप्येतेषां बन्धुरत्र तु न संदेहः किं

गी॰ त्वेते स्वहं त्यक्त्वा त्वां हन्तुमिच्छामि त्वं त्वति स्वेहाशाक्यतानू हंतुं
टी॰ नेच्छसीति कथमिति चेत्तत्राह, यद्यप्येतेनेति लोभोपहतचेत
प्र॰ सः राज्यादिलोभेन नष्टबुद्धयः क्रूरस्वभावा एते दुर्योधनादयः
यद्यपि कुलक्षयेन कृतं दोषं मित्रद्रोहे च पातकं च न पश्यंति, त॰
थाप्यस्माभिः कथं न ज्ञेयमित्युत्तरेणान्वयः ३८ ॥

148

कथं तर्हि यथेषां कुलक्षयेऽजन न हिंसायां वम्र **मधुसूदनी ॥** धनि स्वर्गादि॰

लोभोपहतबुद्धित्वादेतेषां कुलक्षयादिनिमित्तदोषप्रतिसंधाना
भावात् प्रवृत्तिः संभवतीत्यर्थः अत एव भीष्मादीनां शिष्टानां बंध्य
वधप्रवृत्तत्वाच्छिष्टाचारत्वेन वेदमूलत्वादितरेषामपि तत्प्रवृत्ति
रुचितेत्यपास्तम्. हेतुदर्शनाच्चेति न्यायात्. तत्र हि लोभादिहेतुद
र्शने वेदमूलत्वं न कल्प्यत इति स्थापितम्. यद्यप्येते न पश्यंति तथा
पि कथमस्माभिर्न ज्ञेयमित्युत्तरश्लोकेन संबंधः यद्यप्येते लो
भात्प्रवृत्तास्तथाप्याहितोऽनन्निवर्तेत मूलादपीडिति विहितं तत्रि
दसेन्यादिभिः ... धर्मोऽप्यर्जितं च यत्पिप्यनमिति य
मेष्पारेणनिश्चयाऽझवतां वैतेराहूतत्वाद्युद्धप्रवृत्तिरुचितैवेति शं
काह ॥ ३८ ॥

तत्कुलक्षयकृतं मुक्तो:॰ विचारात्मकया बुद्ध्यानविचारय न्ति॰

सदानंदी ॥

कथं तर्हि परेषां हि धर्मशास्त्रविदामपि कुलक्षये प्रवृत्तिस्त्वत्यत॰
आहार्जुनो वचः १ लोभाद्यावृतबुद्धित्वाद्दोषेऽपि बलवत्तरे भव
त्वेषां प्रवृत्तिस्तु नास्माकं सोचितो भवेत् २ नैव दन्मूलिका स्यात्ति
प्रवृत्तिर्लोभमूलिका शिष्टानामपि नग्राह्या भीष्मादीनां विवेकि॰
भिः ॥ ३८ ॥

नीलकंठी टी॰ ॥ उपक्रमे ॥ ३८

आनंदी टीका यद्यात्वं वितर्कयसि तथैते किं न विचारयन्ति इत्याह यदीति ३८

स्पष्टार्थं ३८ ॥

रामकंठी टीका

स्पष्टम् ३८

नन्वेते यथा वंधुवधे प्रवर्तन्ते तथा भवानपि प्रवर्ततामित्यत आह

लासिकी बलभद्री टीका ॥

कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं

एते धार्तराष्ट्रा लोभेन गर्वेणोपहतं मलिनीभूतं विवेकाभावमापन्नं चेतो येषां तादृशाः सन्तः यद्यपि न पश्यन्ति मा पश्यन्तु ॥ ३८ ॥

रत्नावीरसमिद्धोधिनी ॥

इममेवार्थं पुनर्दृढं तूपन्यासेन दृढयति स्वजनं हीति ननु यद्येवं तर्हि फलाभावेन दोषदर्शनेन च किमिति परे न विरमंतीत्याह यद्यपीति ३८ ॥

भाषा अनुवाद ॥

जो कहो कि यह वात दोनो ओर समान है परन्तु वे लोग इसको नमानिके जैसे युद्ध करने को तयार खडे है तैसे तुम भी संग्राम इनके साथ करो इस वातमें खेद करनेका क्या प्रयोजन है इसपर कहते है कि राज्यलोभसे विचार रहित दुर्योधन आदि कुलक्षय कृत दोष और मित्र द्रोहसे जो पातक अशुभरूप तिसे नही देखते और नही गिनते है ३५ ॥

दोहा

हे माधव कैसे स्वजनके मारे हम सुखी होय यद्यपि यह नहि देखते लोभ हरे चित जोय ३८ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कु
लक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

परेषामिवास्माकमपि प्रवृत्तिर्विस्रम्भः सम्भवेदिति चेन्नेत्याह कथमिति कुलक्षयेति कुलक्षये मित्रद्रोहे च दोषं प्रपश्यद्भिरस्माभिस्तद्दोषशालिनि पापं कथं न ज्ञातव्यं तदज्ञाने तत्परिहारासम्भवादतोऽस्मात् पापान्निवृत्त्यर्थं तज्ज्ञानमपेक्षितमिति पापपरिहारार्थिनामस्माकं न युक्ता युद्धे प्रवृत्तिरित्यर्थः ३९ ॥

स्वामिकृतटीका ॥

हे जनार्दन तथापि अस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिरस्मात् पापान्निवर्तितुं कथं न ज्ञेयं निवृत्तये बुद्धिः कर्तव्येत्यर्थः तमेव दोषं दर्शयति कुलक्षय इति ॥ ३९ ॥

रामानुजभाष्यं उपक्रमः ३९ ॥

अभिनवगुप्तकृतटी॰ ॥ ३९ नास्ति

परमार्थप्रपा ॥

अस्माभिः स्मरणवद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयं किं तत्पापमित्याह किंभूतैरस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिः भो जनार्दन संजिहीर्षावदेति शेषः ॥ ३९ ॥

वनमाली ॥

तथा दोषं प्रपश्यद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयं ३९ ॥

कृष्णवैजयन्तीटी॰ ॥

नन्वाहूतो न निवर्तेत द्यूतादपि रणादपीति वचनेन क्षत्रियाणां युद्धादनिवर्तनं निरूपितं परैराहूतस्त्वं कथं निवर्तसे इति चेत्तत्राह कथं ज्ञेयमिति अस्माज्ज्ञातिवधरूपात्पापान्निवर्तितुं त्वदाश्रितैरस्माभिः कथं न ज्ञेयमपि तु ज्ञेयमेवेत्यर्थः कुलक्षयकृतं दोषं प्रपश्यद्भिः ॥^ ३९ ॥

^कुलक्षयेन कृतं दोषं यज्जन्यं प्रपश्यद्भिः जनार्दन दुष्टजनानां संसारीन्मर्दयति पीडयतीति संबोधनेन भवतापि कुलनाशनं येषां सदयो निर्दिना अत्रे तेषां वधेन कर्तव्यं एवं विनाशे ननु लोचित धर्मविनाशा दस्मान्महानधर्मो भवे दतो युद्धान्निवर्तनमेवास्माकं श्रेयस्करमिति चिन्त्यम् ॥^

मधुसूदनी ॥

^अस्मात्पापाद्दृष्टवधफलकयुद्धरूपात् अयमर्थः श्रेयःसाधनताज्ञानं हि प्रवर्तकं श्रेयश्च तद्यदश्रेयोननुबन्धि अन्यथा श्येनादी

^ननु यद्यप्येते लोभात्प्रवृत्ता लुब्धा आहूतो न निवर्तेत द्यूतादपि रणादपि यस्त्वेत्यादिभिः क्षत्रियस्य युद्धं धर्मो युद्धार्जितं च धनं धर्म्यमिति धर्मशास्त्रैर्निश्चयात् इत्येतां चेत्तैराहूतत्वात् युद्धे प्रवृत्तिरुचितैवेति शङ्क्याह ॥^

गी॰
टी॰
प्र॰ २७

नामपि धर्मत्वापत्तेः तथा चोक्तं फलतोपि च यत्कर्म नानर्थेनानुबध्यते केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यत इति ततश्चाश्रेयोनुबंधितया शास्त्रप्रतिपादितेपि श्येनादाविवास्मिन्युद्धेपि नास्माकं प्रवृत्तिरुचितेति एवं च विजयादीनां श्रेयस्त्वे ज्ञाते नानाकांक्षितत्वाज्ञानतद्भयं न वर्तितव्यमिति इष्टफलयितृमनर्थानुबंधित्वेनाश्रेयस्त्वमेव प्रपंचयन्नाह ॥ ३७ ॥

सदानंदी ॥

यद्यप्येते प्रहृताः स्वर्लोभात्तदपि शास्त्रतः न प्रवृत्तिरुचिता युद्धे वा कामतः परैः १ आहूतो न निवर्तेत द्यूतादपि रणादपि क्षत्रियस्यातिधर्मोयमित्यत्राहार्जुनो वचः २ श्रेयःसाधनताज्ञानं पुरुषस्य प्रवर्तकं अश्रेयोनुबंधिस्याच्छ्रेयो नोहष्टमात्रकं ३ अन्यथा धर्मतापत्तिः श्येनादीनामपीष्यतां फलतोपि च यत्कर्म नानर्थेनानुबध्यते ४ केवलप्रीतिहेतुत्वात्तद्धर्मत्वेन कीर्त्यते यदि येनेष्टसिद्धिः स्यादनिष्टाननुबंधिना ५ तस्य धर्मत्वमिष्टं ततः श्येनादिवर्जनं यदा तु चोदनागम्यः कार्याकार्यानपेक्षया ६ धर्मः प्रीतिनिमित्तस्मात्तदा श्येनेपि धर्मता अतोश्रेयोनुबंधित्वाच्छास्त्रतोपि रणेन नः। प्रवृत्तिरुचिता बंधुवधरूपे कुलक्षये ७ ॥ ३७ ॥

नीलकंठी ॥

ननु आहूतो न निवर्तेत द्यूतादपि रणादपीति विजिगीषोः क्षत्रियस्याभिचरयुद्धादनिवृत्तिः हिंसया च वृत्तिः क्षत्रियस्येष्टा तत्कथं युद्धान्निवृत्तिः हिंसया च वृत्तिः क्षत्रियस्येष्टा तत्कथं युद्धान्निवृत्तिमिच्छामीत्याशंक्याह कथमिति साहि लोभमूलिका स्मृतिः कुलक्षयदोषविधिना बाध्यते यथा औदुंबरीं स्पृष्ट्वोद्गायेदिति स्पर्शनविधिना विरुद्धा सती औदुंबरीं सर्वां वेष्टयेत् स्मृतिर्बाध्यते लोभमूलकत्वात् तद्वत् नहि विधिमात्रायत्किंचित्कर्तव्यं श्येनादीनामपि धर्मरूपाणामप्यवश्यानुष्ठेयत्वापत्तेः तस्माद्यत्फलतोनर्थं अनिष्टं तदेव विहितं धर्मरूपमनुष्ठेयं यथोक्तं फलतोपि च यत्कर्म नानर्थेनानुबध्यते केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यत इति श्येनादिवत्पापानुबंधित्वात् युद्धं त्याज्यमेवेत्यर्थः ३७ ॥

सर्वावेष्टयितव्येति

ऊ

आनंदी टीका

एतदेवविविच्यदर्शयति ३९ ॥

रामकंठी टीका

स्पष्टम् ३९

लासिकी वल्लभी टीका ॥

अथोभिहन्तव्यैवबुद्धिःकर्तव्येत्यर्थः पर्यालोचयद्भिः दोषमेवाह हेजनार्दन अस्माभिःकुलक्षयकृतंदोषंप्रपश्यद्भिः पर्यालोचयद्भिरस्मात्पापान्निवर्तितुं कथंनज्ञेयंनिहन्तव्यैव बुद्धिःकर्तव्येत्यर्थः कुलक्षयकृतंदोषमाह ॥ ३९ ॥

रणवीरसमिद्धोधिनी ॥

यद्यप्येतेलोभोपहतयादोषावलोकनमनपेक्ष्यप्रवृत्ताःसंग्रामे तथैवास्माकमपिभवितव्यमित्याशंक्याह कथमिति अस्माद्कुलक्षयरूपात्पापाद्गुरुबन्धुवधादेःसकाशान्निवर्तितुमस्माभिःकथंनज्ञेयमपितुज्ञातुंयोग्यमेव यतः कुलक्षयकृतंदोषंप्रकर्षेणपापावसानिकफलविचारणारूपेणप्रपश्यद्भिः नत्वेतेइव लोभोपहतयातदुपेक्षांकुर्वद्भिरिति ३९॥

152

भाषा अनुवाद ॥

तौ भी हे जनार्दन हम लोग कुलक्षयकृत दोष जानिके भी इ
स महापापसे कौंन शान्त होय अर्थात् हमको जानि बूझिके
इस युद्धसे निवृत्त होनाही उचितहै ॥ ३९ ॥

दोहा

कुलक्षय करेजो दोसहै सिरद्रोह किये पाप केसें छूटन
नजान हम याहि पापतें आप ३९ ॥

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ध
र्मे नष्टे कुलं कृत्स्न मधर्मोऽभिभवत्युत ध० ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

कोऽसौ कुलक्षये दोषो यद्दर्शनादस्माकं युद्धादुपरतिरपेक्ष्यते ८५
तत्राह कुलेति कुलस्य हि क्षये कुलसम्बन्धिनश्चिरन्तना धर्मा
स्तत्तदग्निहोत्रादि क्रिया साध्या नाशमुपयान्ति कर्तुरभावादित्य
र्थः धर्मनाशेऽपि किं स्यादितिचेत् तत्राह धर्मइति कुलप्रयुक्ते ध
र्मे कुलनाशादेव नष्टे कुलक्षयकरस्य कुलपरिशिष्टमखिल
मपि तदीयोऽधर्मोऽभिभवत्यधर्मभूयिष्ठं तस्य कुलं भवतीत्यर्थः
ध० ॥

स्वामिकृतटीका ॥

कुलक्षयइति कुलक्षयस्य पारंपर्येण नरकप्राप्तिकारणत्वं दर्श
यति कुलक्षये गोत्रस्य सुदाणां विनाशे सनातनाः पारंपर्यागताः चिरन्तनाः
कुलधर्माः प्रणश्यन्ति धर्मे नष्टे कृत्स्नमपि कुलं नष्टं अधर्मोऽभिभ
वति तिरस्करोति उतापि अधर्मोऽभिभवति उद्भवति तन्निवारक
धर्मस्याभावादित्यर्थः ध० ॥

रामानुजभाष्यम् उपक्रमेऽस्ये० ॥

अभिनवगुप्तकृतटीका ॥ श्लोकः ॥ ध० ॥ नास्ति

परमार्थप्रपा टी० ॥

अथ कुलक्षये प्रणश्यन्तीत्यादि वाक्यैर्यावदध्यायान्तेपापपर्यवसि
अ नमर्थं कृतवान् ॥ ध० ॥

वनमाली टी ॥

तमेव दोषं दर्शयति कुलेति परंपराप्राप्ताः प्रवर्तकाभावान्नष्टे
वशिष्टं कृत्स्नमपि कुलमधर्मोव्याप्नोति ध० ॥

कुलमणिजयन्ती टी० ॥

ननु कोऽसौ दोषो यतो युद्धात्त्वं विरमसीत्यपेक्षायां तमेव दोषमाह
कुलक्षयइति कुलक्षये सति सनातनाः परम्पराप्राप्ताः कुलधर्माः
कुलोचितधर्माः प्रणश्यन्ति नाशं प्राप्नुवन्ति कर्तृणामभावाद्धर्मेण

गी॰ टी॰ प्र॰

मप्रभावइत्यर्थः धर्मे नष्टे सति जातित्वेनैकवचनं कृत्स्नं समग्रं
कुलमुत नाप्यधर्मोऽभिभवति स्वाधीनं करोति समस्तकुलमभिव्या
प्य कुलीनैः प्राणिभिः स्वानुकूलं कर्म कारयतीत्यर्थः ४० ॥

मधुसूदनी ॥ एवं च विजयादीनामश्रेयस्त्वेनानाकांक्षितत्वात्

तदर्थं प्रवर्तितव्यमिति इष्ट यितमनर्थानुबंधित्वेना श्रेयस्त्वमेव प्रपंचयन्नाह

सनातनाः परंपराप्राप्ताः कुलधर्माः कुलोचिता धर्माः कुलक्षये प्र
णश्यंति कर्तुरभावात् उतापि अग्निहोत्राद्यनुष्ठातृपुरुषनाशे
न धर्मे नष्टे जात्यभिप्रायमेकवचनम् अवशिष्टं बालादिरूपं कृ
त्स्नमपि कुलमधर्मोऽभिभवति स्वाधीनतया व्याप्नोति उतशब्दः कृत्स्न
पदेन संबध्यते ४० ॥

सदानंदी ॥

महापापादिहेतुत्वात् कुलपित्रादिहिंसनात् सिद्धेऽप्युपविंसायाः प्रा
हवाक्यानि शास्त्रवित् १ धर्माः परंपराप्राप्ताः प्रणश्यंति कुलोचि
ताः कुलक्षये यतः कर्तुरभावोऽदृष्टपतेति मो २ धर्मे क्षये कुलं
सर्वमाबालमपि सर्वथा अधर्मः स्ववशे कृत्वा व्याप्नोति अभिप्रायस्ततः ३

नीलकंठी ॥

प्रणश्यंति अनुष्ठातृणां वृद्धानामभावात् अवशिष्टं बालादिरूपं
कृत्स्नं धर्मलोपादधर्मोऽभिभवति ४० ॥

आनंदी टीका एतदेव विविच्य दर्शयति

कुलक्षयेऽनुष्ठातॄणामभावात्कुलधर्मा अदृष्टफलानि
त्यनैमित्तिकाग्न्यादयः दृष्टफलाश्च स्त्रीरक्षादयः प्रणश्यन्ति
४० ॥

रामकंठी टीका

स्पष्टम् ४०

लाक्षिकी ~~[illegible]~~ टीका ॥

गोत्रक्षयविनाशे सति सनातनाः पारम्पर्यागमाम्नायरक्तनः
~~धर्मे नष्टे सति ... बालादिरूपम् तिरस्करोति ४० ॥~~
कुलधर्माः प्रणश्यंति धर्मे च नष्टे अवशिष्टबालादिरूपं कृ
त्स्नमपि कुलमधर्मोऽभिभवति तिरस्करोति ४० ॥

रत्नवीरसमिद्बोधिनी ॥

कुलक्षये दोषस्वरूपमाह कुलक्षये इत्यादि कुलसंबंधिनो ध
र्माः प्रणश्यंति कर्तॄणामभावादिति भावः धर्मनाशादेकुल
दोजरमनर्थरूपं कार्यं दर्शयति धर्मे नष्टे इत्यादि कृत्स्नं कुल
नाशादवशिष्टं ४० ॥

155

भाषा अनुवाद

सोइ जलक्षय कृत दोष कहतेहैं कि जलक्षय करनेसे सनातन जो जलधर्म सो नष्ट होताहै और धर्महानिहोनेसे वाकी जो जल उसे अधर्म अमिलताहै ४· ॥

दोहा ॥

जलक्षयकरेजोदोषकोदेखनहियउनाथ जलक्षयभय
तेनासहैं जलके धर्म सनाथ ४·॥

156

अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्री
षु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ४१ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

कुलक्षयकृतेऽवशिष्टकुलस्याधर्मप्रवणत्वे को दोषः स्यादि
ति तत्राह अधर्मेति पापप्रचुरे कुले प्रसूतानां स्त्रीणां प्रदुष्ट
त्वे किं प्रदुष्यति तत्राह स्त्रीष्विति ४१ ॥

स्वामिकृतटीका ॥

अधर्मेति हे कृष्ण गोपिकामनःकर्षणशील अधर्माभिभवा
त्कुलस्त्रियो विशुद्धवंशोद्भवाः प्रदुष्यंति स्वैरिण्यो भवंति ता
सु स्त्रीषु दुष्टासु हे वार्ष्णेय वृष्णिवंशोद्भव वर्णसंकरो जायते
वर्णस्य वर्णांतरमिश्रीकरणं वर्णसंकरः ४१ ॥

रामानुजभाष्यम् उपक्रमे ॥ ४१ ॥

अभिनवगुप्तकृतटीका ॥ ४१ ॥ नास्ति

परमार्थप्रपा ॥

सनातनाः परंपराप्राप्ताः वर्णसंकरः सर्ववर्णानामेकीभावः ४१

वनमालीटी० ॥ पूर्वश्लोकान्तरे ४१ ॥

कुसुमवैजयन्ती टीका ॥

अधर्माभिभवादिति यस्मादधर्मेणाभिभूते कुले तस्माद्धेतोः कु
लस्त्रियः कुलोचितधर्मवत्यः स्त्रियः प्रदुष्यन्ति निजकान्ताभा
वे मनोभवाकुलितचित्ताः परपतिषु रतिं कृत्वा भ्रष्टा भवंतीत्य
र्थः नन्वधर्मेणैव यत्कृतं पापं पुण्यं वा विजितात्मना भोक्तव्यं पुरु
षेणैव तेन तत्तत्फलं महदित्यादिवाक्यैर्निजकर्मफलानां स्वेनै
व भोक्तव्यत्वात्स्त्रीणां कर्म स्त्रीभिरेव भोक्तव्यमेतेन तव किमिति
चेत्तत्राह स्त्रीष्विति दुष्टासु भ्रष्टासु स्त्रीषु वर्णसंकरो ब्राह्मणादि
वर्णविवर्हितो जायते उत्पद्यते वार्ष्णेय प्रतिशुद्धवर्णाश्रमोचित
धर्मानुष्ठानतत्पर वृष्णिवंशोद्भवात्मममातुलाद्वसुदेवात्त्वम
पि जानासि अतस्त्वत्प्रत्यक्षमेव यानामस्माकं कुले संकरो माभूत्त्वां
प्रार्थयामीति संबोधनाभिप्रायः ४१ ॥

मधुसूदनी ॥

अस्मदीयैः पतिभिर्धर्ममतिक्रम्य कुलक्षयकृतस्त्वदस्माभिरपि

व्यभिचारे कृते को दोषः स्यादित्येवं जनैर्कृताः कुलस्त्रियः प्रदु
ष्येयुरित्यर्थः अथवा कुलक्षयकारिपतितपतिसंबंधाद्देवस्त्रीणां
दुष्टत्वं आशुद्धेः संपतितो हि महापातकदूषितः स्यादिति स्मृतेः ॥ ४१

सदानंदी ॥

अस्मदीयैः पतिभिरतिक्रम्य स्वधर्मतः कुलक्षयः कृतो यर्हि त
र्हि स्माभिरिहाधुना १ व्यभिचारे कृते कः स्याद्दोष इत्यजनार्दनतः
कुलस्त्रियः प्रदुष्येयुरधर्माधिक्यहेतुना २ नारीदुष्टात्वनीचाभि
गमनात्संकरो भवेत् इति वर्णविकीर्णत्वाद्दुष्टासामानूत्योवदोष
तः ३ । ४१ ॥

नीलकंठी ॥

दुष्टासु प्रकर्षेण वर्णेतरमुपासीनासु ॥ ४१ ॥

आनंदी टीका

कुलस्त्रियः प्रदुष्यन्ति चारित्रहीना व्यभिचरन्तीत्यर्थः ४१

रामकंठी टीका ॥

स्पष्टार्थम् ४१

अधर्माभिभवात्कुलस्त्रियो विष्ण
ड्वर्णोद्भवाः प्रदुष्ट

नीलकंठी टीका

दुष्टासु

ष्ट्रि हे कृष्ण स्वैरिण्यो भवन्ति हे वृष्णिवंशोद्भव॥ स्त्रीषु सतीषु वर्णानां
यते संकरो जायते वर्णस्य वर्णान्तरेण मिश्रीभावः संकरः ४१

श्रावीरसमिद्धोधिनी॥

प्रदुष्यंति शीलभ्रष्टा भवंति वर्णांतरैः सह व्यभिचारात् वर्णा
नां संकरो मिश्रत्वं ४१॥

रामचंद्रसरस्वतीकृतटीका ॥
प्रडुष्यंतिजलस्त्रियइतिताह्नितदाएवंविचारयेयुर्यदस्मदीयैः
पतिभिःजलक्षयःकृतस्तेदस्माभिर्व्यभिचारेकृतेकोदोषःस्यादि
तितथाचनाःप्रडुष्यंतीतिभावः [illegible] यद्वाकुलक्षयकारिपतित
पतिसंबंधादेवडुष्टत्वं [illegible]स्त्रीशुद्रैःसंप्रतीद्योदिमहापातकदूषतइति
स्मृतेःस्पष्टमन्यत् ४१

159

भाषा अनुवाद ॥

अधर्मके जोरसे कुल कामिनी सब भ्रष्ट आचारनी होतीहैं और स्त्रियोंके दुष्ट आचरनसे वरन संकर पैदा होतेहैं ॥ ४१ ॥

दोहा

धर्मनाशकेहोतहि कुलसमनाशहिंहोय होयअधर्मकी
वृद्धि पुनयह निश्चयकरसोय ४१ कुलअधर्मभयजाव
नीकुलकीनारीहोय कुलिजसुनोऊनारीते वर्णसंकरहो
सोय ४२॥

160

संकरो नरकायैव कुलघ्नानां कुलस्य च पतं-
ति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ४२ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

वर्णसंकरस्य दोषपर्यवसायितामादर्शयति संकर इति कुल
क्षयकराणां दोषान्तरं संचिनोति पतन्तीति कुलक्षयकर्तारः पि
तरो निरयगामिनः सम्भवन्तीत्यत्र हेतुमाह लुप्तेति पुत्रादीनां
कर्तॄणामभावात् लुप्ता पिण्डस्योदकस्य च क्रिया येषां ते तथा
ततश्च प्रेतत्वपराहृतिकारणाभावात् नरकपतनमेवावश्यक
मापन्नमित्यर्थः ॥ ४२

स्वामिकृतटीका ॥

संकर इति संकरो जातिसंकरः कुलघ्नानां चापरे कुलघ्नकुलस्य च
नरकायैव भवति यस्माद्दोषं कुलघ्नानां कुलहंतॄणां न केवलमेव
कुलं नरकाय भवति किंवा पतंत्येषां कुलघ्नानां स्वर्गाहृत्या पितरः लु
प्तपिंडोदकक्रियाः संतो नरके पतंति पिंडादिदातॄणां विशुद्धापत्या
नामभावात् लुप्तपिंडोदकक्रियाः संतः पतंतीत्यर्थः ४२ ॥

रामानुजभाष्यम् ॥ उपक्रमः ४२ ॥

अभिनवगुप्तकृतटीका ॥ पूर्वं ॥ ४२ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

लुप्ता लोपं प्राप्ताः पिंडक्रियाः श्राद्धाद्याः उदकक्रियास्तर्पणाद्याः ४२

वनमाली टी॰ ॥ उपक्रमः ४२ ॥

कुलमवैजयन्ती टी॰ ॥

यस्मादेवं त्वं विभेषि संकरो वीरशिरोमणे त्वां मंगलं किं करिष्य
तीत्याशंक्याह संकर इति संकरो जन्ममात्रेणैव कुलघ्नेतीति कुल
घ्नास्तेषां दुष्टानामथ च कुलस्य तेषां च कुलस्यानेकपुण्यपुंजाः
र्जितममरलोकं गतस्य पितृपितामहादेर्नरकायैव भवति न तत्र
लोकान्तरप्राप्तये हि यस्मात्कुलघ्नानामेषां पितरो लुप्तपिंडोदक
क्रियाः लुप्ताः पिंडोदकक्रिया येषां ते तथा संतो नरकादिषु पतंति
तस्माद्धेतोर्वर्णसंकरादहं बिभेमीत्यर्थः ॥ ४२ ॥

मधुसूदनी ॥

कुलस्यसंकरश्चकुलघ्नानांनरकायैवभवतीत्यन्वयः नकेवलंकु
लघ्नानामेवनरकपातः किंतुतत्पितॄणामपीत्याह पततीति हिशब्दो
ऽप्यर्थे हेतौवा पुत्रादीनांकर्तॄणामभावात् लुप्तपिंडस्योदकस्यच
क्रियायेषांतेतथाकुलघ्नानांपितरःपतंतिनरकायैवेत्यनुषंगः ४२

सदानंदी ॥

कुलस्यसंकरोयस्मात्कुलघ्नानामवीविदः नकेवलंकुलघ्नानांपि
तॄणामपिनस्तथा १ पुत्रादीनांहिकर्तॄणामभावादेवसर्वथा लु
प्तायेषांक्रियाःसर्वाःपिंडस्याप्युदकस्यच २ कुलघ्नानांपतंत्येवपि
तरोनरकेचिरं ३॥ ४२ ॥

नीलकंठी ॥

कथंतर्हिजामदग्न्येनरामेणक्षत्रियेषुहतेषुतत्स्त्रियःपुनःपुनर्ब्रा
ह्मणेभ्यःपुत्रानुत्जनयामासुरितिउपाख्यायतेकथंवाधृतराष्ट्रादीनां
असंकरजत्वमित्याशंक्याह पततीति हिशब्दोवैदिकींप्रसिद्धिंद्योत
यति साहिनशेषोऽस्त्यन्यजातमस्तीतिश्रुतिः अन्यस्माज्जातंशेषो
पत्यंनास्तीतितदर्थः अन्योदर्योमनसापिनमंतव्योममायंपुत्रइति
यास्कवचनाच्च येयजामहइतिशास्त्रात् येवयंस्मस्तेवयंयजामह
इत्यर्थकाहश्रूयमानस्यपित्रादेःसंशयग्रस्तत्वादयंममपितैवेतिनि
श्चयस्यदुःसाध्यत्वात् मंत्रस्त्वयोहमस्मिसमन्यजे ब्राह्मणेर्थवादश्च
नचैतद्विद्मोब्राह्मणाःस्मोवयमब्राह्मणावेति तस्माद्बीजपतेरेवपिं
डादिप्राप्तिर्नतुक्षेत्रपतेरितिलुप्तपिंडोदकक्रियत्वादवश्यंपितॄणां
पातोभवति क्षेत्रजपुत्रस्मृतिस्तुइहलोकेवंशस्थापनमात्रपरान
तुतेनक्षेत्रपतेःकश्चिदामुष्मिकउपकारोस्ति उदाहृतश्रुतिवि
रोधात् अयंचसंकरोस्माभिःस्वयंकृतस्तेदवश्यमस्मान्बाधिष्यतए
वेतिभावः ४२ ॥

श्रानंदी टीका

वर्णसंकरः कुलस्य स्त्रीणस्य नरकायैव सन्ततेरशुद्धत्वात् कुलघ्नानां च नरकाय वर्णसंकरोत्पत्तेर्निमित्तत्वात् हि यस्मादुभयेषां पितरः श्राद्धायाः सन्ततेरभावात् लुप्तपिण्डोदकाः पतन्ति ४२ ॥

रामकंठी टीका

स्पष्टम् ४२

लासिकी [illegible] टीका

जातिसंकरेण न केवलं कुलघ्नानां कुलहन्तॄणामेव नरकाय भवति किं तु कुलस्य च स्त्रीतस्य पितृवर्गस्य च नरकाय भवति स्वस्थानात्स्वर्गादेर्विभ्रष्टपनरके कुलहन्तॄणाम् श्रद्धादिक्रियाकर्माभावाल्लुप्ताः पिण्डक्रियोदकक्रियाश्च येषां ४२ तादृशाः सन्तः पतन्ति न परं कुलघ्नानां तत्पितॄणां च संकरः दोषेण नरकावाप्तिः यावत्पश्चादवशिष्टस्यापत्यरूपस्य बालकसमूहस्यापि तत्प्राप्तिर्भवतीत्याहुद्वाभ्याम् ४२ ॥

स्वस्थानात्स्वर्गादेर्विभ्रष्टप नरके

यतएषां पितरः

रत्नावीरसमिद्धोपिनी॥

कथं नरकप्राप्तिः संकरादित्याह पतन्तीति हि यस्मात् लुप्ता पिंडस्योदकतर्पणस्य च क्रिया येषामिति हेतोरेषां कुलघ्ना। नां पितरो नरके पतंति ४२॥

162

भाषा अनुवाद

तो फिरि वरनसंकर कुलघातियों के कुलको नरकका हेतु होतेहै और उससे कुल नाशकों के पितर पिण्डपानीसे रहित हो नरकमें पड़तेहैं ॥ ४२ ॥

दोहा ॥

कुलघातिकेकुलल्लियें संकरनरक प्रदाय पतितहोत इनकेपितर पिंडोदक कियाजाय ४२ ॥

163

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्सा
द्यन्ते जातिधर्म्माः कुलधर्माश्च शाश्वताः ४२ ॥

भाष्यं नास्ति आनन्दगिरिकृतटीका ॥

कुलक्षयकृतामेतेषु दोषेषु तैर्दोषैः वर्णसंकरहेतुभिर्जातिप्रयुक्ता
श्च धर्म्माः सर्वे समुत्साद्यन्ते तेन कुलक्षयकारणयुद्धादुपरतिरेव श्रेयसीत्याह दोषैरिति ४२ ॥

स्वामिकृतटीका ॥

उक्तदोषमुपसंहरति दोषैरितिद्वाभ्यां एतैर्नामधर्माभिभवादि
लक्षणैर्वर्णसंकरकारकैर्दोषैः कुलघ्नानां जातिधर्म्माः क्षत्रियजा
तिप्रयुक्तधर्माः तथा शाश्वताः कुलधर्माः पारंपर्यागतावंशधर्मा
श्च उत्साद्यन्ते लुप्यन्ते तेषामाचरणं न भवतीत्यर्थः चकारादाश्रम
धर्मादयोपि दृष्टव्यन्ते ४२ ॥

रामानुजभाष्यम् उपक्रमे ॥ ४२

अभिनवगुप्तकृतटीका ॥ ४२ नास्ति

परमार्थप्रपाटी॰ उपक्रमे ४२ ॥

वनमालीटी॰ ॥ ४२ ॥ नास्ति

कुसुमवैजयन्तीटीका ॥

एवमुक्तदोषमुपसंहरति दोषैरितिद्वाभ्यां दोषैरिति वर्णसंकरका
रकैर्वर्णानां ब्राह्मणादीनां संकरं संमेलनं कुर्वन्तीति तथा तैरेतैर्दो
षैः कुलघ्नानां पुरुषाणां जातिधर्माः क्षत्रियत्वादिनिबन्धनाः शा
श्वताः परंपराप्राप्ताः कुलधर्म्माश्चासाधारणाश्च उत्साद्यन्ते उत्सन्नाः
क्रियन्ते नाश्यन्त इत्यर्थः ॥ ४२ ॥

मधुसूदनीटी॰ ॥

जातिधर्माः क्षत्रियत्वादिनिबंधनाः कुलधर्माश्च साधारणाश्च एतै
र्दोषैरुत्साद्यंते उत्सन्नाः क्रियंते विनाश्यंत इत्यर्थः ४२ ॥

सदानंदी ॥

येत्वसाधारणा धर्माः स्वकुलस्य चिरंतनाः उत्साद्यंते जातिधर्माः क्ष
त्रियत्वादिहेतुकाः १ ॥ ४२ ॥

एतदेवविवृणोतिद्वाभ्यां दोषैरिति ४३ ॥

श्रानंदी टीका

एतैः कुलधर्मनाशाद्धर्माभिभवस्त्रीव्यभिचारैर्वर्णसंकरका
रकैर्दोषैर्जातिधर्माः क्षत्रियत्वादिजात्याश्रितास्तधर्मानित्यनै
मित्तिकाउत्साद्यन्ते श्रोतस्मप्रकारेणपालितेपनतत्रानधिका
राद्विलीयंते चपुनः कुलस्यपुत्रपौत्रादिसंततेर्धर्माः शाश्वता ते
प्रनवछिन्नाः श्राद्धदानादिधर्मौत्पत्रालोकाननत्पशाम्पाद
यउत्साद्यन्ते ४२ ॥

रामकंठी टीका

स्पष्टम् ४२

लासिकी [illegible] टीका

[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ४२ ॥

एतैःकुलनाशसत्यधर्माभिभवादिलक्षणैर्वर्णसंकरकारकैः
कुलघ्नानांदोषैः क्षत्रियत्वादिजातिप्रयुक्ताः धर्मास्तथाशा
श्वताः पारंपर्यागताः कुलधर्माश्चोत्साद्यन्ते विनाश्यन्ते ते
षामाचरणंनभवतीत्यर्थः चकारादाश्रमादयोपिगृह्यन्ते ४२ ॥

रणवीरसमिद्धोधिनी ॥

इतिनष्टस्यकुलस्यनिरयगतिमुक्त्वाकुलघ्नानामपितामाह
दोषैरिति स्पष्टं ४२ ॥

165

भाषा अनुवाद ॥

कुलघातियोंके वरन संकर करने वाले इन दोषों से सनातनी जातिधर्म और कुलधर्म आश्रमधर्म सब उच्छिन्न होजाती है इससे कुलनाशकारी युद्धसे निवृत्त होनाही परम कल्यानहै ॥ ४२ ॥

दोहा

वर्णसंकर कृत दोषसें कुलघातिन के पर। जातिधर्म कु
लधर्म नित नाशत नाहिं संदेह ॥ ४२ ॥

166

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरः
केनियतंवासो भवतीत्यनुशुश्रुम ४४ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

किंच जातिधर्मेषु कुलधर्मेषु च उत्सन्नेषु तत्तद्धर्मवर्जितानां मनुष्याणामनधिकृतानां नरकपतनध्रौव्यादनर्थकरमिदमेव हेयमित्याह उत्सन्नेति यथोक्तानां मनुष्याणां नरकपातस्यावश्यकत्वे प्रमाणमाह इत्यनुशुश्रुमेति ४४ ॥

स्वामिकृतटीका ॥

उत्सन्नेति हे जनार्दन उत्सन्नकुलधर्माणां विनष्टकुलवर्णाश्रमादिधर्माणां नरके नियतं नियमेन वासो भवतीति वयमनुशुश्रुम अनुवारंवारं व्यासादिभ्यः श्रुतवंतो वयं प्रायश्चित्तमकुर्वाणाः पापेषु निरताः नराः अपश्चात्तापिनः कष्टान्निरयान्यान्ति दारुणान् इत्यादिवचनेभ्यः ४४ ॥

रामानुजभाष्यम् ॥ ४४ ॥ उपक्रमम्

अभिनवगुप्तकृतटी० ॥ ४४ ॥ नास्ति

परमार्थप्रपाटी० ॥

उत्साद्यंते लुप्यंते अनुशुश्रुम श्रुतवंतः ॥ ४४ ॥

वनमालीटी० ॥ ४४ ॥ नास्ति

कुलमवैजयन्ती ॥

जात्यादिधर्मे नष्टे सति किं स्यादित्यपेक्षायामाह उत्सन्नेति उत्सन्नकुलधर्माणां उत्सन्ना नाशं गताः कुलधर्मा असाधारणधर्मा येषां ते तथा तेषां मनुष्याणां वासो नियतं निश्चितं नरके भवतीति व्यासधौम्यादीनां मान्यानां मुखादनुशुश्रुम श्रुतवंतः ४४ ॥

मधुसूदनी ॥ तुरं

ततश्च पितृत्वपराहतिकारणभावान्नरक एव नियतं वासो भवतीति ध्रुवमिति अनुशुश्रुमेति आचार्याणां मुखाद्वयं श्रुतवंतः न स्वाभ्यूहेन कल्पयाम इति पूर्वोक्तस्यैव दृढीकरणं ४४ ॥

सदानंदी टी० ॥

ततःश्वेतत्वमुक्तमर्थकारणभावतश्चिरं नरके चैव वासः स्याद्ध्रु
वंनातःसुनिष्कृतिः १ आचार्याणांगुरूणांदित्यक्तवंतोवयंपुरा
जनानांदेवशत्रूणांप्राणादीनांवियोगतः २ यातनागमधित्व
त्वायतस्त्वंश्रीजनार्दनः अतोमांप्रेरयस्येवंकिंत्वांशरणमागतं
तु ॥ ४४

नीलकंठी टी. ॥ उपक्रमे ॥ ४४ ॥

आनंदी टीका

एतदेवदृढयति वर्णसंकरदोषान्नरके नियतं निश्चयेन प्रेत
त्वनिहन्तिकारणाभावान्निरंतरं वासो भवतीत्यनुशुश्रुम वं॰
यमनुश्रुतवाहेशादिदं श्रुतवंतः नतु स्वयमुत्प्रेक्षामः तथा
चश्रुतिः प्रथमतानादिरन्ततंतमेतमावः हेतेपरवीजाय
वापः जनयितव्योभवतिसाम्परायेमोचवेनाऊकनेतंत
मेतमिति स्मृतयश्चाच लोकान्तंते दिवः प्राप्तिप्रत्यपोत्यप्र
तैकैः यस्मात्तस्मात्प्रियासेवाकर्तव्याश्वरहिताः यस्मा
देवंप्रकारिहेतवःस्त्रियोतःसेव्याः रतुकालेभिगंतव्याः च
प्रनकेभिचारपरिहारायरक्षिताःकर्तव्याःअभिचारोत्पत्रैः
प्रत्यपोत्रैर्नैतत्फलमित्यर्थः ४४ ॥

रामकंठी टी॰

स्पष्टम् ४४

गांभा ~~दत्तकुमी टीका~~ लासिकीटीका

धर्मानभिज्ञानेन नरा वर्णात् विनष्टकुलवर्णाश्रमादिध
र्माणां नित्यनियमेनावस्थितिः अनुवारंवारं व्यासादिभ्यः श्रुतवं
तो वयम् न तु स्वबुद्ध्या कल्पयामः परितापातिशयसूच
नायात्मगतमेवार्जुनो वचनमाह ४४ ॥

(margin: हे जनार्दन; नरके; मनुष्याणां; भवतीति वयमनुशुश्रुम)

रसवीरसमिद्धोधिनी॥

ततश्च किमित्याह उत्सन्नेति इत्यनुशुश्रुम व्यासादिभ्यः स
काशादनुक्रमादागतमित्यं श्रुतवंत इत्युत्सन्नजातिकुलध॰
र्माणामयोगतो प्रमाणं दर्शितं ४५ ॥

168

रामचंद्रसरस्वतीकृतटीका ॥

यद्वाकुलक्षयकारिपतितपतिसंबंधादेवकष्टत्वं आत्मशुद्धेः
संप्रतीक्ष्योहिमहापातकदूषितइतिस्मृतेः स्पष्टम न्यत् इदानी
मतिविषादाद्भगवतासहसंवादेपरित्यज्य स्वयमे वस्वीयया
पितामनुशोचति ॥ ४४ ॥

भाषा अनुवाद ॥

और हे जनार्दन जिन मनुष्यों के कुलधर्म और जातिधर्म उच्छि न होगये उनको निरन्तर घोर नरकमें वास होतीहै यह मैंने पुराण इतिहास और धर्मशास्त्रमे सुनाहै ॥ ४४

दोहा

नाशकरें कुलधर्मकों जे मनुष्य यदुनाथ होतवासनिश्चय नरक तिनको सुनियहगाथ ४४ ॥

अहो बत महत्पापं कर्तुं व्यवसिता वयं यद्राज्य सुखलोभेन हंतुं स्वजनमुद्यताः ४५ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

राज्यप्राप्तिप्रयुक्तसुखोपभोगलुब्धतया स्वजनहिंसायां प्रवृत्तिरस्माकं गुणदोषविभागविज्ञानवतामतिकष्टेति परिभ्रष्टहृदयः सन्नाह अहो बतेति ४५ ॥

स्वामिकृतटीका ॥

बंधुवधव्यवसायेन संतप्यमान आह अहो बतेति अहो बत कष्टं यत्परमेश्वरसन्निधानेपि वयं महत्पापं यद्राज्यसुखलोभेन स्वजनं हंतुमुद्यता इति उत अतिशयेन यतनाय तन्वंतो जाताः ४५

कर्तुं व्यवसिता व्यवसायं निश्चयं गताः किं तन्महत्पापं

रामानुजभाष्यम् ॥ ४५ उपक्रमम्

अभिनवगुप्तकृतटीका ॥

वयमिति कौरवपांडवभेदभिन्नाः सर्व एवेत्यर्थः एवं सर्वेष्व विवेकिषु मम विवेकिनः किमुचितं उचितं तावद्युद्धान्निवर्तनं एतन्नूचिततरमित्याह ॥ ४५ ॥

तू

परमार्थप्रपा टी० ॥

अहो बतेति बंधुवधसंतापकथनं ॥ ४५ ॥

वनमाली टी० ॥ ४५ ॥ नास्ति

उत्तमवैजयन्ती टी० ॥

एवं दोषं दर्शयित्वेदानीं राज्यलोभेनास्माकं स्वजनवधस्य निश्चयोप्यतितुच्छो युद्धकरणस्य तत्कावर्तीति वक्तुमतिसंतप्यमान मात्मानं शोचन्नाह अहो बतेति यद्यस्मात्स्वल्पराज्यसुखलोभेन स्वजनं हंतुमुद्यताः शास्त्राविसज्ज मानाः स्थिताः स्मः अतो वयं महत्पापं कर्तुं व्यवसिता निश्चयं कृतवंतोऽहो बतास्मान् धिग्धिगस्त्वित्यर्थः ४५ ॥

मधुसूदनी ॥

यदीदृशी ते बुद्धिः कुतस्तर्हि युद्धाभिनिवेशेनागतोसीति न वक्तव्यं विमृश्यकारितया मयोद्यतस्य कृतत्वादिति भावः ४५ ॥

बंधुवधपर्यवसाययुद्धाध्यवसायोपि सर्वथा पापिष्ठतरः किं पुनर्युद्धमिति वक्तुं तदध्यवसायेन आत्मानं शोचयन्नाह

गी॰
टी॰
प्र॰

171

सदानंदी ॥

स्वकुलक्षयकारित्वात्पापिष्ठोयुद्धनिश्चयः किंयुद्धस्यपुनर्वा
चंडत्वमितिभावनात् ॥१ शोकमोहैकपाथोधौनिमग्नःप्राहदुः
खितः ॥ अहोवतेतियत्नोपिपापबुद्धिमतोवचः ॥२॥ ४५ ॥

नीलकंठी टी॰ ॥ स्पष्टं ॥ ४५ ॥

आनंदी टीका

अहोविस्मये बतविषादे वयमिति सर्वथार्तराष्ट्रमज्ञानरस्य ४५ ॥

रामकंठी टी.

स्पष्टम् ४५

लासिकी वल्लभी टीका

परितापातिशयमद्धनाय ... प्रकारहति ४५ अहोवतकष्टं वयं कौरवपांडवभेदभिन्नाः स
र्वएवमहत्पापं कर्तुं व्यवसिता निश्चयवन्तः इत्याह वंतोवास्मः
किं तन्महत्पापम् यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताय
त्ववंतोजाताः नन्वेते सर्वे वध्यवधार्हमिनो युद्धं करिष्यन्त्येव
किं तव हत्याविवेकितयेत्यर्थः ... ४५ ॥

रमावीरसमिद्बोधिनी

मोहेनान्याविष्टः पुनराह अहोवतेति स्वजनवधरूपमेव पा
पमितिभावः ॥ ४५ ॥

172

४ इदानीमतिविषादाद्भगवता सह संवादं परित्यज्य स्वयमेव स्वीयपापितामनु
प्रशोचति

रामचंद्रसरस्वतीकृतटीका ॥

४ अहो बतेति यद्यपि यदीदृशी ते बुद्धिः जातस्तर्हि युद्धाभिनिवेशो
नागतोसीति आशंक्य विमृश्यकारितामपाकृत्यानुशोचति
अहो बतेति स्पष्टः अथ दृश्यमानं मे किं विधेयमित्यत आह ॥ ४५

गी

173

भाषा अनुवाद

देखो गुण दोषके विशेष ज्ञानवान होके भी जो हम राज्य सुखके लोभसे स्वजन बंधु लोगोंको संग्राममें मारनेको तयार होगये कि ऐसे महापाप कर्म करनेका उद्योग किया हाय यह बडा कष्ट और विषाद भया बंधु वधसे महापाप । छोड और क्या हाथ लगना है ४५ ॥

दोहा ॥

अहोअचर्यमहापापको करयोहमउद्योग बंधुहननउद्य
तभए लोभराज्यसुखभोग ४५ ॥

यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ४६ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

तर्हियुद्धे विमुखः सन् परपरिभवप्रतीकाररहितोवर्तेथा स्तर्हि त्वां शस्त्रपरिग्रहरहितं शस्त्रं शस्त्रपाणयो धार्तराष्ट्रा निहनिष्यन्तीत्याशङ्क्याह यदीति प्राणत्राणादपिप्रकृष्टोधर्मःप्राणभृतामहिंसेतिभावः ४६ ॥

स्वामिकृतटीका ॥

एवंसंततमःसन्नुदत्तमेवाशासानोर्जुनआह यदिशस्त्रपाणयः धार्तराष्ट्राअकृतप्रतीकारंप्रतियुद्धमकुर्वाणंमामशस्त्रंतूष्णीमुपविष्टंरणेसंग्रामेहन्युर्हन्युस्तर्हितद्धननंममक्षेमतरंपापस्यानुत्पत्तिहेतोरत्यन्तहितंभवेत् पापानिष्पत्तेः ४६ ॥

रामानुजभाष्यम् ॥ उपक्रमः ॥ ४६ ॥

अभिनवगुप्तकृतटीका ॥ ४६ नास्ति यदिमामिति

परमार्थप्रपा टी॰ ॥

अथरणेयोगेत्यक्त्वातूष्णींस्थितंमांतेशस्त्रपाणयोहन्युस्तन्मे क्षेमकरंपापजनकंनभवतीत्यर्थः ततःकिंहन्तव्यमाह ४६

वनमाली टी॰ ॥ ४६ ॥ नास्ति

उपनिवैजयन्तीटी॰ ॥

ननुचेद्धर्मभयेन यूयमेतान्नहनिष्यथ तर्हितेराज्यलोभेनयु ष्मान्हनिष्यन्त्येवेतिचेत्तत्राह यदीति अप्रतीकारंस्वदेहरक्ष णार्थंयत्नमकुर्वन्तमतएवाशस्त्रंमामेतेधृतराष्ट्रपुत्राहन्यु स्तद्धननंमेममक्षेमतरंहिततरंभवेत् ४६ ॥

मधुसूदनी ॥

प्राणत्राणादपिप्रकृष्टोधर्मःप्राणभृतामहिंसापापानिष्पत्तेः त स्माज्जीवनापेक्षयाममस्मरणमेवक्षेमतरमत्यन्तहितंभवेत् प्रि यतरमितिपाठेसएवार्थः अप्रतीकारंस्वप्राणत्राणायव्यापार मकुर्वाणं बंधुवधाध्यवसायमात्रेणापिप्रायश्चित्तानतररहितं

ननुतववैराग्येऽपिभीमसेनादीनांयुद्धोत्साहाद्बंधुवधोभविष्यत्येव त्वया पुनः किं विधेयमित्यतआह

क

वा तथाच प्राणेनत्रायस्वितेनैव शुद्धिर्भविष्यतीत्यर्थः ४६ ॥

सदानंदी ॥

यदीदृशी मतिस्तेऽभूत्कुतस्तर्हि रणादितो त्वयुद्धाभिनिवेशेन हा गतोसीति चेच्छृणु १ अविचार्य मनोद्वंद्वं त्यक्तं मोहं ममेत्यहो न त्वेवं तव वैराग्यमभीमाद्यास्तु रणोत्सुकाः २ संति तैरेव बंधूनां वधः स्याद्यदि पापदः किं विधेयं त्वया तर्हीत्याशंक्याह यदीति ३ अहिंसा प्राणिनां धर्मः प्रकृष्टः प्राणरक्षणात् जीवनापेक्षया त्यक्तं हितं मे मरणं मतं ४ स्वप्राणरक्षणे हेतुव्यापारं मां मनागपि अकुर्वाणं रणे हन्युस्तदाहं स्यामकल्मषः ५ ॥ ४६ ॥

नीलकंठी टी॰ ॥ पूर्वं ॥ ४६ ॥

आनंदी टीका ।

एतेषपरस्परंयुद्धाभिलाषंवर्तन्ते नाहमत्रप्रवर्तेइतिनिश्चयेना
ह अप्रतीकारमकृतप्रतिविधानंमौदासीन्येनस्थितम् ४६

रामकंठी टी·

स्पष्टम् ४६

लासिका वल्लभी टीका

नन्वेतेसर्वेबन्धुवधेप्रवृत्तानोयुद्धंकर्तारमिच्छन्तोपि किंत्वंवदसि
विवेकिनंत्वांनत्वामिमेहन्तारमाह यदीति ४६ ॥ स्वाभिमतमाह
यदिमामप्रतीकारंप्रतियुद्धमकुर्वाणं अशस्त्रंशस्त्ररहितंशस्त्रपा
णयोधार्तराष्ट्राः संग्रामेहन्युर्हनिष्यन्ति तर्हितद्धननंमम
क्षेमतरंमत्यन्तंहितंभवेत् पापस्यानिष्पत्तेः संजयउवाच ४६

रामवीरसमिद्धोधिनी ॥

ननुत्वंचेन्नयुद्ध्येस्तर्हिपापबुद्धय एतेत्वामेवघातयिष्यन्तीत्यतः
किंकष्टतरमित्याशंक्याह यदिमामिति परवधात्स्वमरणमेवा
हिंसापर्यवसायितया स्वबंधुहतिजनितदुःखाभावाच्च॥
श्रेयइतिभावः॥

अस्मितः परं किं विधेयमित्यत आह

रामचन्द्रसरस्वतीकृतटीका ॥

यदीति अप्रतीकारं प्रायश्चित्तांतररहिते देहांतमभेदं प्रायश्चित्तमेवेतिभावः ॥ ४६

भाषा अनुवाद

और जो कहो कि युद्धसे विमुख बेहथियार तुमको संग्राम-
में धृतराष्ट्र केपुत्र सिकार सा पीट लेंगे तो वहमारना उन
का और मेरा मरना मेरे वास्ते कल्यान करहोगा कि जिस
में पापका संचारभी नही है ॥ ४६ ॥

दोहा

हों अपाप अप्रतिकारी है यदि पाण्डव यदि हस्त कौरव मो-
कों रण हनेतो मोहि बहुत प्रसस्त ४८॥

178

संजय उवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपा
विशत् विसृज्य सशरं चापं शोकसंविग्नमानसः
४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे सैन्यदर्शनो नाम
प्रथमोऽध्यायः १ ॥ भाष्यंनास्ति

आनंदगिरिकृतटीका ॥

यथोक्तमर्जुनस्य वृत्तांतं संजयो धृतराष्ट्रं राजानं प्रति प्रवेदि
तवान् तमेव प्रवेदनप्रकारं दर्शयति एवमिति प्रदर्शितेन प्र
कारेण भगवंतं प्रति विज्ञापनं कृत्वा शोकमोहाभ्यां परिभूत
मानसः सन्नर्जुनः संख्ये युद्धमध्ये शरेण सहितं गांडीवं त्यक्त्वा न
योत्स्येऽहमिति ब्रुवन्मध्ये रथस्य सन्न्यासमेव श्रेयस्करं मत्वोपवि
ष्टवानित्यर्थः ४७ ॥ इति श्रीआनंदगिरिटीकायां प्रथमोऽध्यायः १

स्वामिकृतटीका ॥

ततः किं वृत्तमित्यपेक्षायामाह संजयः एवमिति अर्जुन एवमु
क्त्वा संख्ये संग्रामे रथस्योपरि पश्चाद्भागे सशरं चापं विसृज्योपावि
शत् उपविष्टः शोकेन संविग्नं प्रकंपितं मानसं चित्तं यस्य
सः एवंविधः सन् उपविष्ट इत्यर्थः ४७ ॥ इति श्रीसुबोधिन्यां टी
कायां प्रथमोऽध्यायः ॥ १ ॥

रामानुजभाष्यम् ॥ तमार्थ ॥

सर्वगात्रः सर्वथा न योत्स्यामीत्युक्त्वा बंधुविश्लेषजनितशोकसंवि
ग्नमानसः सशरं चापमुत्सृज्य रथोपस्थ उपाविशत् ४७ ॥ इति रामा
नुजभाष्ये प्रथमोऽध्यायः ॥ १ ॥

अभिनवगुप्तकृतटीका ॥ ४७ ... संग्रहश्लोकः विद्याविद्योभय
तसंचहृविवशीकृतः युक्ताद्वयमायत्येत्त्वा
स्वविवेकोऽभवन्मुनिः ॥

इत्यभिनवगुप्ते प्रथमोऽध्यायः ॥ १

परमार्थप्रपाटी ॥

एवमुक्त्वेति संख्ये संग्रामे रथोपस्थे पर्यंक उपाविशत् उपविवेश शो
केन संविग्नं कंपितं मानसं यस्य तथा इति सः अध्यायतात्पर्यं सद्योमो
हाधिकारी संभवति खलु यः पापभीरुर्वितृष्णः स्याद् दृष्टार्थालिय
... मत्त्वेवं यादवेशो यत्तु पद
स्मान्निजजलदलनाद्राज्यभोगान्निवृत्तः

२ यो॰

मकरोद्ब्रह्मविद्योपदेशं भूभृद्धर्मोऽनुरूपं नतदिदमभिहितं त्वादिमध्यायकृत्यं ॥ ४७ ॥ इति परमार्थप्रपा टीकायां प्रथमोऽध्यायः १

वनमाली टी. ॥

ततः किमित्यत आह एवमिति संख्ये युद्धे रथोपस्थे रथोपरि ४७ इति वनमाली टीकायां प्रथमोऽध्यायः १ ॥

कुसुमवैजयन्ती टी. ॥

ततोऽर्जुनः किं कृतवान् इति धृतराष्ट्रस्याभिप्रायं ज्ञात्वा संजय आह एवमिति संख्ये संग्रामे सर्वथा युद्धं न करिष्यामीत्येवमुक्त्वा प्रकारेण भगवन्तमुक्त्वातिधार्मिकातिकोमलमना महोदारबुद्धिरतिशयकारुणिकोऽर्जुनः भाविबन्धुविश्लेषजनितशोकेन संविग्नं व्याकुलीभूतं मानसं यस्य सः सशरं शरेण सहितं धनुः त्यक्त्वा परित्यज्य रथोपस्थे रथस्योपरि उपाविशत् पूर्वं युद्धार्थं सैन्यावलोकनार्थं चोत्थितः पश्चात्तन्निरीक्षणजनितशोकाकुलेन्द्रियः सन्नुपविवेशेत्यर्थः ४७ दृष्ट्वा संख्ये बन्धुवर्गान् भूच्छोकाकुलस्तु धीः कृष्णोऽसौ कृष्णाभिन्नोऽपि प्रथमे हीति वर्णितम् १ इति कुसुमवैजयन्ती टीकायां प्रथमोऽध्यायः १ ॥

मधुसूदनी टी. ॥

संख्ये संग्रामे रथोपस्थे रथस्योपरि उपविवेश पूर्वं युद्धार्थमवलोकनार्थं चोत्थितः सन् शोकेन संविग्नं पीडितं मानसं यस्य सः ४७ इति मधुसूदनी टीकायां प्रथमोऽध्यायः १ ॥

ततः किं कृतमित्य पेक्षायाम्

सदानंदी टी. ॥

ततः किं कृतमित्यत्राकांक्षायामाह संजयः संग्रामे पूर्वमेवासौ युद्धार्थं दर्शनाय च १ भीष्मादीनां रथस्य पार्श्वभागे पार्थः समुत्थितः शोकेनाविष्टभावत्वात्पीडितयस्य मानसे २ सबाणं धनुस्त्यक्त्वा रथोपस्थ उपाविशत् ३ ॥ ४७ ॥ इति श्रीसदानंदी टीकायां प्रथमोऽध्यायः १ ॥

नीलकंठी टी. ॥

संख्ये संग्रामे ॥ ४७ ॥ इति नीलकंठी टीकायां प्रथमोऽध्यायः १

ज्ञानेश्वरी टीका ^एवमिति

अर्जुनवाक्यमुपसंहरन्संजय उवाच ४७ इतिश्रीभगवद्गीता
ज्ञानेश्वरीटीकायां प्रथमोध्यायः १ ॥

रामकंठी टी.

[illegible] इति श्रीभगवद्गीतारामकं
ठीटीकायां प्रथमोध्यायः १ ॥

[illegible] टी.

[illegible]
अर्जुन एवमुक्त्वा शोकेन संतप्यमानः सशरं चापं त्यक्त्वा संख्ये
संग्रामे रथोपरि पश्चाद्भागे उपाविशत् उपविष्टः ४७ ॥ इतिश्री भगव
द्गीताटीकायां तत्त्वप्रकाशिकाख्यायां राजानकलक्ष्मीरामविरचितायां अर्जुनविषादो नाम प्र
थमोध्यायः ॥ १ ॥

[illegible]वीरसमिद्बोधिनी ॥

एवमर्जुनवृत्तांतं संजयो धृतराष्ट्रं प्रति निवेदितवानित्याह ॥
संजय इति एवमिति उक्तप्रकारेण भगवंतं विज्ञाप्य संख्ये यु
द्धमध्ये बाणसहितं गांडीवं त्यक्त्वा शोकमोहाविष्टचेता रथस्यो
पस्थे पश्चाद्भागे उपविवेशेति भद्रम् ॥ ४७ ॥ इतिश्रीवरा
वीरसमिद्बोधिन्यां गीताव्याख्यायां प्रथमोध्यायः १ ॥

रामचंद्रसरस्वतीकृतटीका ॥
संजयवचनेस्पष्टम्॥ ४७ ॥ इतिश्रीरामचंद्रसरस्वतीकृतटीका
यांप्रथमोध्यायः १ ॥

भाषा अनुवाद ॥

अर्जुनका वृत्तान्त संजय धृतराष्ट्रसे कहते भये कि हे राजन धृतराष्ट्र फेरतो अर्जुन श्रीभगवानसे ऐसे बातै कहि कर के और शोक संतापसे व्याकुल और पीड़ित मन महा उदास जयकी आशासे निराश हो हाथसे धन्वा बानको भी त्याग कर रथके ऊपर बैठगये ४७ ॥ इतिश्रीभगवद्गीतायां मनभावनीनामटीकायां प्रथमोध्यायः समाप्तः १ ॥

दोहा ॥ संजयवाक्य ॥

ऐसें कहि अर्जुन तहां रथमे हिं पीछे होय बाणां धुनचाप हि तज्यो शोक विह्वमन सोय ४७ ॥ इतिश्रीमहाराजराणावीरसिंहजीकी आज्ञानुसार जो करी हैं वीरसिंहने वीररसप्रकाशनी बालबोधनी श्रीभगवतगीताकीटीका तिसकी प्रथमाध्याय संपूर्ण ॥